
(महाभारते)

भगवद्गीता अष्टादश
टीकासहिता पंचमाध्या
यः

२०८५





पंचमाध्याय

शंकरभाष्य
आनंदगिरिटी०
श्रीधरी स्वामिकृत
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
उत्तमवैजयंती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

अर्जुन उवाच संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं ।

शांकरभाष्यं

कर्मण्यकर्म यः पश्येदित्यारभ्य स युक्तः कृत्स्नकर्मकृत ज्ञानाग्निदग्ध
कर्माणं शारीरं केवलं कर्म कुर्वन् यदृच्छालाभसंतुष्टो ब्रह्मार्पणं ब्रह्म ह
विः कर्मजान् विद्धि तान् सर्वान् सर्वं कर्माखिलं पार्थ ज्ञानाग्निः सर्वकर्मा
णि योगसंन्यस्तकर्माणमित्येतैर्वचनैः सर्वकर्मसंन्यासमवोचद्भगवा
न् छित्वैनं संशयं योगमातिष्ठेत्यनेन वचनेन पुनर्योगं च कर्मानुष्ठान
लक्षणमनुतिष्ठेत्युक्तवान् तयोरुभयोश्च कर्मानुष्ठानकर्मसंन्यासयोः स्थि
तिगतिवत् परस्परविरोधादेकेन सह कर्त्तुमशक्यत्वात् कालभेदेन वानु
ष्ठानविधानाभावादर्थादेतयोरन्यतरकर्तव्यतायां प्राप्तायां यत् प्रशस्य
तरमेतयोः कर्मानुष्ठानकर्मसंन्यासयोः तत् कर्तव्यं नेतरदित्येवं मन्यमा
नः प्रशस्यतरबुभुत्सयार्जुन उवाच संन्यासं कर्मणां कृष्णेत्यादिना ननु
चात्मविदो ज्ञानयोगेन निष्ठां प्रतिपादयिष्यन् पूर्वोदाहृतैर्वचनैर्भगवान् स
र्वकर्मसंन्यासमवोचन्नत्वनात्मज्ञस्यातश्च कर्मानुष्ठानकर्मसंन्यासयोर्भिन्नपु
रुषविषयत्वादन्यतरस्य प्रशस्यतरत्वबुभुत्सया प्रश्नोऽनुपपन्नः सत्यमेवं त्व
दभिप्रायेण प्रश्नो नोपपद्यते प्रष्टुः स्वाभिप्रायेण पुनः प्रश्नो युज्यत एवेति
वदामः कथं पूर्वोदाहृतैर्वचनैर्भगवता कर्मसंन्यासस्य कर्तव्यतया विव
क्षितत्वात् प्राधान्यमन्तरेण च कर्तारं तस्य कर्तव्यत्वासंभवादनात्मविदपि
कर्ता पक्षे प्राप्तोऽनूद्यत इति न पुनरात्मवित्कर्तृकत्वमेव संन्यासस्य विवक्षित
मित्येवं मत्वार्जुनस्य कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्पुरुषकर्तृ
कत्वमप्यस्तीति पूर्वोक्तेन प्रकारेण तयोः परस्परविरोधादन्यतरस्य कर्तव्य
त्वे प्राप्ते प्रशस्यतरं च कर्तव्यं नेतरदिति प्रशस्यतरविविदिषया प्रश्नो नानुप
पन्नः प्रतिवचनवाक्यार्थनिरूपणेनापि प्रष्टुरभिप्राय एवमेवेति गम्यते
कथं संन्यासकर्मयोगौ निःश्रेयसकरौ तयोस्तु कर्मसंन्यासात् कर्मयोगो
विशिष्यते इति प्रतिवचनमेतन्निरूप्यं किमनेनात्मवित्कर्तृकयोः संन्यासकर्म

योगयोर्निःश्रेयसकरत्वं प्रयोजनमुक्त्वा तयोरेव कुतश्चिद्विशेषात् कर्मसंन्या
सात् कर्मयोगस्य विशिष्टत्वमुच्यते आहोस्विदनात्मवित्कर्तृकयोः संन्यासकर्म
योगयोः तदुभयमुच्यत इति किं चातो यद्यात्मवित्कर्तृकयोः कर्मसंन्यासकर्म
योगयोर्निःश्रेयसकरत्वं तयोस्तु कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वमुच्य
ते यदि वानात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तदुभयमुच्यत इति अत्रो
च्यते आत्मवित्कर्तृकयोः संन्यासकर्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्वव
चनं तदीयाच्च संन्यासात् कर्मयोगस्य विशिष्टत्वाभिधानमित्येतदुभयमनुप
पन्नं यद्यनात्मविदः कर्मसंन्यासः तत्प्रतिकूलश्च कर्मानुष्ठानलक्षणः कर्मयो
गः संभवेतां तदा तयोर्निःश्रेयसकरत्वोक्तिः कर्मयोगस्य च कर्मसंन्यासाद्विशि
ष्टत्वाभिधानमित्येतदुभयमुपपद्येत आत्मविदस्तु संन्यासकर्मयोगयोर
संभवात्तयोर्निःश्रेयसकरत्वाभिधाने कर्मसंन्यासाच्च कर्मयोगो विशिष्यत
इति चानुपपन्नमत्राह किमात्मविदः संन्यासकर्मयोगयोरप्यसंभव आ
होस्विदन्यतरस्यासंभवः यदा वान्यतरस्यासंभवस्तदा किं कर्मसंन्यासस्यात
कर्मयोगस्यासंभवे कारणं च वक्तव्यमिति अत्रोच्यते आत्मविदो निवृत्त
मिथ्याज्ञानत्वाद्विपर्ययज्ञानमूलस्य कर्मयोगस्यासंभवः स्याज्जन्मादिसर्व
विक्रियारहितत्वेन निःक्रियमात्मानमात्मत्वेन यो वेत्ति तस्यात्मविदः सम्य
ग्दर्शनेनापास्तमिथ्याज्ञानस्य निःक्रियात्मस्वरूपावस्थानलक्षणं सर्वक
र्मसंन्यासमुक्त्वा तद्विपरीतस्य मिथ्याज्ञानमूलककर्तृत्वाभिमानपुरःसरस्य
सक्रियात्मस्वरूपावस्थानरूपस्य कर्मयोगस्येह शास्त्रे तत्र तत्रात्मस्वरूपा
निरूपणप्रदेशेषु सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधादभावः प्रतिपा
द्यते यस्मात्तस्मादात्मविदो निवृत्तमिथ्याज्ञानस्य विपर्ययज्ञानमूलः ।
कर्मयोगो न संभवतीति युक्तमुक्तं स्यात् केषु केषु पुनरात्मस्वरूपनिरूपणा
प्रदेशेष्वात्मविदः कर्माभावः प्रतिपाद्यत इत्यत्रोच्यते अविनाशि तु तदिति
[illegible] य एनं वेत्ति हन्तारं वेदाविनाशिनं नित्यमित्यादौ तत्र तत्रात्मवि
दः कर्माभाव उच्यते ननु च कर्मयोगोऽप्यात्मस्वरूपनिरूपणप्रदेशे तत्र
तत्र प्रतिपाद्यत एव तद्यथा तस्माद्युध्यस्व भारत स्वधर्ममपि चावेक्ष्य क
र्मण्येवाधिकारस्ते इत्यादावतश्च कथमात्मविदः कर्मयोगस्यासंभवः स्या

दिति अतोच्यते सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात् ज्ञानयोगेन सांख्यानां नि
ष्ठेति सांख्यानामात्मतत्त्वविदामनात्मविकर्तृककर्मयोगानिष्ठातो निःक्रिया
त्मस्वरूपावस्थानलक्षणीया ज्ञानयोगनिष्ठायाः पृथक्करणात् कृतकृत्यत्वे
नात्मविदः प्रयोजनान्तराभावात् तस्य कार्यं न विद्यत इति कर्तव्यान्तराभावव
चनाच्च न कर्मणामनारंभात् संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः इत्या
दिवचनाच्चात्मज्ञानाङ्गत्वेन कर्मयोगस्य विधानात् योगारूढस्य तस्यैव शमः का
रणमुच्यत इत्येवं च योगारूढस्य सम्यग्दर्शनस्य कर्मयोगाभाववचनात् शारीरं केवलं
कर्म कुर्वन्नाप्नोति किल्बिषमिति च शरीरस्थितिकारणातिरिक्तस्य कर्मणो
वारणात् नैव किंचित्करोमीति युक्तो मन्येत तत्त्वविदित्यनेन च शरीरस्थितिमा
त्रप्रयुक्तेष्वपि दर्शनश्रवणादिकर्मस्वात्मयाथात्म्यविदः करोमीति प्रत्ययस्य
समाहितचेतस्तया सदा कर्तव्यत्वोपदेशात् आत्मतत्त्वविदः सम्यग्दर्शनेन विरुद्धो
मिथ्याज्ञानहेतुकः कर्मयोगः स्वप्नेऽपि न संभावयितुं शक्यते यस्मात्तस्मादना
त्मविकर्तृकयोरेव संन्यासकर्मयोर्निःश्रेयसकरत्ववचनं तदीयाच्च कर्मसंन्यासा
त् पूर्वोक्तात्मविकर्तृकसर्वकर्मसंन्यासविलक्षणत्वात् सत्येव कर्तृत्वविज्ञाने कर्मै
कदेशविषयत्वात् यमनियमादिसहितत्वेन च दुरनुष्ठेयत्वात् सकरत्वेन च क
र्मयोगस्य विशिष्टत्वाभिधानमित्येवं प्रतिवचनवाक्यार्थनिरूपणेनापि पूर्वोक्तः
पृष्टुरभिप्रायो निश्चीयते इति स्थितं ज्यायसी चेत्कर्मणस्ते इत्यत्र ज्ञानकर्मणोः
सहासंभवे यच्छ्रेय एतयोस्तन्मे ब्रूहि इत्येवं पृष्टोऽर्जुनेन भगवान् ज्ञानयोगेन सां
ख्यानां निष्ठा पुनः कर्मयोगेन योगिनां निष्ठा प्रोक्तेति निर्णयं चकार न च संन्यस
नादेव केवलात् सिद्धिं समधिगच्छतीति वचनात् ज्ञानसहितस्य तस्य सिद्धिसा
धनत्वमिष्टं कर्मयोगस्य च विधानात् ज्ञानरहितस्य संन्यासः श्रेयान् किं वा कर्मयो
गः श्रेयानित्येतयोर्विशेषबुभुत्सया अर्जुन उवाच संन्यासं परित्यागं कर्मणां शा
स्त्रीयाणां अनुष्ठानविशेषाणां शंससि प्रशंससि कथयसीत्येतत् पुनर्योगं च
तेषामेवानुष्ठानमवश्यं कर्तव्यं प्रशंससि अतो मे कतरत् श्रेय इति संशयः किं कर्मा
नुष्ठानं श्रेयः किं वा तत्त्यागमिति प्रशस्यतरं चानुष्ठेयम् अतश्च यच्छ्रेयः प्रशस्यतर
मेतयोः कर्मसंन्यासकर्मानुष्ठानयोर्यदनुष्ठानात् श्रेयोवाप्तिर्मम स्यादिति मन्य
से तदेकमन्यतरत् सहैकपुरुषानुष्ठेयत्वासंभवान्मे ब्रूहि सुनिश्चितमभिप्रेतं
तवेति १

आनंदगिरिकृतटीका

पूर्वोत्तराध्याययोः संबंधमभिदधानो वृत्तानुवादपूर्वकमर्जुनप्रश्नस्याभिप्रायं प्र
दर्शयितुं प्रक्रमते कर्मणीत्यादिना । इत्यारभ्य कर्मण्यकर्मदर्शनमुक्त्वा तस्य शेषता
प्रसाधितेत्याह स एष इति ज्ञानवंतं सर्वाणि कर्माणि लोकसंग्रहार्थं कुर्वंतं ज्ञानल
क्षणेनाग्निना दग्धसर्वकर्माणं कर्मप्रयुक्तफलसंबन्धविधुरं विवेकवंतो वदन्ती
ति ज्ञानवतो ज्ञानफलभूतं संन्यासं विवक्षन् विविदिषोः साधनरूपमपि संन्यासं
भगवान् विवक्षितवानित्याह ज्ञानाग्नीति निराशीरित्यारभ्य शारीरस्थितिमात्रका
रणं कर्म शरीरस्थितावपि संगरहितः सन् समाचरन् धर्माधर्मफलभागी न भवती
त्यपि पूर्वोत्तराभ्यामध्यायाभ्यां द्विविधसंन्यासं सूचितवानित्याह शारीरमिति यदृ
च्छेत्यादावपि संन्यासः सूचितः तद्धर्मफलायोपदेशादित्याह यदृच्छेति ज्ञानस्य
यज्ञत्वसम्पादपूर्वकं प्रशंसावचनादपि कर्मसंन्यासो दर्शितो ज्ञाननिष्ठस्येत्याह
ब्रह्मार्पणमिति ज्ञानयज्ञस्तवनार्थं विहितान्नानाविधान् यज्ञाननूद्य तेषां देहादि
व्यापारजन्यत्ववचनेनात्मनो निर्व्यापारत्वविज्ञानफलाभिलापादपि यथोक्तमा
त्मानं विविदिषोः सर्वकर्मसंन्यासेऽधिकारो ध्वनित इत्याह कर्मजानिति समस्त
स्यैवावशेषवर्जितस्य कर्मणो ज्ञाने पर्यवसानाभिधानाच्च जिज्ञासोः सर्वक
र्मसंन्यासः सूचित इत्याह सर्वमिति तद्विद्धीत्यादिना ज्ञानप्राप्त्युपायं प्रणिपा
तादि प्रदर्शयता प्राप्तेन ज्ञानेनातिशयमाहात्म्यवता सर्वकर्मणां निवृत्तिरेवेति व
दता च ज्ञानार्थिनः संन्यासेऽधिकारो दर्शितो भगवतेत्याह ज्ञानाग्निरिति ज्ञानेन
सम्यक्छिन्नसंशयं तस्मादेव ज्ञानात् कर्माणि संन्यस्य स्वात्मन्यवस्थितमप्रमत्तं वशीकृ
तकार्यकरणसंघातवंतं प्रातिभासिकानि कर्माणि न निबध्नन्तीत्यपि द्वि
विधः संन्यासो भगवतोक्त इत्याह योगेति कर्माणीत्यारभ्य योगसंन्यस्तकर्मा
णमित्यन्तैरुदाहृतैर्वचनैरुक्तं संन्यासमुपसंहरति इत्यन्तैरिति तर्हि कर्मसंन्यास
स्यैव जिज्ञासुनाऽज्ञानवता चाचरणीयत्वात् कर्मानुष्ठानमनादेयमापन्नमित्याशं
क्योक्तमर्थमत्रानुवदति किं तेनेति कर्मतत्त्यागयोरुक्तयोरेकेनैव पुरुष
णानुष्ठेयत्वसंभवान्न विरोधोऽस्तीत्याशंक्य युगपत्क्रमेण वाऽनुष्ठानमिति वि
कल्पाद्यं दूषयति उभयोश्चेति द्वितीयं प्रत्याह कालभेदेनेति उक्तयोर्द्वयोरेकेन
पुरुषेणानुष्ठेयत्वासंभवे कथं कर्तव्यत्वसिद्धिरित्याशंक्याह अर्थादिति द्वयोरु
क्तयोरेकेन युगपत्क्रमाभ्यामनुष्ठानानुपपत्तेरित्यर्थः अन्यतरस्य कर्तव्यत्वेन कतर

स्येति ज्ञातो निर्णयो द्वयोः संनिधानाविशेषादित्याशंक्याह यत् श्रेयस्तरमिति
भगवता कर्मणां संन्यासो योगश्चोक्तो न च तयोः समुच्चित्यानुष्ठाने तेनान्यतरस्य
श्रेष्ठस्यानुष्ठेयत्वे तदनुबुभुत्सया प्रश्नोपपत्तिरित्युपसंहरति इत्येवमिति नायं प्रष्टुर
भिप्रायः कर्मसंन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेयत्वस्यैकत्वादेकस्मिन् पुरुषे
प्राप्त्यभावादिति शंकते ननु त्विति चोद्यमंगीकृत्य परिहरति सत्यमेवमिति की
दृशस्तर्हि प्रष्टुरभिप्रायो येन प्रश्नप्रवृत्तिरिति पृच्छति कथमिति एकस्मिन्पुरु
षे कर्मतत्त्यागयोरस्ति प्राप्तिरिति प्रष्टुरभिप्रायं प्रतिनिर्दिशन्प्रारभते एवं तावद्
वेदितेति यथा स्वर्गकामो यजेतेति स्वर्गकामोद्देशेन यागो विधीयते तत्तु तस्य
वाधिकारो नात्मविदोपि प्राप्यते वाक्यभेदप्रसंगात्तथा नात्मवित्कर्ता सं
न्यासपदे प्राप्तोऽनूदितेन वात्मवित्कर्तृकत्वमेव संन्यासस्य नियम्यते वैराग्यमा
त्रेणाज्ञस्यापि संन्यासविधिदर्शनात् तस्मात्कर्मतत्त्यागयोरविद्वत्कर्तृकत्वमा
स्तीति मत्वार्जुनस्य प्रश्नः संभवतीति भावः भवतु संन्यासस्य कर्तव्यविवा
त्तात्तथापि कथं प्रशस्यतरत्वबुभुत्सया प्रश्नप्रवृत्तिरित्याशंक्याह प्राधान्यमिति त
थापि कथमेकस्मिन्पुरुषे तयोः प्राप्त्यभावादुक्ताभिप्रायेण प्रश्नवचनं प्रकल्प्यते
तत्राह अनात्मविदिति आत्मविदो विद्यासामर्थ्यात् कर्मत्यागयोर्व्यवस्थितस्या
पि सति वैराग्ये तत्त्यागस्यावश्यकत्वात् तत्र कर्तात्मैवात्मनानूद्यते तथा च कर्म
तत्त्यागयोरेकस्मिन् विदुषि प्राप्तेर्यदुक्ताभिप्रायेण प्रश्नप्रवृत्तिरविरुद्धेत्य
र्थः संन्यासस्यात्मवित्कर्तृकत्वमेवात्र विवक्षितं किं तस्मादित्याशंक्याह कर्तृत्व
पर्युदासः संन्यासविधिस्थत्वप्रभेदे वाक्यभेदप्रसंगात्मैवमित्याह नत्वनात्मविदिति इ
तिशब्दो वाक्यभेदप्रसंगहेतुद्योतनार्थः ततः [illegible] किमित्याशंक्य फलितमाह
एवमिति कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्कर्तृकत्वमभ्युपगम्यैवं मत्वा
र्जुनस्य प्रश्नः प्रशस्यतरविविदिषया प्रश्नो नानुपपन्न इति संबन्धः तयोः समुच्चि
त्यानुष्ठानसंभवे कथं प्रशस्यतरविविदिषेत्याशंक्याह पूर्वोक्तेनेति उभयोस्त
स्मादावृत्तप्रकारेण कर्मतत्त्यागयोर्मिथो विरोधात् समुच्चित्यानुष्ठानं तावदश
क्यमित्यर्थः भवतु तर्हि यस्य कस्यचिदन्यतरस्यानुष्ठेयत्वमिति ज्ञातो यद्युक्ताभि
प्रायेण प्रश्नप्रवृत्तिरित्याशंक्याह अन्यतरस्येति उभयप्राप्तौ समुच्चयानुपपत्ताव
न्यतरपरिग्रहे विशेषस्यानवधारणादुक्ताभिप्रायेण प्रश्नोपपत्तिरित्यर्थः ।। इतश्च ।।

गी॰ टी॰ प

विद्वत्कर्तृकयोः संन्यासकर्मयोगयोः कर्तव्यतः श्रेयानिति प्रष्टुरभिप्रायो भातीत्या
ह प्रतिवचनेनेति किं तत्प्रतिवचनं कथं वा तन्निरूपणमिति पृच्छति कथमि
ति तत्र प्रतिवचनं दर्शयति संन्यासेति तन्निरूपणं कथयति यत्तदिति तदुभ
यं निःश्रेयसकरं तत्र कर्मयोगस्य श्रेष्ठत्वं चेत्यर्थः गुणदोषविभागविवक्षायां
पृच्छति किं चेति अतोऽस्मिन्नाद्ये पक्षे किं दूषणं अस्मिन्वा द्वितीये पक्षे किं फ
लमिति प्रश्नार्थः तत्र सिद्धान्ती प्रथमपक्षे दोषमादर्शयति अत्रेत्यादिना म
देवानुपपन्नत्वं व्यतिरेकद्वारा विवृणोति यदीत्यादिना निःश्रेयसकरत्वोक्तिरि
त्यत्रापरस्पर्ययोगेति इष्टत्वं विशिष्टत्वाभिधानमिति प्रतियोगिनोः सद्भावत्वा
दस्य च शुद्धिद्वारा ज्ञानार्थत्वादित्यर्थः आत्मज्ञस्य कर्मसंन्यासकर्मयोगयो
रसंभवे दर्शिते चोदयति अज्ञादेति चोदयितानिर्दिष्टतार्थं विमृशति किमि
त्यादिना अन्यतरासंभवेऽपि संदेहात् प्रश्नोऽवतरतीत्याह यदा चेति यस्य कस्य
चिदन्यतरस्यासंभवो भविष्यतीत्याशङ्क्य कारणमन्तरेणासंभवो भवन्नतिप्रसं
गः स्यादिति मन्वानः सं नाह असंभ इति आत्मविदः सकारणं कर्मयोगासंभ
वं सिद्धान्ती दर्शयति यच्चेति संग्रहवाक्यं विवृणोति नात्मवित्वं विवृणोति जन्मादी
ति तस्य पङ्क्तिं निहतमिथ्याज्ञानत्वे सहिदांतीध्यनक्रियसमपागिति विपर्ययज्ञा
नमूलस्येत्यादिनोक्तं प्रपञ्चयति निःक्रियेति यथोक्तसंन्यासमनुक्त्वा ततो विपरी
तस्य कर्मयोगस्याभावः प्रतिपाद्यत इति संबन्धः वैपरीत्यं स्फोरयन् कर्मयोग
मेव विशिनष्टि मिथ्याज्ञानेनेति मिथ्या चेतद्ज्ञानं चेत्यनात्मनि विवेकिनः सम्यग्ज्ञानं
तन्मूलाहंकर्तृत्वात्मनीति कर्तृत्वाभिमानपूर्वकस्येति यावत् यथोक्तसं
न्यासमनुक्त्वा यथोक्तकर्मयोगस्यासंभवप्रतिपादने हेतुमाह सम्यग्ज्ञा
नेति उक्ततदभावप्रतिपादनं तदाह इहेति उक्तेऽर्थे तं कृत्वात्मज्ञस्य कर्मयो
गासंभवे फलितमाह यस्मादिति इहशास्त्रे तत्र तत्रेत्यादावुक्तमेव व्यक्ती
कर्तुं पृच्छति केषु केषुचिदिति तानेव प्रदेशान् दर्शयति अत्रेति आत्मस्वरूपनि
रूपणप्रदेशेषु संन्यासप्रतिपादनादात्मविदः संन्यासो विवक्षितस्तेन हि क
र्मयोगोऽपि तस्य कस्मान्न भवति प्रकरणविशेषादिति शंकते न त्वेति । आ
त्मविद्याप्रकरणे कर्मयोगप्रतिपादनमदाहृतमिति तद्यथेति प्रकरणादात्मवि
दोऽपि कर्मयोगस्यासंभवे फलितमाह अत एवेति आत्मज्ञानोपायत्वेनापि प्रक

गपाठसिद्धौ ज्ञानारूढेन्यायविरुद्धं कर्मकल्पितमशक्यमिति परिहरति
अत्रोच्यत इति सम्यग्ज्ञानमिथ्याज्ञानयोस्तत्कार्ययोश्च भ्रमनिवृत्तिभ्रमसद्भा
वयोर्मिथो विरोधात् कर्तृत्वादिभ्रममूलं कर्म सम्यग्ज्ञानारूढे न संभवतीत्य
र्थः आत्मतत्त्वस्य कर्मयोगासंभवे हेत्वन्तरमाह ज्ञानयोगेनेति इतश्चात्म
विदो ज्ञानारूढस्य कर्मयोगेन मुक्तिमानित्याह कृतकृत्यत्वेनेति ज्ञानवतो ना
स्ति कर्मेत्यत्र कारणान्तरमाह तस्येति तर्हि ज्ञानवता कर्मयोगस्य हेयत्वव
ज्जिज्ञासुनापि तस्य त्याज्यत्वं ज्ञानप्राप्त्यनन्यापि गृहस्थापेक्षासिद्धेरित्याशंक्या
जिज्ञासोरस्ति कर्मयोगापेक्षा इत्याह न कर्मणामिति स्वरूपोपकार्यं योगम
न्तरेणाङ्गिस्वरूपानिष्पत्तेर्ज्ञानार्थिना कर्मयोगस्य शुद्ध्यादिद्वारा ज्ञानहेतो
रादेयत्वमित्यर्थः तर्हि ज्ञानवतामपि ज्ञानफलोपकारित्वेन कर्मयोगो ।
ऽनुष्ठेय इत्याशंक्याह योगारूढस्येति उत्पन्नसम्यग्ज्ञानस्य कर्माभावे श
रीरस्थितिहेतोरपि कर्मणोऽसंभवात्तस्य शरीरस्थितिस्तदस्थितौ वा कु
तो जीवन्मुक्तिस्तदभावे च कस्योपदेष्टृत्वं उपदेशाभावे च कुतो ज्ञानोदयः
स्यादित्याशंक्याह शरीरमिति विदुषोऽपि शरीरस्थितिरास्थिता वृत्तमात्रप्र
युक्ते श्रवणदर्शनश्रवणादि कर्तृत्वाभिमानोऽपि तस्य स्यादित्याशंक्याह नैवेति
तत्त्वविदित्यनेन च स्वमाहात्म्यं च तत्तया करोमीति प्रत्ययस्य सदैवाकर्तृत्वेऽप्युपदे
शादिति संबन्धः यत्तु विदुषः शरीरस्थितिनिमित्तं कर्माभ्यनुज्ञानेन तस्मिन्
कर्तृत्वाभिमानोऽपि स्यादिति तत्राह शरीरेति आत्मयाथात्म्यविदः तेषामपि ना
हं करोमीति प्रत्ययस्यैव किंचित्करोमीत्यादावकर्तृत्वोपदेशान्न कर्तृ
त्वाभिमानसंभावनेत्यर्थः यथोक्तोपदेशानुसंधानाभावे विदुषोऽपि करो
मीति स्वाभाविकप्रत्ययद्वारा कर्मयोगः स्यादित्याशंक्याह आत्मवत्तेति या
वदपि विद्वान् यथोक्तमुपदेशं कदाचिन्नानुसंधत्ते तथापि तत्त्वविद्याविरोधा
न्मिथ्याज्ञानं तन्निमित्तं कर्म वा तस्य संभावयितुमशक्यमित्यर्थः आत्मवि
त्कर्तृकयोः संन्यासकर्मयोगयोरयोगान्न यतिः श्रेयस्करत्वमन्यतरस्य
विशिष्टत्वमित्येतदयुक्तमिति सिद्धत्वात् द्वितीयपक्षमङ्गीकरोति यस्मा
दित्यादिना तदीयाच्च कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वाभिधानमि
ति संबन्धः ननु कर्मयोगेन शुद्धबुद्धेः संन्यासो जायमानस्तस्मादुत्कृष्यते
कथं तस्मात् कर्मयोगस्योत्कृष्टत्ववाचोयुक्तिर्युक्तेति तत्राह एवोक्तेति वै

गी॰
टी॰
पं

5

लक्षणमेव स्पष्टयति सम्यग्वेति। स्वाश्रमविहितस्य वर्णादेः कर्तृत्वविज्ञाने स
त्येव पूर्वाश्रमोपात्तकर्मैकदेशविषयसंन्यासात्कर्मयोगस्य श्रेयस्त्ववचने।
नैतादृशं वचनमस्यास्ति विलम्बितमित्यादिस्मृतिविरुद्धमित्याशंक्याह यमनिय
मादीति। आनृशंस्यं सत्यमहिंसा दम आर्जवं प्रीतिः प्रसादो माधुर्यम
क्रोधश्च यमा दश। दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहौ। व्रतोपवासौ
मौनं च स्नानं च नियमा दश। इत्युक्तैर्यमनियमैरन्यैश्चाश्रमधर्मैर्विशिष्टत्वेना
नुष्ठातुमशक्यत्वात्संन्यासात्कर्मयोगस्य विशिष्टत्वोक्तिर्युक्तेत्यर्थः। न
हि किंचिदिति न्यायेन कर्मयोगस्येतरापेक्षयोत्कर्षवत्त्वाच्च तस्य विशिष्टत्व
वचनं श्लिष्टमित्याह उक्तेनेनचेति। प्रतिवचनवाक्यार्थालोचनात्सिद्ध
मर्थमुपसंहरति इत्येवमिति। संन्यासकर्मयोगयोर्मिथो विरुद्धयोः सम
श्चित्यानुष्ठानमशक्यत्वादन्यतरस्य कर्तव्यत्वे प्रशस्यतरस्य तज्ज्ञानतज्ज्ञाव।
स्य वा निर्द्धारितत्वान्न निर्द्धारणविषयः प्रश्नः स्यादिति प्रश्नवाक्यार्थपर्यालोच
नया प्रवृत्तेरभिप्रायो यथा पूर्वमुपदिष्टस्तथा प्रतिवचनार्थनिरूपणेनापि
तस्य निश्चितत्वात् प्रश्नोपपत्तिः सिद्धेत्यर्थः। ननु त्वतीये यथोक्तप्रश्नस्य भग
वता निर्णीतत्वान्नात्र प्रश्नप्रतिवचनयोः सावकाशतेत्याशंक्य विकल्वे
भिन्नप्रश्नानुष्ठेयत्वेन निर्णीतत्वान्न पुनः प्रश्नोपपत्तिरित्याह नचेति। सांख्ययोगयो
स्तयोः प्रश्नविषयत्वमित्याह नचेति एवकारविशेषणाज्ज्ञानसहितस्य
मायस्याविद्विसाधनत्वं भगवताभिमतं छित्वैनं संशयं योगमातिष्ठेति च
कर्मयोगस्य विधानात्तस्यापि सिद्धिसाधनत्वमिष्टं तत्तस्य निर्णीतत्वात्।
प्रश्नस्तद्विषयः सिद्धानीत्यर्थः। केनाभिप्रायेणातर्हि प्रश्नः स्यादित्याशंक्या
तइति प्रष्टुरभिप्रायमेव प्रदर्शयन्प्रश्नोपपत्तिमक्त्वा प्रश्नमवतारयति
ज्ञानरहितस्य संन्यासात् कर्मयोगस्य प्रशस्यतरत्वं बुभुत्समानस्येत्याह ज्ञानरहि
तमितितर्हि इदं त्वयानुष्ठेयमित्याशंक्य तदस्य कर्तव्यत्वात् प्रश्नस्यापपत्तिरित्याशंक्या
नुष्ठानार्थं नतरिदमिति निश्चित्य वक्तव्यमित्याह यच्छ्रेय इति काम्यानां प्रति
षिद्धानां च कर्मणां परित्यागो मयोच्यते न सर्वेषामित्याशंक्य कर्मणामेक
मैत्यादौ विशेषदर्शनान्नास्मेवमित्याह प्रागुक्तयोरिति। प्रश्नानन्तरं प्राप्ती
यायाम्बौ ययोरन्यतरयोरपि कर्मत्यागस्याभिनेत्याह उभाविति तदिकर्मत्या

गतं योगं च तु भयमादर्शितव्यमित्याशंक्य विरोधात्कैवमित्यभिप्रेत्याह
अर्जुन इति द्वयोरेकेनानुष्ठानायोगस्याक्रमत्वात् कर्तव्यत्वोक्तेश्च संशयोऽज्ञा
यते तमेव संशयं विप्रश्नयति किं कर्मेति प्रशस्यतरं तु भुक्त्वा किमर्थं त्यागं कर्म
ह प्रशस्यतरं चेति तमेवानुष्ठेयत्वेन प्रशंसावकाशतमाह अतस्त्वेति तदेव
प्रशस्यतरं विशिनष्टि परस्परमनुष्ठानादिति तदेकमस्मात् प्रसंगे ब्रूहीति संबन्धः
उभयोः क्रमेण संभवति किमित्येकं वक्तव्यमिति निश्चयात् तत्राह संदेहेति कर्मत्या
गयोर्मिथो विरोधादित्यर्थः १॥

स्वामिकृतटीका

तिरोधि संप्रायं जिज्ञासुः कर्मसंन्यासयोगयोः अतेंद्रिय... यतेः पंचमी मुक्तिम...

अज्ञानसंभूतं संशयं ज्ञानासिना छित्वा कर्मयोगमातिष्ठेत्युक्तं तत्र पूर्वा
परविरोधं मन्वानोऽर्जुन उवाच संन्यासमिति यस्त्वात्मरतिरेव स्यादि
त्यादिना सर्वकर्माविलेपार्थं ज्ञानमित्यादिना च ज्ञानिनः कर्मसंन्यासं
कथयसि ज्ञानासिना संशयं छित्वा योगमातिष्ठेति पुनर्योगं कथयसि
न च कर्मसंन्यासः कर्मयोगश्चैकस्यैकदैव संभवतः विरुद्धस्वरूपत्वात्
तस्मादेतयोर्मध्ये एकस्मिन्ननुष्ठातव्ये सति मम यच्छ्रेयः सुविनिश्चितं तदे
कं ब्रूहि १ [illegible]

पिशाचभाष्यं

सकलकर्मसंन्यासेन शमदमादिसाधनानुष्ठानेन ब्रह्मजिज्ञास
मानस्य ब्रह्मावबोधः स्यादेव न यागसन्तोः सकलकाम्यनिषिद्धक
र्मसंन्यासेन वा स्यादेवाथ नैवं त्याकर्मार्पणानुष्ठानेन सत्त्वशुद्धेर्नान्तयका
लेन संबोधः स्यादेवेत्यभिप्रायः १॥

रामानुजभाष्यं

चतुर्थेऽध्याये कर्मयोगस्य ज्ञानाकारतापूर्वकस्वरूपभेदो ज्ञानांशस्य च प्रा
धान्यमुक्तं ज्ञानयोगाधिकारिणोऽपि कर्मयोगान्तर्गतात्मज्ञानत्वादप्र
मादत्वात् सुकरत्वान्निरपेक्षत्वाज्ज्यायस्त्वं तृतीय एवाध्याये प्रोक्तं इदानीं कर्मयो
गस्यात्मप्राप्तिसाधनत्वे ज्ञाननिष्ठायाः शैघ्र्यं कर्मयोगान्तर्गताकर्तृत्वानु
संधानप्रकारं च प्रतिपाद्य तन्मूलं ज्ञानं च विशोध्यते कर्मणां संन्यासं
ज्ञानयोगं च नः कर्मयोगं च प्रशंससि तदुक्तं भवति द्वितीयेनाध्यायेन
मुमुक्षोः प्रथमं कर्मयोग एव कार्यः कर्मयोगेन मृदितान्तःकरणकषाय

गी॰ टी॰ पं॰

6

स्वज्ञानयोगेनात्मदर्शनं कार्यमिति प्रतिपाद्य पुनस्तृतीये चतुर्थे योगीन
योगाधिकारदशामापन्नस्यापि कर्मनिष्ठैव ज्यायसीमेव ज्ञाननिष्ठानिर
पेक्षात्मप्राप्त्येकसाधनमिति कर्मनिष्ठां प्रशंसन्ति तत्रैव ज्ञानयोगकर्म
योगयोरात्मप्राप्तिसाधनभावे यदेकं सौकर्यात् श्रेयः श्रेष्ठमिति त
न्मे ब्रूहि ॥१॥

श्रीअभिनवगुप्तकृती टीका

संन्यासः प्रधानं उत योग इति संशयस्य प्रश्नः ॥१॥

परमार्थप्रपा टीका

अथ परस्परविरुद्धयोः कर्मसंन्यासकर्मयोगयोः स्वकृतउपदेशात्संदिहा
नोऽर्जुनः पृच्छति संन्यासमिति । भो कृष्ण प्रथमं कर्मणां संन्यासं शंससि पुन
रनन्तरमेव योगं शंससि उपदिशसि नहि परस्परयोर्मध्ये यत् श्रेयः श्रेष्ठं तदेकं
सुनिश्चितं यथा भवति तथा मे ब्रूहि । अनेन [illegible] एकं [illegible]
ब्रूहीति प्रश्ने भगवानाह संन्यास इति ॥१॥

[illegible]माली टीका

[illegible] ज्ञानकर्माधिकारं हि सम्यक् निर्णीय माधवः सं
न्यासं कर्मणां चापि पंचमे कथयन्निति । तत्र तृतीये ज्ञानानधिकृतस्य
कर्मावश्यकत्वात् तदधिकृतस्य लोकसंग्रहार्थं कर्मानुष्ठानमेव तत्त्वा
विदःऽप्यकर्तव्यमुक्तं ज्ञानिनः कर्माधिकारे निश्चिते प्रारब्धवशात् कर्मानु
ष्ठाने संन्यासो वेति चतुर्थे निर्णीतं तमेतं वेदानुवचनेन ब्राह्मणा विवि
दिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतेः सर्वं कर्माखिलं पार्थ ज्ञाने परि
समाप्यत इति भगवदुक्तेश्च ज्ञानार्थानि सर्वकर्माणि तथा कर्मसंन्या
सोऽपि ज्ञानार्थः श्रूयते तमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति शान्तो
दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत् त्यजतैव
हि तज्ज्ञेयं त्यक्तुः प्रत्यक् परं पदम् सत्यानृते सुखदुःखे वेदानिमं लोकमुं
च परित्यज्यात्मानमन्विच्छेदित्यादौ तत्रैकमेवाजेन निश्चेतुं संप्रति ज्ञा
नार्थत्वेन कर्मतत्त्यागयोर्विधानादनयोश्च विरुद्धयोर्युगपदनुष्ठानासं
भवात् मम किमिदानीमनुष्ठेयमिति संदिहानोऽर्जुनः पृच्छति सं
न्यासमिति हे कृष्ण समस्तानर्थविनाशक भक्तपापकर्षणेति वा एकं मां प्रति

नित्यादिकर्मणां संन्यासं त्यागं संन्यासमिव दर्शितमेव प्रज्ञानिनस्त्यादिकृत्यायो
गसंन्यस्तकर्माणमित्यादिगीतावाक्येनैव वा अनन्तरमेतं ब्राह्मणा इत्यादि
वाक्येन योगमातिष्ठोत्तिष्ठेत्यादिगीतवाक्येन वा कर्मानुष्ठानं संन्यासिकर्त
व्यमिति एकेन गृहस्थादिहृदयोरनुष्ठानासंभवान्न योर्मध्ये यदेकं श्रेयः प्रशस्त
तरं कर्मत्यागो वा तन्मे ब्रूहि सुनिश्चितं तत्र वन्तदनुष्ठानाय सुनिश्चितं यथा
थास्यात्तथा ब्रूहीति वा ।

ज्ञानवैजयन्तीटीका ।

एवमेकर्मणो ज्ञानाङ्गत्वेन प्राकेश्वरः फलमत्वेन न कर्तव्यं [illegible] कर्तव्यं
वेदस्य ॥ एवं तावद्द्वितीयेऽध्याये कर्मण्येवाधिकारस्ते इत्यादिना कर्मणः
कर्तव्यतामुक्त्वा पुनरेषा ब्राह्मी स्थितिरित्यनेन ज्ञानस्यापि कर्तव्यतामुक्त्वा त
तीयेऽपि कर्मणेव हि संसिद्धिमास्थिता जनकादयः लोककर्तव्य इति श्रुतिर्मा
लोकानकुर्यामित्यादिना सदाचारं दर्शयन् कर्मणः कर्तव्यतामभिधाय
पुनर्यस्त्वात्मरतिरेव स्यात्तस्य कार्यं न विद्यत इत्यादिना ज्ञानस्यापि कर्त
व्यतामुक्त्वा चतुर्थेऽपि कर्मणो ज्ञानाकारतामुभयोः स्वरूपभेदं च दर्शयन्
ज्ञानं प्रशस्य प्राधान्येन तदुक्त्वा पुनस्तस्मादज्ञानसंभूतं योगमातिष्ठोत्तिष्ठे
त्यनेन कर्मकर्तव्यतामुक्तमित्यनीमं तथा तज्ज्ञानस्य कर्मयोगस्य तत्प्रा
प्युपायत्वे कृत्वा तु संधानं प्रकारं तज्ज्ञानस्य स्वरूपं चोच्यते तत्रोक्तरीत्या
भाभ्यां कर्मज्ञानाभ्यां पृष्ठो भगवद्भक्तिनिष्ठामुपाश्रित्य न स्वरूपं ववधारितम
नाभगवंतं समारभ्य पृच्छति सम संन्यासमिति हे कृष्ण हे मदानंद कर्मणां
तिरविलेन्द्रियव्यापाररूपाणां संन्यासं सर्वेन्द्रियक्रियोपरतिरूपं ज्ञानयोगं
पुनः प्रशंससि पुनश्च योगं सकलेन्द्रियव्यापाररूपं कर्मयोगं प्रशंससि पुनर्योज्ञान
कर्मणोर्मध्ये एकं श्रेयः आत्मयाथात्म्यस्वरूपप्राप्तिसाधनं यत्तन्मे ब्रूहि सुनिश्चितं
निर्णयपूर्वकमेकं ज्ञानं कर्म वा मे मम संभवादिव दत्त्वा विनयः कर्मयो
गमेव कार्यः क्वचिज्ज्ञानयोगमेव कार्यः ज्ञानाधिकारोऽपि कर्म कुर्या
देकस्य मम तयोरुभयोरुत्तमः प्रकारो यो विवक्षितस्तत्र विवेचयितुमर्थ
मज्ञानयोर्यदुपायकर्तृत्वात्तं कथमनुपपद्यते तयोर्मध्ये यस्मिन् ममाधिका
रोऽस्ति तदेव ब्रूहीत्यभिप्रायः कृष्णेति संबोधनेन कृषिर्भूवाचकः णश्च निर्वृत्तिवाचकः

(margin) ज्ञा॰ २४

परंब्रह्मसत्यमित्यभिधीयतइति श्रुत्युक्तनित्यासहितानंदात्मकः परंब्रह्मत्व
परत्वमसितत्ववेदवाक्यैरभिधीयते ममसंदेहान्नन्नश्यन्नहिंमन्नमानोमायापरीनःको
पीडनाशीतिस्तुविते १॥

मधुसूदनीटीका

अध्यायाभ्यामुक्तयोर्द्वाभ्यांनिर्णयः कर्मबोधयोः कर्मतत्त्यागयोर्द्वाभ्यांनिर्णी
यः क्रियतेधुना तृतीयेध्याये ज्यायसीचेत्कर्मणस्तइत्यादिनाऽर्जुनेनपृष्टो
भगवान्ज्ञानकर्मणोर्विकल्पसमुच्चयासंभवेनाधिकारिभेदव्यवस्थया लो
केस्मिन्द्विविधानिष्ठापुराप्रोक्तामयेत्यादिनानिर्णयंकृतवान् तथाचा
ज्ञाधिकारिकंकर्मनज्ञानेनसहसमुच्चीयते तेजस्तिमिरयोरिवयुगपदसं
भवात् कर्माधिकारहेतुभेदबुद्ध्युपमर्दकत्वेनज्ञानस्यतद्विरोधित्वात् नापि
विकल्प्यतेएककार्यत्वाभावात् ज्ञानकार्यस्याज्ञाननाशस्यकर्मणाकर्तुम
शक्यत्वात् तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेयनायेतिश्रुतेः
ज्ञानेजातेतत्कार्येनापेक्षतएवेत्युक्तंयावानर्थउदपानइत्यत्र तथाचा
ज्ञानिनःकर्मानधिकारेनिश्चितेप्रारब्धकर्मवशाद्बुद्ध्याचेष्टारूपेणतदनु
ष्ठानंवासर्वकर्मसंन्यासोवेतिनिर्विवादंचतत्रेयंनिर्णीते अज्ञेनतुअंतःक
रणशुद्धिद्वाराज्ञानोत्पत्तयेकर्माण्यनुष्ठेयानि तमेतंवेदानुवचनेनब्राह्म
णाविविदिषन्तियज्ञेनदानेनतपसानाशकेनेतिश्रुतेः सर्वंकर्माखि
लंपार्थज्ञानेपरिसमाप्यतइतिभगवद्वचनाच्च एवंसर्वकर्माणिज्ञाना
र्थानितथासर्वकर्मसंन्यासोपिज्ञानार्थःश्रूयते एतमेवप्रव्राजिनोलोक
मिच्छंतःप्रव्रजंति शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मा
नंपश्येत् त्यजतैवहितज्ज्ञेयंत्यक्तुःप्रत्यक्परंपदं सत्यानृतेसुखदुःखेवेदा
निमंलोकममुंचपरित्यज्यात्मानमन्विच्छेदित्यादौ तत्रकर्मतत्त्यागयोरा
राडुपकारकसंनिपत्योपकारकयोःप्रयाजावघातयोरिवसमुच्चयोन
संभवतिविरुद्धत्वेनयौगपद्याभावात् नापिकर्मतत्त्यागयोरात्मज्ञान
मात्रफलत्वेनैककार्यत्वादतिरात्रषोडशिग्रहणाग्रहणयोरिववि
कल्पःस्याद्द्वारभेदेन एककार्यत्वाभावात् कर्मणोहिपापक्षयरूपमदृष्टमे
वद्वारं संन्यासस्यतुसर्वविक्षेपाभावेनविचारावसरदानरूपंदृष्टमेवद्वा

रं नियमात् सर्वं तु हि समवाप्यते तावद्बोधनादाविवनप्रयोजकेन तथा चादृष्टार्थ दृष्टा
र्थयोरारादुपकारकसंनिपत्योपकारकयोरेकप्रधानार्थतेपि विविक्तत्वाना
त्वेव यथा ज्ञानवत्तानादीनामपि तत्प्रसंगात्तस्मात्क्रमेणोभयमप्यनुष्ठेयं
तत्रापि संन्यासानंतरं कर्मानुष्ठाने वैतन्नदापरित्यक्तत्वादाश्रमस्वीकारोगारू
ढपतितत्वात् कर्मानधिकारित्वं प्राक्तनसंन्यासमवैयर्थ्यं च तस्यादृष्टार्थः
त्वाभावात् प्रथमकृतसंन्यासेनैव ज्ञानाधिकारलाभे तदुत्तरकाले कर्मानु
ष्ठानवैयर्थ्यं च तस्मादादौ भगवदर्पणबुद्ध्या निष्कामकर्मानुष्ठानादंतःक
रणशुद्धौ तीव्रेण वैराग्येण विविदिषायां जातायां सर्वकर्मसंन्यासः श्रवणा
मननादिरूपवेदांतवाक्यविचाराय कर्तव्य इति भगवतो मतं तथा चोक्तं
नकर्मणामनारंभान्नैष्कर्म्यं पुरुषोश्नुत इति वक्ष्यते च आरुरुक्षोर्मुने
र्योगं कर्म कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यते इति योगो
ऽत्र तीव्रवैराग्यपूर्विका विविदिषा तदुक्तं वार्तिककारैः प्रत्यग्विविदिषासि
द्ध्यै वेदानुवचनादयः ब्रह्मावाप्त्यै तु तत्त्यागः ईप्संतीति श्रुतेर्बलादिति स्मृ
तिश्च कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः कषाये कर्मभिः पक्वे त
तो ज्ञानं प्रवर्तते मोक्षधर्मे च कषायं पाचयित्वाशु श्रेणीस्थानेषु च त्रिषु प्र
व्रजेच्च परं स्थानं पारिव्राज्यमनुत्तमं भावितैः करणैश्चायं बहुसंसारयोनि
षु आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे तमासाद्य तु मुक्तस्य दृष्टा
र्थस्य विपश्चितः त्रिष्वाश्रमेषु कोन्वर्थो भवेत्परमभीप्सतः इति मोक्षे वै
राग्यतेन क्रमाक्रमसंन्यासौ द्वावपि दर्शितौ तथा च श्रुतिः ब्रह्मचर्यं
समाप्य गृही भवेद्गृहाद्वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति त

वनीभूत्वा
दिवेतरथा
दिवप्रव्र

स्मादरक्तस्याविरक्तत्वदशायां कर्मानुष्ठानमेव तस्यैव विरक्तत्वदशायां
संन्यासः श्रवणाद्यवसरदानेन ज्ञानार्थ इति दर्शयितुं भेदेनात्र मधिकृत्यैव कर्म
तत्यागौ भगवतानु पंचमषष्ठाध्याययोर्वक्ष्येते विरक्तसंन्यासस्य ज्ञानबलाद्दर्शयि
तु एवेति संदेहाभावात् न विचार्यते तत्रैकमेव जिज्ञासमनं प्रतिज्ञानार्थतेन
कर्मतत्यागयोर्विधानान्नयोश्च विरुद्धयोर्युगपदनुष्ठानासंभवान्मयापि
ज्ञातत्वात्किमिदानीमनुष्ठेयमिति संदेहानो देहक्रमस्वरदानंतरपभक्तं अः व
कर्मणोनिवाकर्मणां यावज्जीवादिश्रुतिविहितानां नित्यानां नैमित्तिका

अर्जुन उवाच

गी॰ टी॰ ८॰

18

नांच सन्यासं त्यागं जिज्ञासमानः प्रतिकथयसि वेदनावेन पुनस्तद्धि कर्त्तव्यो
गं च कर्मानुष्ठानरूपं मन्यसे एतमेव प्रश्नाभिनेता लोकमिकंतः प्रश्नं जति त
मेतं वेदान्तवचनेन ज्ञातुमिच्छामि विविदिषंति यज्ञेनादिवाक्यद्वयेन निराशी
र्यतचित्तात्मा त्यक्तसर्वपरिग्रहः शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं
छित्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारतेति गीतावाक्यद्वयेन वा नत्रैकम
न्यप्रतिकर्मनत्यागयोर्विधानात्फलापद्भयादनुष्ठानासंभवात् एतयोः क
र्मतत्यागयोर्मध्ये यदेकं श्रेयः प्रशस्यतरं मन्यसे कर्म वा तत्त्यागं वा तन्मे ब
हि हि निश्चितं तव मतमनुष्ठानाय १ ॥

[illegible]नंदीटीका

ॐ श्रियो वासं हेदावनकृतनिवासं क्षतिपदे कलावास्यावासं स्तवनरसा
स्वावासजलधिं महोल्लासोल्लासं समजनहृदि वासं गतनिधिं प्रतिष्ठावासं वे
देनिरवधिविलासं मधुरिपुं ‖ अध्यायाभ्यां कृताभ्यां निर्णयः कर्मवा
धयोः कर्मतत्यागयोर्द्वाभ्यां निर्णयः क्रियतेधुना २ ततोय इति नाध्याये वि
भागः कर्मबाधयोः सत्ताधिकारिकं कर्म न सम्बध्यते धिया ३ एतस्य
रविकृत्तात्तेजस्तिमिरयोरिव एकार्थीभावतो नापि कर्मयोगो विकल्प्यते
धीकार्याज्ञानबाधादिकं वैशकोन कर्मणा नापतने समृत्यते ज्ञानेक
र्मफलं मनाक् ४ तथावज्ञानिनः कर्मानधिकारविनिश्चिते शास्त्रव
प्राप्तस्तस्य कर्मानुष्ठानमस्तु वा ५ कर्मत्यागोस्तु वेत्येवं चेतदर्थे निर्णयं क
नः वित्तशुद्ध्यात्मविज्ञानप्राप्तयेऽज्ञानिनः सदा ७ अनुष्ठेयानि कर्माणि न
तत्यागः प्रशस्यते सर्वकर्मपरित्यागो ज्ञानार्थः श्रूयते तथा ८ एवमेवेति वा
क्यादौ संन्यासोपि प्रशस्यते त्यजतैव हि तज्ज्ञेयं समकुः अन्यकारंपदं ९ प्रया
जादिवदेवेदं कर्माङ्गोपकारकं अवघातवत्त्यागः सन्निपत्योपकारकः
तयोः समबलयोर्नास्ति विकल्पेन सर्वथा नचानयोर्विकल्पोस्तु ज्ञानमात्र
फलत्वतः ११ द्वारभेदेन चैकार्थ्यभावात्तच निरूप्यते कर्मणोचलयाहुष्ठ
मेवद्वारं विनिश्चितं १२ संन्यासस्य तु विक्षेपाभावद्वारेण तद्यमतो दृढद्वारवे
मेवास्ति विकल्पो नास्य तत्त्वयोः १३ तस्माद्धि कर्मणोनन्तरं संन्यासानुष्ठेयमादरा
न् संन्यासानन्तरं कर्मानुष्ठानं नैव संभवि १४ त्यक्तस्य पुनरादाने मात्रुद्धया

तितोभवेत् आरूढो नैष्किंकं धर्मं यस्तस्य प्रव्यावते ऽधुनः १५ प्रायश्चित्तेन
पापनाशो येन शुद्धात्मनस्ततः तस्मादादावनुष्ठानात्कर्मणामीश्वरार्पणा
त् १६ चित्तशुद्ध्या समुत्तीव्रवैराग्येणाविवेकिनः जितात्मनायोगदृष्ट्या यस्तसं
न्यासः सर्वकर्मणां १७ श्रवणाद्यात्मवेदान्तविचाराय विधीयते इत्येवं नि
श्चितं भाति श्रीमद्भगवतो मतं जतो विनिश्चितं स्येवं श्रुत्वा वेदविदां गिरः प्र
त्यगविविदिषासिद्धै वेदान्तवचनादयः न्यास्तावाप्तैतत्त्यागशंसती निष्क्र
तेर्वलात् इत्युक्तं संप्रदायज्ञैर्वार्तिके श्रीसुरेश्वरैः १८ कषायपाकेन चापिताव
श्रेणीस्यात्तेषु च विशु प्रव्रजेत्तु परंस्यात्ते पाविज्ञासुमनुत्तमं २१ भाषितैः क
र्तोऽस्मात्येव कृतं संसारयोनिषु आसादयति शुद्धात्मा मोक्षं वा मनुष्यमात्रमे
तन्मासाद्यतस्तक्रस्य स्पृष्टार्थस्य विपश्चितः त्रिष्वाश्रमेषु कोऽन्वर्थो भवेत्याम
भीप्सिते २२ इत्येवमादयो मैत्र्या आसेनोक्ता महर्षिणा तस्माद्वैराग्यपर्यन्तं
कर्मानुष्ठानमुच्यते २४ विरक्तताद्दशायां तु संन्यासो ज्ञानसाधनं नतोऽत्र
मपि क्रतेष्वेव कर्मत्यागयोर्विधिः २५ सम्यक्तत्त्वविदां नास्ति चोदना कापि वै
दिकी लौकिकी वा यतस्तस्य स्तात्कृत्यतया हरिः कृत्याभावं स्वयं प्रैवमा
वदन्निगमावधि विद्वत्संन्यास आत्मज्ञे सिद्धरूपवाध्यतो यतः संदेहाभावत
स्तस्मात्तचनात्र विचार्यते नत्वेकमेव जिज्ञासुमनुत्तं प्रत्यात्मलक्ष्य ये २८ क
र्मत्यागयोः प्राप्ते विधानात्तत्त्ववाञ्छनः विरुद्धयोरनुष्ठानं युगपन्नैव सं
भवेत् २९ मया जिज्ञासुना तेदानीं किमनुष्ठेयमादरात् इति संशयवानेव सम्भा
वश्रीहरिं प्रति ३० यावज्जीवादि वेदोक्तकर्मणां त्यागमिच्छति जिज्ञासुक
थयस्तत्तत्प्रति वेदगिरा स्वयं ३१ नहि कर्तुं द्वयं तः कर्मानुष्ठानं च प्रशोमति प
तमेवेति वेदेन निराशीरिति च स्वयं ३२ तमेतमिति वेदेन ज्ञातुकर्मेति च स्व
यं तयोरेकेन युगपत्करणाद्द्वेधद्वयोः ३३ कर्मतत्त्यागयोर्मध्ये यदेकं मम
सेवकं तन्मस्त्वंनिश्चितं त्वद्य मदनुष्ठानाय तन्मतं ३४ सदानंदस्वरूपोऽस्मि
क्तसमक्तानि कर्षेण संक्षयसंशयार्तिमेति जिज्ञानंदेन पश्यमो ३५ १ ॥

[illegible] टीका

तृतीयेऽध्याये लोकेस्मिन् द्विविधा निष्ठेति विभिन्नाधिकारिकं निष्ठाद्वयं प्र
स्तुत्य कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुत इत्यादिना कर्मनिष्ठायाः ज्ञा
ननिष्ठांगत्वेन प्रयपमानिर्बन्धेनानुष्ठेयत्वमुक्तं कर्मणो वाधिकार स्तेष्वा

गी॰
टी॰
पं॰

९

दिना चतुर्थे तत्त्वज्ञस्य प्रदर्शितैः कृतमपि कर्माकृतमेव भवति ज्ञानेन न क
रिकाद्विधानात् अतस्तेह्याचेष्टावत्कर्म वा कर्तव्यं संन्यासो वा कर्तव्य इत्यना
स्पष्टाभेदं अथेदानीं पंचमषष्ठयोरज्ञानिना ज्ञानार्थिना वैराग्यात्स्वतः आ
क्रमेणैवानुष्ठेयं संपन्ने तु वैराग्ये दृष्टविक्षेपनिवृत्त्यर्थं कर्मसंन्यासं कृत्वा ज्ञा
नार्थं योगोऽनुष्ठेय इत्युच्यते तत्र च चतुर्थे सकर्मसर्वपरिग्रह इति संन्यासः यो
गमातिष्ठेति कर्मयोगश्चैकं प्रति विहितः न चैतयोः स्थितिगतिवद्युगा
पदेकेन मयानुष्ठानं कर्तुं शक्यते परस्परविरुद्धत्वादिति मन्वानोऽर्जुन उवा
च संन्यासमिति हे कृष्ण पापकर्षण मे मह्यं ज्ञानार्थिने संन्यासं कर्मयोगं चे
ति द्वयं परस्परविरुद्धं कथं प्रशंससि कथयसि पुनर्योगमित्यनेन प्रागपि त्वया वेद
कर्त्रोर्द्वयं विहितमस्तीति गम्यते तथा च श्रुतिस्मृती भवतः एतमेव प्र
व्राजिनो लोकमिच्छन्तः प्रव्रजन्ति संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्र
व्रजन्त्यकृतोद्वाहाः परं वैराग्यमास्थिताः इति च तथा तमेतं वेदानुवचनेन ब्रा
ह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति मद्र्यायत्नैः स्मयते स्वब्र
ह्मलीयं क्रियते तत्तु रीतिश्च ज्ञानी ब्रह्मदर्शनयोग्यः अतः एतयोः श्रुतिविहित
तेन प्रशस्तयोर्मध्ये एकं श्रेयः प्रशस्ततरं यत्तन्मे सुनिश्चितं ब्रूहीति प्रश्नः १

[illegible]री टीका

अथैवं सांख्ययोगयोः पूर्वाध्यायद्वये नार्थेऽवधारिते विफलस्पृहां विना
ज्ञानेन समुक्षिप्ते नित्यनैमित्तिककर्मानुष्ठानं श्रेयस्साधनं यदुपदिष्टं त
स्य चित्तवृत्तिनिरोधं विना दुष्करत्वेन तदुपायभूतस्याभ्यन्तरस्य सं[illegible]यम
योगस्य समनन्तराध्यायाल्लेतत्स्वयं योगसंसिद्धः कालेनात्मनि वि
न्दतीति भगवतायमुद्देशः कृतस्तत्र योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंश
यमिति पुनरपि समुपदिष्टयोर्योगसंन्यासशब्दयोस्तात्पर्यानवधारणा
दतस्माच्छ्रद्दधानस्य संशयात्मा विनश्यतीति मत्वा संन्यासोचितनिश्चयार्थमर्
जुन उवाच योगसंन्यस्तकर्माणमित्युक्त्वा पुनर्योगमातिष्ठोत्तिष्ठेति शास
सि तदेतयोः कर्मसंन्यासकर्मयोगयोर्मध्ये श्रेयः श्रेयानेकस्तं सुनिश्चितं
ह्येवं निश्चितमपि पुनरुपदेशेन संशयितस्य मे सुस्पष्टं निःसन्धीकृत्य ब्रूहि १

रामकण्ठी टीका

ॐ अथ द्वितीयाध्यायपरिसमाप्तौ बुद्धिप्रशंसावाक्यानि श्राक कर्मयोग
वचनानि श्रुत्वा तेषां च परस्परविरुद्धत्वं मन्यमानेनार्जुनेन ॥ ज्यायसी चेत्क
र्मणस्ते मता बुद्धिर्जनार्दनेत्यादिना प्रश्नः कृतोऽभूत् स सम्यग्वता यद्यपि
निर्णीत एव तृतीयेन तथापि चतुर्थाध्यायपरिसमाप्तौ योगसंन्यस्तकर्माणं
ज्ञानसंछिन्नसंशयमिति अत्र योगसंन्यासशब्दौ श्रुत्वा संन्यासयोगमन्यमा
नः पुनरुत्पन्नसंशयोऽर्जुन उवाच ॥ हे कृष्ण कर्मणां त्यागं प्रशंससि स्तोविश
नस्व तेषामेव योगमनुष्ठानेन स्वीकारं स्तोषि तदेतयोर्विरुद्धयोः कर्मत्याग
स्वीकारयोः संन्यासयोगशब्देनोक्तयोर्योगपद्येनानुष्ठानं तावन्न संभवति
अतो द्वयोर्मध्यादेकं संन्यासो वा योगो वा य एव श्रेयान् प्रशस्यतरस्तन्मे निः
मनेहतया ब्रूहि [illegible]
[illegible] ॥

लासिकी [illegible] टीका

एवं यस्त्वात्मरतिरेव स्यादित्यादिना पूर्वोक्तं कर्मणां नावश्यकत्वं संन्या
सशास्त्रार्थं मत्वा नः तथा योगमास्थेति तमेवानुसन्धानो योगमाति
ष्ठेति कर्मयोगं च उक्तवान् तदेतयोरेकानुष्ठानविषययोः संन्यासकर्म
योगयोः परस्परं विरोधं मन्यमानोऽतएव सन्दिग्धचेता अर्जुन उवाच संन्यासेति
हे कृष्ण कर्मणां संन्यासं संन्यासं यस्त्वात्मरतिरेव स्यादित्या [illegible] दिना वद
न्तेषां योगमनुष्ठानेन स्वीकारं च योगमातिष्ठेत्यादिना कथयसि तदे
तयोः कर्मसंन्यासयोगयोः विरुद्धस्वभावयोरेकस्य योगपद्येनानुष्ठा
नासंभवः अतएतयोर्मध्याद्यदेवानुष्ठेयतया श्रेयः प्रशस्यतरं तथाऽस्त्व
निश्चितं तवाभिप्रेतं तन्मे ब्रूहि सुपरिस्फुटं यस्त्वलब्धात्मबोधमात्रस्य ज्ञानयो
गाधिरोहसिद्धये यावद्विकल्पसंभवं कर्मयोगोऽवश्यानुष्ठेयः स एव प्रवर्तते
तथापि स्फुटः [illegible]
[illegible] ॥ १ ॥

पैशाली टीका

कर्मण्येव कर्मयुः एष्वे ज्ञानाग्निदग्धकर्माणां शारीरं केवलं कर्मेथ
टब्धात्मलाभसन्तुष्टा वस्त्रार्थिना सहविरित्यादिवचनैः सर्वकर्मसंन्या

गी॰
पं॰
टी॰

समञ्जसाकिंत्वनेनसंशयंयोगमातिष्ठेत्येतेनवचनेनकर्मयोगमवो
चत् उभयोश्च स्थितिगतिवत् परस्परविरुद्धयोः एकेन युगपदनु
ष्ठातुमशक्यत्वात् कालभेदेनानुष्ठानविधानाभावादिति अस्मा
त्कारणात्कर्तव्यताप्राप्तोपकस्यप्रश्नस्यानंतरस्यवक्तुमुत्कतया अर्जुनउवाच
संन्यासमिति हे कृष्ण कर्मणां संन्यासं शास्त्रीयाणां कर्मणां त्यागं
पुनः योगं तेषां कर्मणां ईश्वरार्थकर्तव्यतां शंससि कथयसि एतयो
र्यदेकं श्रेयः तन्मे मम सुनिश्चितं तत्त्वाभिप्रेतं ब्रूहि । [illegible]
[illegible] १ ॥

॥ [illegible]वीरसमिद्धायिनी ॥

श्रीकार्तवीर्यार्जुनाय नमः ॥ अथ योगसंन्यस्तकर्माणमित्यत्र
प्राप्ताख्यातार्थानुसारेण विहितनिषिद्धत्वप्रकारद्वयभिन्नकर्म
प्रतियोगिकौ योगसंन्यासशब्दौ भगवतोक्तौ श्रुत्वा ततोऽन्यथैवत
त्प्रतिपत्तेरेकेषामेव तेषां परस्परविरुद्धत्वाद्युगपत्तदसंभवं मत्वा
संजातसंशयोऽर्जुन उवाच संन्यासमिति हे कृष्ण कर्मणां प्रारभ्यमा
णानां संन्यासं त्यागं पुनस्तेषामेव योगमनुष्ठानेन स्वीकारं शंससि
स्तुतिसर्वकं वदसि न चैतौ युगपत्संभवतः परस्परविरुद्धत्वात्
ततश्चैतयोः संन्यासयोगाभिधेययोस्त्यागस्वीकारयोर्मध्याद्यदेकं
त्यागलक्षणं स्वीकारलक्षणं वा श्रेयः प्रशस्यतरं कल्याणसाध
नं च भवेत् तदेवं सुनिश्चितं निःसंदेहं तया मे मह्यं ब्रूहि १ ॥

[illegible]नुभाष्य

तृतीयाध्यायोक्तमेव कर्मयोगं प्रपंचयत्यनेनाध्यायेन य
दृच्छालाभसंतुष्ट इत्यादिना संन्यासं आरुरुक्षोः कर्मेत्यादिना
कर्मयोगं च नियमनादिना सकललोकेषु रागात्मकस्मः त
श्लोके यतः कर्षति देवेषा नियम्य सकलं जगत् अतो वद
ति ग्रनयः कृष्णं त्वां ब्रह्मवादिनः अतिमहत्कर्मणि संन्यासशब्दे

र्थं भगवानेव वक्ष्यति श्रयं प्रश्नाशयः यदि संन्यासः श्रे
योधिकः स्यात्तर्हि संन्यासस्येवाद्विरीयिश्रुद्धमिति नायं
संन्यासो यत्याश्रमः इह त्यागात्संन्यासान्मनसे नेव-
गरीयसीति वचनात् तानि वा एतान्यवराणि तपांसि
न्यास एवात्यरेचयदिति च संन्यासस्तु वरीयो योनिष्क्रि
यारूपः सयमेकः न तस्मादुत्तमो धर्मो लोके कश्चन वि
द्यते न ह्रक्रोपि दिय ऋच्छ्रेन हृद्दस्यो न यामिकः सद्भक्ति
श्रविरक्तिस्तदधिकारो निरूप्यते यदाधिकारो भवति ब्र
ह्मचर्यपि तद्भजेत् इति नारदीये ब्रह्मचर्यादेव प्रव्रजेद्यद
हरेव विरजेदिति च संन्यासबहिरीये वै प्रीतिर्मम गरीयसी
येषामत्राधिकारो न तेषां कर्मेति निश्चयः इत्यादेश्च वाक्य ॥
अतो नाश्रमः संन्यास उक्तः संन्यासपाहार्थमाह ॥ १ ॥

11

भाषा अनुवाद

कर्मयोग औसंन्यास योगमे अर्जुन कोसंशय निवारन करिके अव जि तेंद्रियों कीमाहात्म्यताश्रीभगवान श्रीमद्भगवद्गीता के पंचमे अध्याय मे कहैंगे अज्ञान से उत्पन्न भई जो संशय तिस को ज्ञान खड्ग से छेदन करिके निष्काम कर्मयोग करो यह जो भगवान ने पुनर्वार कर्म करने को कहा तो पूर्वापर करि आगु पीछु जो कर्मत्याग औ कर्म करने को भगवानकी आज्ञा तिस को विचारतेहुये अर्जुन क हते हैं कि हे कृष्ण २ अध्याय के १७ श्लोक मे जो आपने कहा कि यस्त्वात्मरतिरेव स्यात् और ४ अध्याय के ३३ श्लोकादिसे कहा कि सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते यह तत्त्वज्ञानी को सर्व क र्म का त्यागरूप संन्यास ही कहा और ४ अध्याय के ४२ श्लोक मे। तस्मादज्ञानसंभूतं इत्यादि ज्ञानरूप असि से संशय छेदन करिके उठो और युद्ध करो यह कहि फेरि कर्मयोग को आज्ञा देते हैं परन्तु ये दोनो परस्पर विरुद्ध हैं अर्थात् कर्म का करना और छोड़ना यह ए क पुरुष को एक ही काल मे असंभव है सो हे कृष्ण संन्यास अथ वा कर्मयोग इन दोनो मे जो करने सेहम कृतार्थ होय सोएक प्र कार निश्चय करिके कहो और कभी संन्यास कभूं कर्मयोग कहि कहि हमे सन्देह मे वार वार न डालो १

दोहा

कर्मत्याग संन्यास अरु कहो कृस्न फिर योग दोनो मेजो सुभ द मोहि निश्चय कहो सुभोग १॥

12

श्रीभगवानुवाच संन्यासः कर्मयोगश्च निःश्रेयस
करावुभौ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशि
ष्यते २॥

शांकरभाष्यं

स्वाभिप्रायमाचक्षाणो निर्णयाय श्रीभगवानुवाच संन्यास इति संन्यासः
कर्मपरित्यागः कर्मयोगश्च तेषामनुष्ठानं तावुभावपि निःश्रेयसकरौ
निःश्रेयसं मोक्षं कुर्वाते ज्ञानोत्पत्तिहेतुत्वेन उभौ यद्यपि निःश्रेयसकरौ
तथापि तयोस्तु निःश्रेयसहेत्वोः कर्मसंन्यासात् केवलात् कर्मयोगो
विशिष्यते इति कर्मयोगं स्तौति २॥

आनंदगिरिकृतटीका

प्रश्नमेवमुत्थाप्य प्रतिवचनमुत्थापयति स्वाभिप्रायमिति निर्णयाय न
तु रेणापरस्य संप्रायनिवृत्त्यर्थमित्यर्थः एवं प्रश्ने प्रवृत्ते कर्मयोगस्य सौक
र्यमभिप्रेत्य प्रश्नानन्तरमभिधित्सं भगवान् प्रतिवचनं किमुक्तवानित्या
शंक्याह संन्यास इति उभयोरपि तुल्यत्वशंकां वारयति तयोस्त्विति कथंत
र्हि ज्ञानस्यैव मोक्षोपायत्वं विवक्ष्यते तत्राह ज्ञानोत्पत्तीति तर्हि द्वयोरपि प्रश
स्यत्वमप्रशस्यत्वं वा तुल्यमित्याशंक्याह उभाविति ज्ञानसहायस्य कर्मसं
न्यासस्य कर्मयोगापेक्षया विशिष्टत्वविवक्षया विशिनष्टि केवलादिति २

स्वामिकृतटीका

अत्रोत्तरं श्रीभगवानुवाच संन्यास इति अयं भावः नहि वेदान्तवेद्यात्मत
त्त्वविदं प्रति कर्मयोगमहं ब्रवीमि यतः पूर्वोक्तेन संन्यासेन विरोधः स्यात्
अपि तु देहात्माभिमानिनं त्वां बन्धुवधादिनिमित्तशोकमोहादिकृतमेनं सं
न्यासं देहात्मविवेकज्ञानाभिनाच्छादितं परमात्मज्ञानोपायभूतं कर्मयोगम
नुतिष्ठेति ब्रवीमि कर्मयोगेन शुद्धचित्तस्यात्मतत्त्वज्ञाने जाते सति तत्प
रिपाकार्थं ज्ञाननिष्ठांगत्वेन संन्यासः पूर्वमुक्तः एवं सत्यंगप्रधानयोर्वि
कल्पायोगात् संन्यासः कर्मयोगश्चेत्येतावुभावपि भूमिकाभेदेन समुच्च
ितावेव निःश्रेयसं साधयतः तथापि तयोर्मध्ये कर्मसंन्यासात्सकाशात्क
र्मयोगो विशि[illegible]ष्टो भवति २॥

गी. टी. ५

13

पैशाचभाष्यं

भगवानर्जुनस्याभिप्रायं विदित्वानुवाच संन्यासः कर्मयोगः श्रेयान् कर्मणां ज्ञानफलकत्वेन विसृष्टं विधानात्त्वं कर्मणां तमभ्यर्च्य सिद्धिं विंदति मानव इति २॥

रामानुजभाष्यं

संन्यासः ज्ञानयोगः कर्मयोगश्च ज्ञानयोगशक्तस्याप्युभौ निरपेक्षौ निःश्रेयसकरौ तयोस्तु कर्मसंन्यासात् ज्ञानयोगात् कर्मयोग एव विशिष्यते २

अभिनवगुप्तकृतटीका

तावेकोऽभिहितोऽपि तदुभौ संमिलितौ निःश्रेयसे दत्तः योगेन विना संन्यासो न संभवतीति योगस्य विशेषः २॥

श्रेयोभयोरपि एकं ब्रूहि त्वं एकं श्रे

परमार्थप्रपा टीका

यो ब्रूहीति प्रश्ने भगवानाह संन्यास इति

संन्यासः कर्मयोगश्चेतावुभावपि कामभेदेन निःश्रेयसकरौ भवतः नह्येकं प्रत्युभयोपदेशः प्रतीयते न सात्मतत्त्वं प्रति कर्मयोगोपदेशः किंतु देहात्माभिमानिने भवादृशाय निमित्तशोकाकुलं प्रति योगमाविष्टेति ब्रवीमि कर्मयोगेन शुद्धचित्तस्यात्मतत्त्वज्ञानेन सति कर्मसंन्यासः संभवति एवमुभावपि भूमिकाभेदेन निःश्रेयससाधनमस्ति तावेव तथापि तयोर्मध्ये प्रस्तुतकर्मसंन्यासात्सकाशात् कर्मयोगो विशिष्यते विशिष्टो भवति

वनमाली टीका

संन्यासः कर्मयोगश्चोभौ मोक्षप्रदौ निःश्रेयसकरौ एकैकेनैवावस्थाभेदेनानुष्ठेयौ तयोः कर्मसंन्यासात् ज्ञानेन प्रकृष्टात् कृतात् फलेच्छुवियायत्कर्मयोगो विशिष्यते २॥

ऊकमवैजयन्ती

एवमर्जुनेन पृष्टः सर्वज्ञो देवकीनन्दनो भगवांस्तदुत्तरमुवाच संन्यास इति संन्यासः कर्मसंन्यासो ज्ञानयोग इत्यर्थः चशब्दः कर्मयोगः उभौ ज्ञानकर्मयोगौ ज्ञाननिष्ठस्यापि ममतौ निःश्रेयसकरौ मोक्षकरौ भवतः तयोर्मध्ये तथापि ज्ञानकर्मणोर्मध्ये कर्मसंन्यासात् ज्ञानयोगात् कर्मयोगः कर्मकरणमेव विशिष्यते विशेषो भवतीत्यर्थः ज्ञानयोगात् कर्मयोगस्यातिशयं तस्मात् कर्मकरणमप्रयोजकं तत्सर्वमेवाश्रमकरणाच्छुद्धं ज्ञानयोगापि ज्ञानरहितं चित्तशोधनिवारणार्थं च फलाद्यसंधानरहितं सा

नगर्भकं सदाचारयनलक्षणं स्ववर्णाश्रमोचितं नित्यनैमित्यादिकं कर्म
कर्तव्यमेव एवंभूतस्य कर्मणोस्तेन ज्ञप्तिमिरादिवज्ज्ञानविनाभावात्स्वस्य तत्
रस्यज्ञानसहायत्वमेव स्यादिति ध्वनितम् २॥ रोधि

+एवमर्जुनस्य प्रश्नेन उत्तरं॥

मधुसूदनीटीका

निःश्रेयसकरौ ज्ञानोत्पत्तिहेतुत्वेन मोक्षोपयोगिनौ तयोस्तु कर्मसंन्या
सादज्ञानिकृतात्कर्मयोगो विशिष्यते श्रेयान्ज्ञानसंपादकत्वेन २
[illegible]

सदानंदीटीका

एवं प्रश्नेऽर्जुनस्योत्तरं भगवानुवाच निःश्रेयसकरौ कर्मसंन्यासोऽज्ञाति
संमतो १ मोक्षोपयोगिनौ ज्ञानोत्पत्तिहेतुतयोभौ तयोस्तु कर्मसं
न्यासाद्दुष्कृत्वात्कत्वात् २ शुद्धिसंपादकत्वेन कर्मयोगो विशिष्यते

नीलकंठीटीका

अस्योत्तरं भगवानुवाच संन्यास इति निःश्रेयसकरौ ज्ञानोत्पत्तिहेतुत
या तथापि कर्मसंन्यासात् अविरक्तकृतात्कर्मयोग एव विशिष्यते चित्त
शुद्धिद्वारा वैराग्यादिहेतुत्वात् २॥

आनंदीटीका

यद्यपि न कर्मणामनारम्भादित्यत्र त्यागेनैके नामृतत्वमानशुरित्यादिश्रु
त्यर्थानुसारं केवलज्ञानिभिः कर्मसंन्यासो निःश्रेयसकरः प्रोक्तः तमे
तमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा
नाशकेनेति कर्मयोग एव केवलकर्मिष्ठैश्च निःश्रेयसकरः प्रोक्तः
तथापि विचार्यमाणे कर्मसंन्यासात्कर्मयोगो विशिष्यते कर्मणां सन्न्या
से हि केवलं ज्ञानमनुष्ठेयं तत्र ततो भूय इव ते तमो य उ विद्यायां रता इति
प्रत्यवायश्रवणात् त्रिविधम् विद्यां चाविद्यां च यस्तद्वेदोभयं सहेति श्रुति
सिद्धादुभयोस्समुच्चयात्कर्मयोगो विशेषसिद्ध एव २॥

अथ शाहःश्रुणु विशेषमात्रजुनितसंशय रामकंठीटीका अर्जुनस्य परिहर्तुं भगवानुवाच॥

सत्यं द्वावप्येतौ कर्मणां संन्यासयोगौ त्यागस्वीकारौ मितानुष्ठार्थपक्षपात
क्षीयमानापवर्गलक्षणाभ्युदयसंपादकौ भवतः यतः केवलज्ञानवादिनः
सर्वात्मना कर्मणां त्यागेनापवर्गमिच्छंति समुच्चयवादिनस्तु कर्मणा
मत्यागेनानुष्ठानेनेति द्वयोरपि फलश्रुतिरस्ति किं तु तयोः संन्यासयोगयो

गी
गे॰पं॰ १४

कर्मण्यात्सर्वस्मात्त्यागात्तमपेक्ष्य कर्मयोगो विहितकर्माचरणं विशिष्यते उक्तं वक्ष्यमाणाहेतुपर्यालोचनया प्रकाश्यते ... २ ॥

+कर्ममूलभूतविकल्पत्वेन ... लासिकी ... टीका येमेव संन्यासाधिकारमनया सेनोपगत

श्रीयेन उत्तरं श्रीभगवानुवाच+

वः समम्प्रयेसंन्यासः कर्मणामावश्यकतयाननुष्ठानं कर्मयोगाच्च कर्मणां योगः स्वस्वरूपमनवमर्षाविनाभावेनानुष्ठानम् एताद्भावपि निः श्रेयसकरौ मोक्षसाधकौ तद्व्यतिरेके किंतु तयोर्मध्ये कर्मसंन्यासात्म काशात्कर्मयोगो विशिष्यते योगेन विना संन्यासो न भवतीति वक्ष्यमाणा योपपत्त्या श्रेष्ठो भवति २ ... २ ॥

+स्वाभिप्रायमावेदयन्निर्णयाय श्रीभगवानुवाच

पैठोलीटीका

+संन्यासः इति संन्यासः कर्मणां त्यागः चपुनः कर्मयोगस्तेषां कर्मणामनुष्ठानमुभौ निःश्रेयसकरौ मोक्षसाधकौ तयोर्मध्ये पुनस्तयोः कर्मसंन्यासात् केवलाज्ज्ञानरहिताः कर्मत्यागात्कर्मयोगः ईश्वरार्थे कर्म विशिष्यते उत्कृष्टं भवति २ ॥

रसवीरसमिद्धोपिनी ॥

अत्र निश्चयं भगवानुवाच संन्यास इति अयमभिप्रायः एककर्मप्रतियोगिकावेककालीनौ च संन्यासयोगौ न मयोक्तौ किंतु प्रारभ्यमाण शुद्ध्यादिकर्मप्रतिरोधककण्टभीष्ममदं संख्ये इत्यादिरूपनिषिद्धमानसिककर्मप्रतियोगिकः संन्यासो निश्चयप्रयोजितप्रारंभपूर्वकालीनः प्रारभ्यमानस्वधर्मभूतशुद्ध्यादिविहितकर्मप्रतियोगिको योगश्च तत्समनंतरकालीन एवेति भिन्नप्रतियोगिकत्वात्पूर्वोत्तरकालीनत्वाच्च तयोः संभवे सिद्धे द्वावप्येतौ श्रेयस्करौ किंतु तयोस्त्यागस्वीकारयोः केवलयोर्मध्यात्कर्मणां प्राक्तनानां प्रारभ्यमाणविहितकर्मांतरायभूतानां मनःसंकल्पात्मकानां निषिद्धानां संन्यासस्त्यागस्तस्माद्धेतोरनंतरं वा यः कर्मयोगो विहितसमग्रकर्मानुष्ठानलक्षणः स विशिष्यते प्रशस्यतरो भवति भाविसमाप्तिमत्त्वात् उक्तलक्षणसंन्यासरहितेन हि प्रारब्धकर्म न समाप्यते ... प्रावर्तितहरणमपूर्वकर्मेति विहन्ते मध्ये भावित्वादिति एतेन च ... २ ॥

ऋग्भाष्य॥

२॥

15

भाषा अनुवाद

अर्जुन को इस प्रश्न का उत्तर श्रीभगवान कहते हैं कि हे अर्जुन
हम वेदान्ती तत्वज्ञानी के प्रति कर्मयोग करना नहीं कहते हैं क्यों
कि तत्वज्ञानी को कर्मत्याग के उपदेश से विरोध पड़ेगा परन्तु दे
ह आदि मे आत्मअभिमानी तुम कोजो बन्धुवध निमित्तक शोक
मोह से उत्पन्न संशय तिस को स्थूल शरीर औ आत्मा का विवेक
रूप ज्ञान खड्ग से छेदनके अनन्तर तत्वज्ञान उत्पन्न होनेका उपा
य रूप जो निष्काम कर्मयोग सोई अनुष्ठान करने को कहाहै देखो
निष्काम कर्म करने से चित्तशुद्ध होके तत्वज्ञान उत्पन्न होने पर ज्ञा
नके परिपाकार्थ ज्ञान निष्ठा का अङ्गभूत कर्मके त्याग को मैने
कहा है परन्तु ज्ञानमार्ग मे आरूढ़ पुरुष को कर्मका त्याग और
अनारूढ़ पुरुष को भगवदाराधन निःकाम कर्मयोग कहा सोई
कहते हैं कि संन्यास औ कर्मयोग ये दोनो निःश्रेयस मुक्ति के ।
करने वालेहैं परन्तु दोनोके बीच संन्याससे कर्मयोग ही अधिक
है जिस हेतु कर्मयोग सेज्ञान प्राप्त होके तब संन्यास अर्थात् क
र्मका त्याग विहित है और पहिले नहीं २॥

दोहा

संन्यास अरु कर्मयोग जो दै शुभदायक दोय तामे कर्मसंन्या
सते श्रेष्ठ कर्मयोग है सोय २॥

16

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति निर्द्वंद्वो
हि महाबाहो सुखं बंधात्प्रमुच्यते ३ ॥

शांकरभाष्यं

कस्मादित्याह ज्ञेयो ज्ञातव्यः स कर्मयोगी नित्यसंन्यासीति यो न द्वेष्टि किंचि
न्न कांक्षति दुःखसुखे तत्साधने चैवंविधो यः कर्मणि वर्तमानोपि स नित्य
संन्यासीति ज्ञातव्य इत्यर्थः निर्द्वंद्वो द्वंद्ववर्जितो हि यस्मान्महाबाहो सुखं बंधा
दनायासेन प्रमुच्यते ३ ॥

आनंदगिरिकृतटीका

कर्मस्विंबंधकारणं प्रसिद्धं तत् कथं निःश्रेयसकरं स्यादिति शंकते कस्मादिति
अकर्तात्मविज्ञानात् प्रागपि सर्वदा सो संन्यासी ज्ञेयो यो रागद्वेषौ क्वचिदपि
नकरोतीत्याह ज्ञेय इति यथानुष्ठीयमानानि कर्माणि संन्यासित्वेन निव
र्तितकृतानि चैव रागेंद्रियसंयमादीनि फलाभिसंधिरहितानि तथैवानभि
संहितफलानि नित्यनैमित्तिकानि योगिनमपि न निबध्नंति निवर्तयंति च सं
चितं दुरितमित्यभिप्रेत्याह निर्द्वंद्वो हीति कर्मयोगिनो नित्यसंन्यासित्वज्ञान
मत्वाज्ञानवान्मिथ्याज्ञानमित्याशंक्याह एवंविध इति कर्मिणोपि रागद्वे
षाभावेन संन्यासित्वं ज्ञातव्यमित्यर्थः रागद्वेषरहितस्यानायासेन बं
धसंसिद्धेस्तु प्रकृतस्य संन्यासित्वमित्याह निर्द्वंद्व इति ३ ॥

स्वामिकृतटीका

उत्तरत्वापिलायां संन्यासित्वेन कर्मयोगिनं स्तुवन्नुतस्य श्रेष्ठत्वं दर्शयति ज्ञे
यः स नित्येति रागद्वेषराहित्येन परमेश्वरार्थं कर्माणि योनुतिष्ठति स नित्यं
कर्मानुष्ठानकालेपि संन्यासीत्येव ज्ञेयः तत्र हेतुः निर्द्वंद्वो रागद्वेषादिद्वंद्वशू
न्यो हि शुद्धचित्तो ज्ञानद्वारा सुखमनायासेन बंधात् संसारात्प्रमुच्यते ३ ॥

पैशाचभाष्यं

कथं ज्ञेयो नित्य इति चेत् ज्ञेय इति ज्ञेयो बोद्धव्यः स नित्यसंन्यासी यो न द्वेष्टि न कां
क्षति कथमिति चेत् कामक्रोधादयो द्वंद्वास्तै रहितो निर्द्वंद्वः हि यस्मान्महा
बाहो सुखमक्लेशेन बंधात्संसारात्प्रमुच्यते मुक्तो भवति कर्मयोगी कृतस
कलकर्मसंन्यास एवेत्यभिप्रायः रागद्वेषवियोगात् ३ ॥

रामानुजभाष्यं

गी॰ टी॰ ५

17

कुतस्तत्राह ज्ञेय इति यः कर्मयोगी तदेतद्गतात्मा नु भवतन्न कामयति वि
कांकिमपि न कांक्षति तत एव किमपि न द्वेष्टि तत एव द्वंद्वसहस्स नित्यसंन्या
सी नित्यज्ञाननिष्ठ इति ज्ञेयः स हि सुकरकर्मयोगनिष्ठया सुखं बंधात्प्रमु
च्यते ३॥

अभिनवगुप्तकृतटीका

अतश्च स एव सार्वकालिकः संन्यासी येन मनसोऽभिलाषद्वेषौ संन्यस्तौ ।
यतो द्वंद्वेभ्यः क्रोधमोहादिभ्यो निष्क्रांता धीः स सुखं मुच्यत एव ३॥

परमार्थप्रपा

अथ कर्मजफलस्याभ्युदयरूपस्यानुष्ठानेन सहैव भवतीत्याह ज्ञेय इति ३ स पुरुषः
कर्म कुर्वन्नपि नित्यसंन्यासी ज्ञेयः स कैः यो न द्वेष्टि न कांक्षति रागद्वेषरहितो
न हातः कर्मयोगः स एव कर्मसंन्यासो भवितुमर्हति हि यस्मात्कारणान्नि
र्द्वंद्वः निर्गतानि द्वंद्वानि रागद्वेषसुखदुःखजयपराजयादीनि यस्मात्तथा
विधः सुखं यथा भवति तथा बंधाद्विमुच्यते यथाग्नस्पर्शेनेताग्रयमे शत्रुद्वेषे
णारामलोभेन वा प्रवजत्स्वबंधो भवति तन्मतितिकस्वबंधाभावः तथा वस
नपतन्संन्यासपरिग्रातो भवतीत्यर्थः ३॥

वनमाली

संन्यासस्य मोक्षसाधनत्वमुपपादयितुं संन्यासशब्दार्थं स्मारयति ज्ञेय
इति स एव नित्यसंन्यासी ज्ञेयः कोऽसौ यो भगवदर्पणबुद्ध्या क्रियमाणक
र्मणि फलत्वेनाकांक्षया न द्वेष्टि स्वर्गादिकं च न कांक्षति निर्द्वंद्वो रागद्वेषरहितो
हि यतः सुखमनायासेन ज्ञानभक्तिसमारोहक्रमेण संसारबंधात्प्रमुच्यत इ
त्यर्थः ३॥

गंसमवैजयंती

ज्ञानयोगात्कर्मयोगः कस्माद्धेतोर्विशेषरूपतायामाह ज्ञेय इति सः
शुद्धांतःकरणात्ज्ञानगर्भसाधनरूपनिष्कामकर्मनिष्ठः कर्मयोगी नित्यसं
न्यासी नित्यमेव ज्ञानयोगनिष्ठस्य याज्ञेयो ज्ञातव्यः स कः यः स्वस्वरूपानुभा
वानंदामृतनिवृत्तः कर्मयोगी स्वस्वरूपावलोकनाद्गृतिरिक्तं किंचिदपि न कां
क्षति नैच्छति आत्मप्राप्त्यसाधनकर्तारं च न द्वेष्टि न ग्लायति कर्तापत्तनिर्द्वं
द्वः द्वंद्वसहिष्णुः हे महाबाहो हे राजा जानुभुजस्वयेन नमामणिपोनितन्मह हिनि
अयेन सुखं यत्नं विना एवं बंधात्संसारात्मकात्प्रमुच्यते मुक्तो भवति ३॥

तमेवकर्मयोगंप्रशंसतित्रिभिः

मधुसूदनी

सकर्मणिप्रवृत्तोपिनित्यसंन्यासीतिज्ञेयः कोसौ योनद्वेष्टिभगवदर्प
णेनक्रियमाणंकर्मनिष्फलत्वशंकयानकांक्षतिस्वर्गादिकं निर्द्वं
द्वोरागद्वेषरहितोहियस्मात्सुखमनायासेन हेमहाबाहोबंधादंतःकर
णशुद्धिद्वाराज्ञानप्रतिबंधात्प्रमुच्यतेनित्यानित्यवस्तुविवेकादिप्र
कर्षेणमुक्तोभवति ३

सदानंदीटीका

कर्मयोगंतमेवश्लौतिलोकप्रवृत्तये सकर्मणिप्रवृत्तोपिकर्मयोगप
रहेतुरिति: ज्ञानयोगिवत्संन्यासीयोनद्वेष्टिपरिश्रमं ईश्वरार्पणेनऊर्ध्वं
कर्मनैष्फल्यशंकया २ नस्वर्गादिफलेकिंचिकांक्षतिद्वंद्ववर्जितः यतो
नायासेनस्वेनाशुद्ध्यादिप्रतिबंधतः ३ विवेकादिप्रकर्षेणमुक्तोभवति
शुद्धधीः ४ ३ ॥

नीलकंठीटीका

ननुप्रयत्नतःकर्मयोगिनांविक्षेपःसंन्यासिनांतुसुनाशीतिकथमुच्यते
कर्मयोगोविशिष्यतइत्याशंक्याह ज्ञेयइति योरागद्वेषरहितःसकर्मसु
स्वरूपतस्त्यक्तेष्वप्यकृतेष्वपिनित्यसंन्यास्येव यतोनःप्रयत्नभूतयोःसांख्ययो
गयोःरागद्वेषराहित्यकृतंसाम्यमस्ति फलभूतयोरपिसर्वविकल्पराहित्य
रूपसाम्यमनंतरश्लोकाभ्यामुच्यते तथापिचित्तस्वाभाव्यात्कदाचित्संन्या
सिनोरागादयःपातःशंकाकित्वेनतरस्येतिपूर्वश्रेयानितिभावः यद्यप्येवं
तथापिहिप्रसिद्धं निर्द्वंद्वोद्वंद्वेसंन्यासीतयोरात्मानात्मनोर्मिथुने यथा
स्वरूपाध्यासस्तद्रहितः सांख्योरागाद्युदयेतेनाध्यज्ञानस्यापिसांतेतोक्षेदात्
सुखंकर्मकरणायासंविनापिबंधात्संसारात्केवलज्ञानेनैवप्रमुच्यतेन
कर्माण्यपेक्षते यदानिर्द्वंद्वोद्वंद्वंवैमिथुनंतस्माद्द्वंद्वान्मिथुनंप्रजायते
इतिश्रुतेर्द्वंद्वंस्त्रीपुंसयोर्मिथुनंतद्रहितः स्त्र्यादित्यागीसंन्यासीप्रना
यासेनमुच्यते रागादिजयस्योभयत्रतुल्यत्वात् प्रत्युतकंठंवभ्रमणवे
गुण्याभावात्सुखंप्रमुच्यतइत्यर्थः ३ ॥

आनंदीटीका

इदमत्रतात्पर्यं येनेदृशेदेसंसारेपापाभूतौरागद्वेषौप्रोक्तप्रज्ञया

छिन्नौ स कुर्वन्नपि कर्माणि नित्यसंन्यासी ज्ञेयः यस्तु महाकर्माणि त्य-
क्त्वा रागद्वेषौ छेत्तुं न शक्नोति स कर्मण्येव च्युत इति ॥ [illegible] ॥

यथा विशिष्यते तथाह ॥

रामकंठीटीका

सम्यक्त्वयानुष्ठानात्कुर्वन्नपि कर्माणि नित्यसंन्यासी सदात्यक्तकर्मा बोद्धव्यः
कोसौ यः न किंचिद्द्वेष्टि न किंचित्कांक्षति कस्मात्स नित्यसंन्यासीत्याह य-
स्मान्निर्द्वन्द्वः द्वेषाकांक्षाशब्दप्रतिपादिताद्द्वेषरागलक्षणाद्द्वन्द्वान्निष्क्रान्तः
कर्माण्यपि कुर्वन् सुखमक्लेशेन बन्धात्संसारलक्षणात् प्रमुच्यते स्व-
यमेव मोक्षमाप्नोति तदिदमुक्तं तात्पर्यं संसारकारागृहस्थाने रागद्वेषा-
वेव स्कन्धौ बन्धनपाशौ तावेव यथोक्तसम्यग्ज्ञानासिना येन छिन्नौ तस्य
क्रियमाणान्यपि कर्माणि अकृतकल्पानीत्यसौ नित्यसंन्यासी तु कः य-
स्त्वपरिहरन्नपि कर्माणि रागद्वेषौ छेत्तुं न प्रभवति स संन्यस्तकर्मापि क-
र्महेतुत्वतस्तस्य तत्फलस्य बन्धस्याविरामात् यथा च सर्वकर्मणां परि-
त्यागानुपपत्तिः केषांचन वाक्यानामेव स्वकरणाभूतरागद्वेषानुपरमस्त्या-
गमेव भूयो भूयः प्रतिपादितम् प्रतिपादयिष्यते च इत्थं च सम्बन्धितेषा-
न कर्मणां प्राक्त्यागयोगशब्दाभ्यां प्रतिपादितेन एवं संन्यासयोगशा-
हन्यामते [illegible] ॥

नत्र तावन्नीण विकल्पस्य संन्यासाधिकारिणः स्वरूपमाह ॥

लासिकी [illegible] टीका

स योगी कर्मेन्द्रियैः कर्म कुर्वन्नपि नित्यसंन्यासी सार्वकालिकत्यक्तक-
र्मा बोद्धव्यः कोसौ यो दुःखं वा तत्साधनेन द्वेष्टि न याच्यं सुखं वा तत्साधनेन कांक्षति
सर्वदा स्वस्वरूपप्रतिष्ठितप्रज्ञतया निर्विकल्पत्वात् हि यस्मात् हे महाबाहो
निर्द्वन्द्वः सुखदुःखरागद्वेषादिद्वन्द्वरहितः सङ्कल्पान्निष्क्रान्तो योगी सुखमना-
यासेन बन्धात्संसारलक्षणात्प्रमुच्यते स्वयमेव मोक्षमाप्नोति एतदुक्तं
विज्ञेयः कश्चित्कर्मपरित्यागेनात्मनः संन्यासित्वमभिमन्यमानो रागादि-
हानन्दानुच्छेदात्सर्वकर्मोपपत्त्या कर्म करोत्येव तदुक्तं प्रमादिनो बहिश्चित्ताः
पिशुनाः कलहोत्सुकाः संन्यासिनोपि दृश्यन्ते देवसंदूषिताशया इति

एतेन श्लोकेन पुरुषमुद्दिश्य संन्यासयोगस्य लक्षणमुक्तमिति ज्ञानेयो
गेन विना योगोपि तेन विना न संभवति एतौ हि नित्यसंबन्धाविति पूर्वो
क्तमेव स्मारयति ३ ॥

पंचोलीटीका

ज्ञानरहितकेवलसंन्यासकर्मयोगमुक्तिहेत्वोर्मध्ये कर्मयोगविशि
ष्टत्वमनुतानन्नेहैवमाह ज्ञेयइति सएवंविधः कर्मयोगी नित्यसंन्यासी
यः सुखे सुखहेतौ न कांक्षति दुःखे दुःखहेतौ न द्वेष्टि निर्द्वन्द्वः शीतोष्ण
सुखदुःखादिद्वन्द्वसमः हि यस्मात् हे महाबाहो सुखं सुखेन बंधात्प्रमु
च्यते ३ ॥

रसगवीरससिद्धायिनी ॥

ननु कथं स संन्यासः सिद्ध्येदित्यपेक्षायां तत्सिद्धावुपायं वदन्कर्मयो
गिनमेव स्तौति ज्ञेयइति सकर्मयोगी नित्यसंन्यासी ज्ञातव्यः यः सम
रविषये न द्वेष्टि सर्वेषां बंधादीनां विच्छेदकोयं शुद्धमार्गः कथं द्वितः
स्यादित्येवंरूपं द्वेषं न करोति न च कांक्षति पुत्रमित्रादिविषयं स्नेहं च
न करोतीति रागद्वेषत्यागेनैव हि निषिद्धकर्मसंन्यासः सिद्ध्यतीति भा
वः द्वियतः निर्द्वन्द्वो रागद्वेषरूपद्वन्द्वान्निष्क्रान्तो तएव च कर्मेंद्रियाणि
शब्दादौ विषये व्यापारयन् सुखं यथा स्यात्तथा बंधात्परकीयश्रूत्र
दिमध्यप्रवेशो न जातात् दृष्ट्वा निर्गमनलक्षणात्पापसंगलक्षणा
हा प्रमुच्यते हे महाबाहो अर्जुन यद्वा बन्धो यैकाहामाहोप्यर्थं प्र
हो मागृह्याश्चर्यं तथा च महामः शिवशुद्धमावेथामाचलद्मीर्निग
यते अत्यैकाक्षरको मातृ मोवेयास्तंबालस्यांहतीति महाबलयात
कोपि सुखं यथा स्यात्तथा बंधात् स्नेहस्य कृताक्षरप्रतिरोधान्मुक्तो
भवतीत्यर्थः कोर्थः प्रोक्तलक्षणरागद्वेषवादित्येन ब्रह्मारण्यमप्या
ततायिने स्तन्दश्रियो ब्रह्महत्ययापि न रुध्यते किमुत शास्त्राज्ञोवा
न्त्राह्मणान्त्वात्रियादीश्च हिंसन्नुरुपित्रमित्राभिद्रोहाभिपापैरु
च्यतेइति ३ ॥

मधुभाष्य ॥

ज्ञेय इति सन्यासस्यापि श्रेयस्करत्वं ज्ञापयितुं तच्छ्लाघ्यं सा
रयति ज्ञेय इति संन्यासो हि ज्ञानान्तरंगत्वेनोक्तो न तस्य त्यक्तत्वं
हरणायेत्यादौ अतः कथं सोऽवमन्यत इत्याह ३ ॥

भाषा अनुवाद

जो संन्यास से कर्म योग को विशेष कहा सोई अब कर्मयोग की प्र
संशा करते कहते हैं कि जो कर्म करता हुआ भी न किसी से वैर क
रता और न कुछ चाहता है तथा सुख दुख हानि लाभ द्वन्द भाव
से रहित है सोई नित्य संन्यासी है और संसार बन्धन से छुट जाता है
अथवा संन्यासी के ऐसे आचरण करता हुआ जो राग द्वेष रहित
कर्म करता है सो नित्य संन्यासी कहे निश्चय संन्यासी और संन्यासी
तो संन्यासी ही हैं क्यों कि कर्म संन्यास श्रेष्ठ है रहो एक संन्यासी पर
परपर है ३ ॥

दोहा

सो नित सन्यासी जानीए आसा धरै न द्वेष द्वंद्व विना नर सुख ल
हैं बंधन काट विशेष ३॥

20

सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः एकम
प्यास्थितः सम्यगुभयोर्विंदते फलं ॥४॥

शांकरभाष्य

ननु संन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेययोर्विरुद्धयोः फले अपि विरो
धो युक्तो न तूभयोर्निःश्रेयसकरत्वमेवेति प्राप्ते इदमुच्यते सांख्ययोगाविति
सांख्ययोगौ पृथग्विरुद्धभिन्नफलौ बालाः प्रवदंति न पंडिताः पंडितास्तु
ज्ञानिन एकं फलमविरुद्धमिच्छंति कथमेकमपि सांख्ययोगयोः सम्यगा
स्थितः सम्यगनुष्ठितवानित्यर्थः उभयोर्विंदते फलमुभयोस्तदेव हि निःश्रे
यसं फलमतो न फले विरोधोऽस्ति ननु संन्यासकर्मयोगशब्देन प्रस्तुत्य सांख्य
योगशब्दयोः फलैकत्वं कथमिहाप्रकृतं ब्रवीति नैष दोषः यद्यप्यर्जुनेन सं
न्यासं कर्मयोगं च केवलमभिप्रेत्य प्रश्नः कृतो भगवांस्तु तदपरित्यागेनैव
स्वाभिप्रेतं च विशेषं संयोज्य शब्दांतरवाच्यतया प्रतिवचनं ददौ सांख्ययोगा
विति तावेव संन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ सांख्य
योगशब्दवाच्याविति भगवतो मतमतो नाप्रकृतप्रक्रियेति ॥४॥

आनंदगिरिटीका

कर्मयोगाच्छ्रेष्ठ इत्यादिना तथैव प्रतिवचनेऽपि कथं सांख्ययोगयोरेकफलत्वम
प्रकृतं न भवतीत्याशंक्याह यद्यपीति प्रतिवचनमपि तदनुरूपमेव भ
गवता निरूपितमिति विशेषानुपपत्तिरित्याशंक्याह भगवांस्त्विति तदपरि
त्यागेनैव च न त्यागेन प्रश्ने प्रतिनिर्दिष्टौ कर्मसंन्यासकर्मयोगावुच्येते सांख्य
योगाविति शब्दांतरवाच्यतया तयोरेव संन्यासकर्मयोगयोरत्यागेन स्वाभिप्रे
तं च विशेषं संयोज्य भगवान् प्रतिवचनं ददाविति योजना यदुक्तं स्वाभिप्रे
तं च विशेषं संयोज्येति तदेव स्पष्टीकरोति तावेवेति समबुद्धित्वादीत्यादिशब्दे
न ज्ञानोपायभूतः शमादिरादीयते प्रकृतयोरेव संन्यासकर्मयोगयोरुपादाते
फलितमाह अत इति सांख्ययोगावित्यादिश्लोकव्याख्यानसमाप्ताविति शब्दार्थ :४

स्वामिकृतटीका

यस्मादेवमंगप्रधानतेन उभयोरवस्थाभेदेन क्रमसमुच्चयः अतो विकल्प
मंगीकृत्योभयोरेकः श्रेष्ठ इति प्रश्नोऽज्ञानिनामेवोचितो न विवेकिनामित्या

गी॰ अं॰ ५

21

ह सांख्ययोगाविति सांख्यशब्देन ज्ञाननिष्ठा वा विना तदंगं संन्यासं लक्ष
यति संन्यासकर्मयोगावेकफलौ सन्तौ पृथक्फलत्वेन ज्ञाविति बाला अज्ञाः प
वप्रवदंति न तु पंडिताः तत्र हेतुः अनयोरेकमपि सम्यगास्थितः सन्नुभ
योरपि फलं प्राप्नोति तथाहि कर्मयोगं सम्यगनुतिष्ठन् शुद्धचित्तः सन् ज्ञान
द्वारा यदुभयोः फलं कैवल्यं तद्विंदति संन्यासं सम्यगास्थितोपि पूर्वमनु
ष्ठितस्य कर्मयोगस्यापि परंपरया ज्ञानद्वारा यदुभयोः फलं कैवल्यं तद्विंद
तीति न पृथक्फलमनयोरित्यर्थः ४

पैशाचभाष्यं

इदानीं योगस्य संन्यासयोगत्वात्तद्रूपेणैकेन फलेनैक्यं दर्शयितुमाह सांख्य
योगौ पृथगभिन्नौ बालाः भेदात्प्रवदंति न पंडिताः बुद्धिमंतः यस्मादेकमप्या
स्थितः सेवमानः सम्यक् यावदुभयोः सांख्ययोगयोः फलं विंदते लभते ५ ॥

रामानुजभाष्यं

ज्ञानयोगकर्मयोगयोरात्मप्राप्तिसाधनभावे नान्योन्यनैरपेक्ष्यमाह सांख्य
योगाविति ज्ञानयोगकर्मयोगौ फलभेदात्पृथग्भूतौ प्रवदंति ये बालाः अ
निष्पन्नज्ञानाः न पंडिताः कृत्स्नविदः कर्मयोगो ज्ञानयोगमेव साधय
ति ज्ञानयोगस्त्वात्मावलोकनं साधयतीति तयोः फलभेदेन पृथक्त्वं वदंतो न पंडि
ता इत्यर्थः उभयोरात्मावलोकनैकफलयोरेकफलत्वेनैकमप्यास्थितस्त
देव फलं लभते ५ ॥

अभिनवगुप्तकृतटीका उपलब्धं ५ स्पष्टार्थः

परमार्थप्रपा

अथ सर्वमप्यस्य ज्ञानकृत इति दर्शयति सांख्ययोगाविति ५ सांख्ययोगौ पृ
थगिति बालाः वदंति न पंडिताः सांख्यशब्देन ज्ञाननिष्ठा वा वीर्कर्मसंन्यासः यो
गश्च कर्मयोगः तौ पृथक् स्वतंत्रफलाविति बालाः अज्ञाः एवं वदंति न पंडिताः
ज्ञातार इत्यर्थः तत्राह अनयोरेकमपि सम्यगाश्रितवान् उभयोः फलं प्राप्नोति
अज्ञासंन्यासकर्मयोगमनुतिष्ठन् शुद्धचित्तः सन् ज्ञानद्वारा उभयोः कैवल्यमेव
फलं न पृथक् फलमित्यर्थः ५ ॥

वनमाली

ननु कर्मानुष्ठाता कथं संन्यासी त्यागानुष्ठानयोर्युगपद्विरोधादित्यत आह

सांख्येति सांख्यासम्यगात्मबुद्धिस्तां तिष्ठादयतीति सांख्यः संन्यासः यो
गः कर्मानुष्ठानं तौ पृथक्फलौ बालाः शास्त्रार्थविवेकज्ञानशून्याः प्रव
दंति न पंडिताः एकमपि संन्यासः कर्मयोगयोर्मध्ये सम्यगवस्थितः स्वाधिका
रानुरूपेण सम्यक् यथाशास्त्रं कृतवान् स तूभयोः फलं ज्ञानाद्युत्पत्तिद्वारा
विंदते ४ ॥

ज्ञसमवैजयंती

आत्मप्राप्त्युपायभूतयोः कर्मज्ञानयोः स्वन्यासि साधनत्वे परस्परापेक्षा
रहितत्वमाह सांख्ययोगाविति ये सांख्ययोगौ ज्ञानयोगकर्मयोगौ फल
भेदात्पृथग्रूपाविति प्रवदंति एकर्षेणावादं कुर्वंतीति ते बाला मूर्खा न तु पंडि
ता न तत्त्वरूपविदः कर्मज्ञानस्य साधनं ज्ञानमात्मदर्शनस्य साधनमि
त्येवं फलभेदात्तयोः स्वरूपभेदं वदंति न तु तत्त्वरूपनिर्णयं कुर्वंत्यतोऽमू
र्खा इत्यर्थः पंडितास्त्वेकमपि ज्ञानं कर्म वा आस्थितः आसमंताद्विश्वास
पूर्वकं स्थितः पुरुषः उभयोर्ज्ञानकर्मणोः सम्यक् समग्रं फलमात्मदर्शनरू
पं फलं मोक्षं वा विंदते लभत इत्येवं वदंति आत्मावलोकनस्योभयोर्ज्ञान
कर्मणोर्निरपेक्षसाधनत्वं भवतीत्यर्थः ४ ॥

मधुसूदनी टीका

ननु यः कर्माणि प्रवृत्तः स कथं संन्यासीति ज्ञातव्यः कर्मतत्त्यागयोः स्वरूप
विरोधात् फलैक्यानुपपत्तिश्च स्वरूपतो विरुद्धयोः फलेऽपि विरोधस्यैवौचि
त्यात् तथा च निःश्रेयसकरावुभावित्यनुपपन्नमित्याशंक्याह ॥ सांख्या
सम्यगात्मबुद्धिस्तां वहतीति ज्ञाननिष्ठासाधनतया सांख्यः संन्यासः योगः
पूर्वोक्तः कर्मयोगः तौ पृथक् विरुद्धफलौ बालाः शास्त्रार्थविवेकज्ञानशून्याः
प्रवदंति न पंडिताः किंतु हि पंडितानां मतमुच्यते एकमपि संन्यासकर्मयोगयोर्म
ध्ये सम्यगास्थितः स्वाधिकारानुरूपेण सम्यग्यथाशास्त्रं कृतवान्सन्नुभयोर्वि
दते फलं ज्ञानोत्पत्तिद्वारेण निःश्रेयसमेकमेव ४ [illegible]
[illegible] ॥

सदानंदी टीका

ननु यः कर्मणां कर्ता स संन्यासी कथं भवेत् कर्मतत्त्यागयोर्यस्माद्विरोधोऽस्ति
स्वरूपतः १ फलतोऽपि विरुद्धत्वं स्वरूपेण विरुद्धयोः निःश्रेयसकरत्वं वाऽनुपप

त्वमिवेति चेत् १ सम्यगात्ममतिः संख्यातो बहुत्वात्मबोधने ज्ञाने तत्त्वं गृहे
तत्वात्सांख्यः संन्यास उच्यते २ कर्मयोगश्च पूर्वोक्तश्चित्तशुद्ध्येककारणं सं
न्यासयोगौ शास्त्रार्थविवेकज्ञानवर्जिताः ४ तौ विरुद्धफलौ बालाः प्रवद
ति न पंडिताः पंडितानां मते तत्र हि किं स्यादित्युच्यते शृणु ५ संन्यासकर्मणो
र्मध्ये स्वाधिकारानुरूपतः कृतवान्यस्तयोः सम्यगेकमप्यादरात्सुधीः ९ ।
ज्ञानोत्पत्तिक्रमेणैवमेकतः श्रेयसं फलं उभयोर्विंदते तस्मान्न विरोधफलं तयोः

नीलकंठी टीका

नन्वेकरूपतांशंकापकत्रकर्मसंन्यासयोः पृथ्यः कतरः श्रेयानित्या
शंक्य द्वयोरपि फलतः साम्यमित्याह सांख्ययोगाविति सांख्यसमित्येकी
भावेन तिष्ठत्यात्मकः एकीभावेनात्मानं तत्त्वेन ख्यापयते प्रकाशयते वस्तुस्वरूप
लापनेन उदितावेतौ हेतिः तत्सायनभूतो यः सांख्यः संन्यासः स च दाराादि
त्यागो यश्चिरोत्र संध्योपासनादिनिर्विकल्पसमाधंतमनुष्ठानं तत्र
ख्यसयोगसत्वं तत्रो योगश्चित्तवृत्तिनिरोध इति हृतयश्च प्रमाणविपर्य
यविकल्पनिद्रास्मृतयः इति पंच तत्र प्रत्यक्षानुमानागमाः प्रमाणानि ते
षु प्रत्यक्षमिंद्रियं तत्राह तिः श्रवणादिविषयं यथार्थेन ज्ञानं विपर्ययस्त
चैव रजतादिविषयं भ्रांतिरूपं ज्ञानं संशयोपि द्वयं पुरुषो वा स्थाणुर्वेति
दोषितात्परको रिक्तं ज्ञानं स विपर्यय एवांतर्भवति विकल्पस्तच्छब्दज्ञाना
नुपातीवस्तुशून्यः यथा शशविषाणं नरशृंगं इति न हि शशकस्य वेतन्यमत
त्वस्वरूपमस्ति अथापि शब्देनाभिलापनेनायं विकल्पः शब्दज्ञानानुपा
ती वस्तुशून्यः एकस्मिन्नेव वस्तुनि भिन्नवृत्तिरिति निद्रा स्मृतीत्येवक्रम
सिद्धे एतासां निरोधो विनिर्विकल्पः प्रत्यगात्मैवावशिष्यते तावेतौ फलभू
तौ सांख्ययोगौ साधनभूतौ तावेव संन्यासकर्मयोगाख्यौ तत्त्वावयोः साम्यं
ते यः सतिसंन्यासीत्यनेन सूचितं श्रावयोरैकात्मज्ञा उच्यते यास्थितः अनु
तिष्ठन् फलेनिर्विकल्पात्मनाऽवतिष्ठति इत्यर्थः ४ ॥

भावदीपी टीका

तदिदं प्राप्तं काम्यं सांख्ययोगशब्दौ **आनंदी टीका** भ्यां सांख्ये संन्यासिनोधिकारः कर्मणि नास्तीत्याह ॥

नयहस्य ति यत्तसशायस्य

बालाविमर्शिनोऽज्ञानाः सांख्ययोगौ पृथग्भिन्नार्थकौ भिन्नफलानु
ष्ठेयौ प्रवदंति पण्डिता विमर्शकास्त्वेवं न प्रवदंति ते त्वेकमेव तिष्ठा
भिन्नेन प्रकारद्वयेन साध्यमप्येकं तत्फलं तेनानुष्ठेयमाहुः यत एव
कमपि सांख्ययोगं सम्यक् पूर्वोक्तक्रमेणास्थितो द्वयोरपि सांख्ययो
गयोः फलमेकरूपमेव विंदति उक्तं सर्वोचात्र फक्किः आवश्यकं कर्म
कुर्वतामपि सांख्यानां यथोक्तात्मज्ञानसमाधानेन कोपि प्रतिबंधः स
त्वलभ्यैव श्रेयःप्राप्तिः कर्माकरणेन प्रत्यवायः कृतावक्रमपव तथैव ज्ञा
नापरित्यागेन विहितं कर्म कुर्वतामेव सर्वेषां वर्णाश्रमिणां श्रेयःफलम
मेव ज्ञानं विना तत्वत्य इति तदेवं ज्ञानिनां कर्माविनाभावात्कर्मिणां
वज्ञानाविनाभावाद्द्वयोस्तुल्यमेव फललाभः [illegible] ॥ ॥

रामकंठीटीका

ततः किं नु संशयकारणमित्याह ॥

सांख्यं यथाप्रतिपादितात्मतत्वज्ञाने योगस्तु विरहविधानविहितवत्व
सांख्यानां विहितानां कर्मणामनुष्ठाने तौ नित्यमन्योन्यावियोगप्रतिला
भ्यमस्वरूपतां रमिनो बालास्तत्वज्ञानव्यवहारस्तुत्यतिरहितत्वाद्वा
लिशाः पृथक् भिन्नफलानुष्ठेयतया विविक्तावस्थानौ प्रवदंति न्यायवदन्ते
न तु पण्डिताः परमार्थविदः यत एकमपि सांख्यं योगं वा सम्यग्यथाप्रतिपा
दितेन रूपेणास्थितः समाश्रितः उभयोरुभयोर्हि योरपि सांख्ययोगयोः फ
लं कैवल्यलक्षणं विन्दते लभते किमतो भवति यथोक्तसांख्यापरसंज्ञविज्ञा
न समाश्रयणा प्रवत्नप्रतिपादितेन पपत्याय यथाविहितकर्मानुष्ठानरूपयोग
मतेरणा यथोक्तफलपर्यवसायि न भवत्येव योगोपि सांख्यरहितस्तथैवेति
[illegible] ॥

लासिकी

[illegible]टीका

सांख्यं कर्मणि क्रियमाणेपि देहात्मविवेक नाम योगः आत्मस्वरूपमत
तया कर्मानुष्ठानम् एतौ बालास्तत्वज्ञानव्युत्पत्तिशून्याः पृथग्भिन्नफ
लानुष्ठेयतया विविक्तावस्थानौ कथयन्ति न तु पण्डितास्तत्ववि

४

गी॰ टी॰ पं

23

दः यतोनयोरेकमप्यतममपिसम्यगाश्रितः पुमानद्वयोरपिफलं
कैवल्यंलभते ४ [illegible] ॥ ४

पंचोलीटीका

कर्मयोगकर्मसंन्यासयोगः श्रेयप्रधानत्वेन प्रवस्याभेदेक्रमसमु
च्चये श्रभिहिते तत्स्वविकल्पमंगीकृत्यउभयोः कःश्रेयः इति प्रश्नोत्ता
नितामेवउचितः नविवेकिनामित्याह सांख्येति बालाश्रज्ञाः सांख्य
योगौज्ञानसहितःकर्मणांत्यागःसांख्यंईश्वरार्थं कर्मानुष्ठानेयोग
स्तौपृथक्फलौवदंतिनपंडिताः ज्ञानिनःकिंतर्हिपंडितानांमतमु
च्यते एकमपिसम्यगास्थित एकस्यसम्यगनुष्ठानात् नाउभयोः
फलंमोक्षाख्यंज्ञानोत्पत्तिद्वारेणाविंदतेप्राप्नोति ४ ॥ ४ ॥

रणवीरसमिद्धोधिनी॥

प्रयत्नोकेस्मिन्द्विविधानिष्ठेत्यत्रनिर्णीतमर्थंविस्मृत्यैवंतमनत्यैवसं
न्यासयोगयोश्रमात्रश्रवणेनैवफदित्येवसंजातसंशयमर्जुनंसम्यक्सं
देहापनुत्तयेतमेवार्थंस्मारयन्नाक्त्येतमेवविवृणोति सांख्ययोगा
विति संख्येषु हेतुप्रवृत्ताः सांख्यास्तेषामिदंसांख्यंनिश्चयात्मकंज्ञा
नं ज्ञानयोगेनसांख्यानामित्युक्तेः योगस्तदनंतरंस्वोचितकर्मानुष्ठा
नलक्षणंकर्मकौशलंतौबालास्तत्त्वरूपज्ञानरहिताबालिशाःपृथ
क्पृथक्फलौप्रवदंति पंडितास्तुनैवंकथयंति यतउभयोरनयोर्मध्ये
एकमपिसांख्ययोगंवासम्यगास्थितःसमाश्रितः तत्रियप्रवउभयोः
फलंराज्यभोगादिलक्षणंविन्दते लभते फलमित्येकवचनेनैकमे
वफलंद्वयोर्भवतीतिध्वनति कर्मसुप्रवृत्तिलक्षणयोगस्यनिश्चया
त्मकज्ञानलक्षणसांख्येनविना नस्यतेविनासिद्धेरेकफलत्वेवसां
ख्ययोगाविति भावः ४ ॥

मधुभाष्य॥

सांख्ययोगाविति उभयोरत्यंतंरंगत्वेन विरोधः प्रत्यभिज्ञयो

द्वैवे पृस्यतांतः स्वंलोकंनप्रतिजानाति भावः पदव्यऽपि
तपूस्मदाश्रितायायस्तप्रालापूमवत्मनामित्यादिकाम्य
कमेविषयमितिभावः येत्वन्यथावदंतितेबालाः पक
मपीत्यस्यापिप्रायमाह ४॥

24

भाषा अनुवाद

जिस हेतु संन्यास औ कर्मयोग दोनो प्रधान अङ्गरूप अवस्था मे दृष्टि पाये जाते हैं इस से इन मे कौन श्रेष्ठ ऐसा पूछना अज्ञानी को तो उचित [illegible] होस कता है, पर ज्ञानी को तो नहीं यही कहते हैं कि ज्ञान निष्ठा जो सांख्य औ उसी का अङ्गरूप संन्यास तथा संन्यास से लक्षित कर्मयोग भी संन्यास है इन दोनो का फल एक ही। है तो भी दोनो भिन्न हैं यह केवल अज्ञानी कहते हैं औ पण्डित ऐसा नहीं कहते हैं देखो इनमे से एक पक्ष का आश्रय लेने वाला पुरुष दोनो के फल को प्राप्त होता है जैसे लोग निःकाम कर्म करते शुद्धचित्त होय तत्वज्ञान प्राप्ति के द्वारा उन दोनो का फल जो कैवल्य सो लाभ करते हैं ऐसे ही सब कर्मत्याग रूप संन्यासधारी लोग भी पूर्वकृत कर्मयोग की परम्परा रूप जो कैवल्य सो पावते हैं तो अलबत्ता दोनो का फल पृथक् नहीं है सोई कहा कि सांख्य औ योग को बालक कहे अज्ञजन भिन्न कहते और पंडित नहीं कहते हैं एक मे भी अच्छी तरह से स्थित होके फल दोनो का भी। पावता हैं इससे दोनो एक है ४॥

दोहा

सांख्ययोग भिन्न बालक कहैं पंडित कहिते नाहीं जो एक हि आश्रित भलें दोउ फल मिलता हि ४॥

25

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते एकं सां
ख्यञ्च योगञ्च यः पश्यति स पश्यति ५॥

शांकरभाष्यं

एकस्यापि सम्यगनुष्ठानात् कथमुभयोः फलं विंदत इत्युच्यते यदिति य
त्सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिः प्राप्यते स्थानं मोक्षाख्यं तद्योगैरपि ज्ञानप्रा
प्त्युपायत्वेनेश्वरे समर्प्य कर्माणि आत्मनः फलमनभिसंधायानुतिष्ठंति
ये ते योगिनः तैरपि परमार्थज्ञानसंन्यासप्राप्तिद्वारेण गम्यत इत्यभिप्रायः अत
एकं सांख्यं च योगं च यः पश्यति स पश्यति फलैकत्वात् सम्यक् पश्यतीत्यर्थः ५

आनंदगिरिकृतटीका

प्रश्नपूर्वकं श्लोकांतरमवतारयति एकस्यापीति कैश्चिदेव तयोरेकफलत्वं
पश्यंतीत्याशंक्य तेषामेव सम्यग्दर्शित्वं नेतरेषामित्याह एकमिति तिष्ठत्यस्मि
न्नव्यावर्तत इति व्युत्पत्तिमाश्रित्याह मोक्षाख्यमिति योगशब्दार्थमाह ज्ञान
प्राप्तीत्यादिना ये हि जिज्ञासवः सर्वाणि कर्माणि भगवत्यीश्वरेऽर्पणेन तेषां फलाभि
लाषमकृत्वा ज्ञानप्राप्तौ बुद्धिशुद्धिद्वारोपायत्वेनानुतिष्ठंति तेऽत्र योगा विव
क्षिता अच्प्रत्ययस्य मत्वर्थत्वं गृहीत्वा ते योगिन इति सर्वोपि द्वैतप्रपंचो नवा
स्तभूतो मायाविलासत्वादात्मा तु अविक्रियोऽद्वितीयो वस्तुसदिति प्रयोजकज्ञा
नं परमार्थज्ञानं तत्पूर्वकसंन्यासद्वारेण कर्मिभिरपि तदेव स्थानं प्राप्यमि
त्येकफलत्वं सन्न्यासकर्मयोगयोरविरुद्धमित्याह तैरपीति फलैकत्वे फलि
तमाह अत इति ५॥

स्वामिकृतटीका

एतदेव स्फुटयति यत्सांख्यैरिति सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिर्यत्स्थानं मो
क्षाख्यं प्रकर्षेण साक्षादवाप्यते योगैरित्यत्रार्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययो
द्रष्टव्यः कर्मयोगिभिरपि तदेव ज्ञानद्वारेण गम्यते अवाप्यत इत्यर्थः अतः
सांख्यं च योगं चैकफलत्वेनैकं यः पश्यति स एव सम्यक् पश्यति ५॥

पैशाचभाष्यं

यत्सांख्यैः ज्ञाननिष्ठैः प्राप्यते स्थानं मोक्षाख्यं तद्योगैः कर्मभिरपि गम्यते
अत एवाभिन्नं सांख्ययोगं च यः पश्यति स सम्यग्दर्शीत्यर्थः ५॥

रामानुजभाष्यं

एतदेव विवृणोति सांख्यैर्ज्ञाननिष्ठैर्यदात्मावलोकनरूपं फलं प्राप्यते तत्

गी॰ टी॰ पं॰

26

देकर्मयोगनिष्ठैरपिप्राप्यते एवमेकफलत्वेनैकं वैकल्पिकं सांख्यं योगं
च यः पश्यति स पश्यति स एव पण्डित इत्यर्थः ५॥

अभिनवगुप्तकृतटीका

इदं सांख्यज्ञानमयं च योगः इति न भेदः एतौ हि नित्यसंबद्धौ ज्ञानेन यो
गेन विना योगोऽपि न तेन विना अत एकत्वमनयोः ५॥

परमार्थप्रपाटीका

यत्सांख्यैरिति सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिः यत्स्थानं कैवल्यं प्रकर्षे
ण साक्षात्प्राप्यते तदेव योगैः कर्मयोगैर्ज्ञानद्वारा प्राप्यते अतः सांख्ययो
गं च एकमेकफलत्वेन यः पश्यति स एव पश्यति परमार्थदृष्टा नान्यः ५

वनमालीटीका

कथं तत्राह यदिति सांख्यैर्भगवज्ज्ञानाभ्यासपरैर्विहितजन्मनिजकर्मानवेवा
र्हतकर्मभिः प्रोपितातः करस्थैः संन्यासिभिः श्रवणादिपूर्वकज्ञानंनि
ष्ठया भगवत्प्रसादद्वारा यत्स्थानं वैकुंठाख्यं मोक्षरूपं स्वस्वरूपानंदावि
र्भावरूपं प्राप्यते योगैरपि भगवदर्पणाभिप्रायफलेच्छारहितेन कृतानि
कर्माणि स्वोचितानि योगास्तद्विद्यन्ते येषां ते योगाः अर्था आदितात्मनथी
योच्प्रत्ययः तैः संन्यासश्रवणादिकं प्राप्य तत्स्थानं गम्यते अतएवफ
लत्वात्सांख्ययोगं च यः एकं पश्यति स एव सम्यक् पश्यति ५॥

उत्तमवैजयन्ती

एतदेव स्फुटयति यदिति सांख्यैः सांख्यमात्मज्ञानं विद्यते येषां ते सांख्याः
अर्श आदित्वादच्प्रत्ययः तैरात्मज्ञानिभिर्मुमुक्षुभिः प्रकर्षेण न आत्मा
वलोकनरूपं स्थानं स्वमनत्त्वः तिष्ठत्यस्मिन्निति स्थानं फलरूपं यतः कदाचि
दपि न च्यवते इत्यर्थः प्राप्यते प्रतिपद्यते योगैरप्यत्राप्यच्प्रत्ययः ज्ञानग
र्भकनिष्कामकर्मकर्तृभिरपि कर्मयोगिभिस्तत्स्थानं गम्यते प्राप्यते
यो मुमुक्षुः सांख्यं ज्ञानयोगं योगं च कर्मयोगमेकमुभयोः स्वरूपमिव
तेऽपि फलस्यैकत्वादेकमेव पश्यति जानाति स पश्यति स एव वेत्ति स एव
ज्ञानलोचनवान्पण्डित इत्यर्थः ५॥

त्रि॰

एकस्मात्सम्यगनुष्ठानात्कथमुभयोः फलं विंदते न

मधुसूदनीटीका आह॥

सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिरैहिककर्मानुष्ठानशून्यैरपि प्रागभवीय

कर्मभिरेव संस्कृतांतःकरणैः श्रवणादिपूर्विकया ज्ञाननिष्ठयाय
त्वाधिकृतस्यानेनिष्ठत्वे वा अस्मिन्नंतकदापिच्यवनं इति वक्ष्यमाणोत्तं एवं
प्राप्यते श्रवणाभावमात्रेणालभ्यतः ३ वनित्यमात्रत्वात् योगैरपि
भगवदर्पणबुद्ध्या फलाभिसंधिराहित्येन कृतानि कर्माणि शास्त्री
याणि योगस्ते येषां संति तेपि योगाः अर्शआदित्वान्मत्वर्थीयो वपत्व
यः तैर्योगिभिरपि सत्वशुद्ध्या संन्यासपूर्वकश्रवणादिपरः सरयाज्ञा
ननिष्ठया वर्तमाने भविष्यति वा जन्मनि संपत्स्यमानया तत्स्थानं
गम्यते अतएव फलैक्यात् एकं सांख्यं च योगं च यः पश्यति स एव स
म्यक्पश्यति नान्यः अयं भावः येषां संन्यासपूर्विका ज्ञाननिष्ठा दृश्यते
तेषां तयैव लिंगेन प्राक्जन्मसु भगवदर्पितकर्मनिष्ठानुमीयते का
रणमंतरेण कार्योत्पत्त्ययोगात् तदुक्तं यान्यतोन्यानि जन्मानि तेषु नू
नं कृतं भवेत् यत्कृत्यं पुरुषेणेह नान्यथा ब्रह्मणि स्थितिरिति एवं ये
षां भगवदर्पितकर्मनिष्ठा दृश्यते तेषां तयैव लिंगेन भाविनि संन्यास
पूर्वकज्ञाननिष्ठानुमीयते सामग्र्याः कार्याव्यभिचारित्वात् तस्मादरा
गेनमसदाशांतःकरणशुद्धये प्रथमं कर्मयोगोनुष्ठेयो न तु संन्या
सः सत्वशुद्धौ ज्ञाननिष्ठा स्वयमेव भविष्यतीति ५ ॥

सदानंदी टीका

वाथमेकस्य कारणादुभयोर्विद्यते फलं अष्टाउसंन्यासिभिः शुपेः पूर्व
जन्मस्वनुष्ठितैः १ शुद्धांतःकरणैः सम्यग्वेदांतश्रवणादिभिः श्रवासा
त्मावबोधपर्यन्मोदाख्यं प्राप्यते फलं २ ईश्वरार्पणधिया योगाः शास्त्रीया
णि कृतानि च कर्माणि संति येषां ते योगास्तैरपि योगिभिः सत्वशुद्ध्या
वमसंन्यासपूर्वया ज्ञाननिष्ठया तत्स्थानं गम्यते वर्तमाने भाविनि वाज
न्मनि ४ अतएककफलत्वाद्यः पश्यत्येकं विशुद्धधीः सांख्ययोगं स एवेह सम्य
क्पश्यति नापरः ५ दृश्यते ज्ञाननिष्ठा येषां संन्यासपूर्विका तेषां तु हि
गतः पूर्वजन्मस्वीशसमर्पिते ६ कर्मानुष्ठानमप्यलं निश्चयमनुमीय
ते न विना कारणं कार्योत्पत्तिर्दृश्यत एव हि ७ यान्यतोन्यानि जन्मा
नि तेषु नूनं कृतं भवेत् यत्कृत्यं पुरुषेणेह नान्यथा ब्रह्मणि स्थितिः ८

अ० ८

सपश्यति ५

एवमीश्वरार्पितकर्मानुष्ठानं द्रष्टव्यं तेनारोगो येषां तेषां सन्यासं ज्ञानं भावमनुमीयते ॥ तस्मात्जिज्ञासुनाज्ञेनप्रथममेवचित्तशुद्धये कर्मयोगोऽनुष्ठेयो न सन्यासः कथंचन ॥ वैराग्यतीव्रतायां सन्यासमेवम विष्यति ॥ ५ ॥

नीलकंठटीका

योगैः योगिभिः अपिशब्दाच्चत्यजंतोऽयं योगशब्दः स्थानं मोक्षा ख्यं एकं अभिन्नं साध्ययोजनाश्लोकद्वयस्य ५ ॥

आनंदीटीका स्पष्टार्थम् ५

[illegible]

रामकंठटीका

वहप्त्यविमाह सांख्येन ज्ञानेन मन्यस्ताः शुकबालखिल्याद्यास्तै सांख्या इत्युक्ताः तद्योगासं वन्धात् योगास्तैर्वा विधैः सांख्यैः योक्तज्ञानवद्भिः यत्स्थानं विश्रांतिपदं आ प्यते निरुद्धरोपयतया समाप्तीयते तदेव योगैरनुगम्यते पश्चात्कालं यास्वीक्रियते ज्ञानपूर्वं तादृशस्थानस्य यत् सांख्यैः प्राप्यते तद्योगैरनुगम्यते इत्यर्थः न पुनः केवल लन्नाणैकफलसंपादने तत्प्रहृत्तत्वाद्धयोर्भेदोऽस्ति ततः सांख्यं योगं च एकमेव यः पश्यति जानाति स एव पश्यति तस्यैव सम्यग्ज्ञा नात् मिकादर्शन शक्तिः न तु ज्ञानेन योऽकेवलेनैव मोक्षः कर्मयोगेन सर्वेरागादिवद्धरति पश्यति ५ ॥

लासिकी टीका

५ तदेव द्रढयितुमाह ॥

सांख्यैर्यथोक्तज्ञानवद्भिर्यत्स्थानं विश्रांतिपदं योगभूमिकाधिरोहेणा प्राप्यते तदेव योगैरपि स्वस्वभावावहिततया कर्मावष्टात्मभिर्गम्यते वा प्राप्यते अतः सांख्यं योगं चैकफलत्वेनैकं यः पश्यति स एवोन्मीलिततत्त्वदृष्टिः सम्यक् पश्यति नान्यः योगैरित्यत्राशी आदितात्मत्वधीयो [illegible] ५ ॥

पैंचोली टीका

एकस्यानुष्ठानात् कथमुभयोः फलं विंदते तत्राह यदिति सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिः यत्स्थानं मोक्षाख्यं प्राप्यते ईश्वरार्थकर्मकारिभिः योगैस्तदेव प्राप्यते तदेव ज्ञानप्राप्तिद्वारेण मोक्षाख्यं यः सांख्ययोगं च एकफलत्वादेकमेव पश्यति सः पश्यति सम्यक् जानाति ५ ॥

रमावीरसमिद्बोधिनी ॥

एतदेव द्रढयति यत्सांख्यैरिति सांख्यैर्बुद्धसज्जैर्यत्स्थानं स्वर्गादिलक्षणं प्राप्यते योगो विद्यते येषां ते योगा योगिनः अर्श आद्यच् तैः कर्मयोगिभिरपि तत्प्राप्यते अतो यः सांख्यं योगं चैकमेकफलमेव पश्यति स एव सम्यग्दर्शीति भावः एतः अज्ञानयोगेन सांख्यानामित्यत्र व्याख्यातं तत एवावधार्यं ५ ॥

मधुभाष्य ॥

यत्सांख्यैरिति योगिभिरपि ज्ञानद्वारा ज्ञानफलं प्राप्यत इत्यर्थः अतश्च संन्यासाद्योगो वर इत्याह ५ ॥

28

भाषा अवतार

सांख्य श्री योग दोनोमे से एकके सम्यक अनुष्ठान करने से दोनो का फल किस तरह पावताहै इस शंकापर सांख्य श्री योगका एक फलत्व प्रकाश करते हुये कहते हैंकि सांख्यके हे ज्ञाननिष्ट संन्यासी जोमोक्षपद पावतेहैं सोई पद योग शब्द वाच्य कर्म योगी भी ज्ञानके द्वारा प्राप्त होते हैं इस से एकही फलके हेतुरूप संन्यास श्री योग को जो एक रूप देखते है सेईसम्यक दर्शीहैं सोई कहा कि जोपद सांख्य लोगपावते सोई योग युक्तों को मिलताहै श्रोर सांख्य योग कोजो एक देखते सो देखते है याकीसूरदासदे या जो कोई विरले ऐसे देखते है सब नहीं ऐसे देखतेहै ५॥

दोहा

जोसांख्यीकोपदप्राप्तहै योगीतिहपदपाय एकहिसांख्यश्रु
रुयोगकोदेषेसोहिदिषाय ५॥

29

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ६ ॥

शांकरभाष्य

एवं तर्हि योगात् संन्यास एव विशिष्यते कथं तर्हि इदमुक्तं तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते इति शृणु तत्र कारणं त्वया पृष्टं केवलं कर्मसंन्यासं कर्मयोगं चाभिप्रेत्य तयोरन्यतरः कः श्रेयानिति तदनुरूपं प्रतिवचनं मयोक्तं कर्मसंन्यासात् कर्मयोगो विशिष्यत इति ज्ञानमनपेक्ष्य ज्ञानापेक्षस्तु संन्यासः सांख्यमिति मयाभिप्रेतः परमार्थयोगश्च स एव यस्तु कर्मयोगो वैदिकः स च तादर्थ्याद्योगः संन्यासः इति चोपचर्यते कथं तादर्थ्यमित्युच्यते संन्यासस्त्विति संन्यासस्तु पारमार्थिको हे महाबाहो दुःखमाप्तुमयोगतः योगेन विना योगयुक्तो वैदिकेन कर्मयोगेन ईश्वरसमर्पितरूपेण फलनिरपेक्षेण तेन युक्तो मुनिर्मननादीश्वरस्वरूपस्य मुनिर्ब्रह्म परमात्मज्ञाननिष्ठालक्षणत्वात् प्रकृतः संन्यासो ब्रह्मोच्यते न्यास इति ब्रह्म ब्रह्मा हि पर इति श्रुतेः ब्रह्म परमार्थसंन्यासं परमात्मज्ञाननिष्ठालक्षणं न चिरेण क्षिप्रमेवाधिगच्छति प्राप्नोत्यतो मयोक्तं कर्मयोगो विशिष्यते इति ६ ॥

आनंदगिरिटीका

यदि यथोक्तज्ञानपूर्वकसंन्यासद्वारा कर्मिणामपि श्रेयोवाप्तिरिष्टा तर्हि संन्यासस्यैव श्रेयस्त्वप्राप्तमिति चोदयति एवं तर्हीति संन्यासस्य श्रैष्ठ्ये कर्मयोगस्य प्रशस्यत्ववचनमनुचितमित्याह कथं तर्हीति पूर्वोक्तमेवाभिप्रायं स्मारयन् परिहरति शृण्विति कर्मयोगस्य विशिष्टत्ववचने तत्रेति परामृष्टं तदेव कारणं कथयति त्वयेत्यादिना केवलं विज्ञानरहितमिति यावत् तयोरन्यतरः कः श्रेयानिति इति प्रश्नोपाहृतत्वात् तदीयप्रश्नमनुसृत्य तदनुरूपं प्रतिवचनं ज्ञानमनपेक्ष्य तद्रहितात् केवलादेव संन्यासात् योगस्य विशिष्टत्वमिति यथोक्तमित्याह तदनुरूपमिति ज्ञानापेक्षः संन्यासस्तर्हि कीदृगित्याशङ्क्याह ज्ञानेति तर्हि कर्मयोगे कथं योगशब्दः संन्यासशब्दो वा प्रयुज्यते तत्राह यस्त्विति तादर्थ्यात् परमार्थज्ञानशेषत्वादिति यावत् तदेव तादर्थ्यं प्रश्नपूर्वकं प्रकाशयति कथमित्यादिना कर्मानुष्ठानाभावे बुद्धिशुद्ध्यभावात् परमार्थसंन्यासस्य सम्यग्ज्ञानात्मनो न प्राप्तिरिति व्यति

रेकमपरस्याल्पत्वमपरस्येति योगेति पारमार्थिकः सम्यग्ज्ञानात्मकः ।
सामग्र्यभावे कार्यप्राप्तिरयुक्तेति मत्वाह दुःखमिति योगयुक्तत्वं व्याचष्टे वैदि
केनेति ईश्वरस्वरूपसमर्पितचित्तस्येति शेषः ब्रह्मेति व्याख्येयं पदमुपादाय
व्याचष्टे प्रकृत इति तत्र ब्रह्मशब्दप्रयोगे हेतुमाह परमात्मेति लक्षणशब्दो ।
गमकविषयः संन्यासे ब्रह्मशब्दप्रयोगे तैत्तिरीयकश्रुतिं प्रमाणयति न्यास
इति कथं संन्यासे हिरण्यगर्भवाची ब्रह्मशब्दः प्रयुज्यते द्वयोरपि परत्वाविशे
षादित्याह ब्रह्म हीति ब्रह्मशब्दस्य संन्यासविषयत्वे फलितं वाक्यार्थमाह
ब्रह्मेत्यादिना न चिरेणेत्यस्यार्थं सविवरणं न प्रवणानि कर्मभिरतितरां परिपक्वकषा
यस्य करणानि सर्वतो व्यावृत्तानि निरस्ताशेषप्रकृष्टस्य प्रत्यगात्मान्वेषणप्रव
णानि भवन्तीति कर्मयोगस्य परमार्थसंन्यासप्राप्त्युपायत्वे फलितमाह अत इति

स्वामिकृतटीका

यदि कर्मयोगिनोऽप्यन्ततः संन्यासेनैव ज्ञाननिष्ठा तर्हि आदित एव संन्यासः
कर्तव्य इति मन्वानं प्रत्याह संन्यास इति अयोगतः कर्मयोगं विना संन्या
सः प्राप्तुं दुःखं दुःखहेतुरशक्य इत्यर्थः चित्तशुद्ध्यभावेन ज्ञाननिष्ठाया अ
संभवात् योगयुक्तस्तु शुद्धचित्ततया मुनिः संन्यासी भूत्वा न चिरेणैव ब्रह्मा
धिगच्छति अपरोक्षं जानाति अतश्चित्तशुद्धेः प्राक् कर्मयोग एव संन्यासाद्वि
शिष्यत इति पूर्वोक्तं सिद्धं तदुक्तं वार्तिककृद्भिः प्रमादिनो बहिश्चित्ताः पिशुना
कलहोत्सुकाः संन्यासिनोऽपि दृश्यन्ते दैवसंदूषिताशया इति ॥ ६ ॥

पैशाचभाष्यं

कर्मसंन्यासात्कर्मयोगो विशिष्ट इत्युक्तं कथं विशिष्ट इत्यत आह अतः कर्मयोगो
विशिष्यत इत्युक्तं यतः योगयुक्तो मुनिः ज्ञानी ब्रह्माचिरेणाधिगच्छति प्राप्नो
ति ॥ ६ ॥

(margin: अयोगतः संन्यासः दुःखं प्राप्यः)

रामानुजभाष्यं

(margin: न भवति) ज्ञानयोगस्त्वयोगतो कर्मयोगे संन्यासे यानविशेषः तस्मात् ज्ञानयोगा
त्वयोगात्ते प्राप्तुमशक्यः योगयुक्तः स्वयमेव मुनिरात्ममननशील
त्वात् कर्मयोगं साधयित्वा अचिरेणाल्पकालेनैव ब्रह्माधिगच्छत्या
त्मानं प्राप्नोति ज्ञानयोगयुक्तस्तु महता दुःखेन ज्ञानयोगेन साधयति
दुःखप्राप्यत्वादात्मानं चिरेण प्राप्नोतीत्यर्थः ॥ ६ ॥

अभिनवगुप्तकृतटीका

तथाहि वैधात्सर्गमिनिक्रमः योगरहितस्य संन्यासमात्रं दुःखमेव प्राप्नोति
त्याकर्मणां दुःसंन्यसनात् योगिभिस्तत्फलभमेवैतदित्युक्तं प्राक् ६ ॥

परमार्थप्रपा

यदि कर्मयोगिनोप्यंततः संन्यासेनैव ज्ञाननिष्ठा तर्हि आदित एव संन्यासः
कर्तव्यः कस्मात् इत्याह संन्यासस्त्विति ६ भो महाबाहो अयोगतः कर्मयोगं विना
संन्यासः प्राप्तुं दुःखहेतुर्वा कः युक्तो योगयुक्तः सन् मुनिर्मननशीलः नचिरे
णा शीघ्रमेव ब्रह्माधिगच्छति अपरोक्षं जानातीति तत्तद्विधुरः ६ ॥

वनमालीटीका

ननु प्रथमं संन्यासः एव मुमुक्षुणा कुतो न क्रियते ज्ञाननिष्ठाहेतुत्वेन तस्या
आवश्यकत्वादत आह संन्यासस्त्विति अयोगतः योगो मदर्पणधियानुष्ठा
नं तु अंतःकरणशोधकं तैः कामकर्मानुष्ठानं तद्विना हे महाबाहो कृतो यः संन्या
सः स तु दुःखमाप्तुमेव भवति अशुद्धांतःकरणत्वेन तत्फलज्ञाननिष्ठा
या असंभवात् ज्ञानकर्मोभयभ्रष्टत्वं स्यादित्यर्थः कर्मयोगयुक्तस्तु शुद्धां
तःकरणतया मननशीलो मुनिः संन्यासी भूत्वा ब्रह्म हृद्गुहाहितमाविर्भू
त्वब्रह्मगुहाहितमा विर्भूतं ब्रह्म हृद्गुहाकं स्वस्वरूपं च नचिरेण शीघ्रमेव साक्षा
त्करोति प्राप्नोति च ६ ॥

ऊष्मवैजयंती

कर्मयोगं विना केवलं ज्ञानयोगो दुःखहेतुरेव स्यात् कर्मयोगस्तु सुख
कर इत्याह संन्यास इति हे महाबाहो हे सामर्द्धिकलक्षणार्वस्कषतु शुद्धेः
वधारणो संन्यासो ज्ञानयोगः अयोगतः कर्मयोगं विना दुःखमाप्तुं केवलं
दुःखप्राप्त एव भवति नतु सुखप्राप्तये योगयुक्तः कर्मयोगयुक्तो मुनिर्म
ननशीलं सन् ब्रह्म नचिरेण क्षिप्रमेव ब्रह्मात्मानमधिगच्छति प्राप्नो
ति आत्मनो ब्रह्मात्मकत्वाद्ब्रह्माधेयता ब्रह्मव्याप्यत्वात् ब्रह्माधीनस्थि
तिप्रवृत्तिकत्वाद्ब्रह्मपृथक्स्वरूपता ब्रह्मस्वरूपमात्मानमधिगच्छतीत्यर्थः ६

मधुसूदनीटीका

अशुद्धान्तःकरणेनापि संन्यास एव प्रथमं कुतो ज्ञाननिष्ठाहेतुत्वेन कर्तव्यादितिचेत्तत्र

नमं

अयोगतः योगमंतःकरणशोधकं शास्त्रीयकर्म तेन विना हटादेव यः कृतः
संन्यासः स तु दुःखमाप्तुमेव भवति अशुद्धांतःकरणत्वेन तत्फलस्य ज्ञाना
निष्ठायाः असंभवात् शोधके च कर्मण्यनधिकारात् कर्मब्रह्मोभयभ्रष्ट
त्वेन परमसंकटापत्तेः कर्मयोगयुक्तस्तु शुद्धांतःकरणत्वान्मुनिर्मननशी
लः संन्यासी भूत्वा ब्रह्म सत्यज्ञानादिलक्षणमात्मानं नचिरेण शीघ्रमेवा

गी॰
टी॰
प॰ ३१

धिगच्छति सात्ता करोति प्रतिबंधकाभावात् एतच्चोक्तं प्रागेव नकर्मणा
मनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते न च संन्यसनादेव सिद्धिं समधिगच्छतीति अ
नपेक्षफलत्वेपि कर्मसंन्यासात्कर्मयोगो विशिष्यत इति यत्पृष्टं तत्र उ
पन्नं [illegible]
[illegible] ६॥

सदानन्दी टीका

किमर्थं कर्मसंन्यासो नादौ कार्यः अत आह स्फुटं धीशोधकं नैव कर्मसंन्यासो
योऽहृदयात्कृतः सदुःखमाप्तुमेवाप्तिर्बुद्धिशुद्धेरभावतः ज्ञानस्यासंभवात्क
र्मत्यागाद्दुःखोन्मितो भवेत् १ कर्मानुष्ठानयुक्तस्तु शुद्धबुद्धितया मुनिः सत्व
ज्ञानमनंताख्यमात्मानं ब्रह्माधिगच्छते ३ शीघ्रमप्रतिबंधेन सम्यक्त्वात्मा
रोप्यसौ अनपेक्षफलत्वेपि संन्यासाज्ज्ञानवर्जितात् ४ श्रेयान्नाकर्मयोगो
स्ति धीशुद्ध्युपार्जनकारणं नकर्मणामनारंभादित्यत्र हरिरास्फुटं ५ धी
शुद्धिहेतुं कर्म न त्याज्यमित्युदाहृतं चित्तशुद्धिमनेत्यागायः करोति स्वक
र्मणां ६ सर्वेशाज्ञापरित्यागी पतत्येव न संशयः श्रुतिस्मृती ममैवाज्ञे तेउ
ल्लंघ्य प्रवर्तते ७ आज्ञाभंगी मम द्वेषी मद्भक्तोपि न वैष्णवः इति स्मृतेर्हरे
राज्ञावश्यकार्यतयोदिता ८ ६॥

नीलकंठी टीका

नन्वेवं निर्विकल्पस्यावश्यमपेक्षे द्वौ मार्गौ उक्तौ स्यातां तत्र नान्यः पंथा विद्य
तेऽयनायेति श्रुतिविरुद्धमित्याशंक्याह संन्यासस्त्विति संन्यासो नैष्कर्म्यं अयो
गतो योगं विना आप्तुं दुःखं हे महाबाहो अयमर्थः निर्विकल्पकसमाधि
रपि तत्त्वमसीत्येतद्वाक्यार्थप्रतिपत्त्युपायभूत एव न स्वतः पुरुषार्थ इति द्वि
तीयमार्गस्याभावान्नोदाहृतश्रुतिविरोधः शांतो दांत उपरतस्तितिक्षुः स
माहितो भूत्वात्मन्येवात्मानं पश्यतीति श्रुत्यैव शमादिवत्समाधेरप्यात्मदर्श
नार्थत्वस्य दर्शितत्वात् तथा च समाहितपदं वार्तिककारैर्व्याख्यातं स्वातंत्र्यं
भूकर्तुः स्यात्करणाकरणयोः प्रति तावेव तत्त्वनिषिद्धानि कर्माणि शमादिभिः
शमादिश्रुत्या अस्वातंत्र्यं तेन स्यात्करणाकरणयोः प्रति समाहितो ज्ञात्वा योग्यदा
नीतत्रि संयोगिविद्योते अस्वातंत्र्यं गुरूपदेशापेक्षत्वे येन स्यात्मनमेव व्यवहारनिरो
यं वपिंडीकृत्वेंद्रियग्रामं तद्द्वारा रोधयति सर्वे विषयास्तत्स्मृती स्पृष्टा तिष्ठे
चिरं वर्तयतः एवाभ्युपायः सर्वत्र वेदांतेषु प्रतिष्ठितः तत्समस्यादिवा कार्यं
तोना तत्त्वमर्थं मायाद्रादिति एवं व्यतिरेकमुक्त्वान्वयमाह योगयुक्त इति मुनिः

संन्यासी न चिरेण शीघ्रमेव ब्रह्माधिगच्छति वाक्यश्रवणमात्रेण न तु
केवलसंन्यासी यथोक्तेन च संन्यासेन नादेव सिद्धिमप्यधिगच्छतीति ६

आनंदीटीका

हे महाबाहो संन्यासस्तु भावितु नैष्कर्म्यमयोगतः श्रो
कोऽज्ञानकर्मसत्त्वशुद्ध्यभावात् किं विना दुःखमाप्तुं दुःखमागोऽप्यकृपव नत
निःश्रेयसकरः योगयुक्तोऽज्ञानकर्मसत्त्वशुद्ध्या किं तो तु नि मननशी
लो ज्ञानी न चिरेण ब्रह्माधिगच्छति तथा चायोगतोऽष्टांगयोगाभ्यासं विना
संन्यासः कर्मसंन्यासः कर्मफलसंन्यासो वा दुःखमाप्तुं दुःखप्राप्तये एव
भवति यस्तु योगेनाभ्यन्तरेण ध्यानधारणासमाधिभिः संयमेन वर्तमा
णेन युक्तः स ब्रह्म न चिरेण धिगच्छति ६ ॥

रामकंठीटीका

तदाह अयोगतो योगाद्यथोक्तनीत्या कर्मानुष्ठानसमाधानादि विना संन्यासः पु
नर्बन्धसंबन्धाभावफलः कर्मत्यागः प्राप्तुमा[...]साधयितुं दुःखं कष्टेनाप्य
त इत्यर्थः यस्माद्योगयुक्तः योगे कर्मसमाधौ युक्तो यथोक्तज्ञानैकतानत
या नित्यसंबन्धः सन्मुनिर्भूत्वा शीघ्रमेव ब्रह्म परमात्मलक्षणं परं तत्त्वमधि
गच्छति आत्मतया समासादयति किमुक्तं भवति ज्ञाननिष्ठत्वेन स्वकर्मानु
ष्ठानं मुनित्वकारणं ब्रह्म[...]प्राप्तिलक्षणस्य फलस्यानुकूलाविसंवादकपाय
त४ भूतात्[...] ॥

लासिकी[...]टीका

तमेव विशेषमाह ॥

यदुक्तं कर्मयोगो विशिष्यत इति
तुरवधारणे हे महाबाहो अयोगत उक्तरीत्या कर्मानुष्ठानसमाधानादि
नासंन्यासो विकल्पास्फुरणेन कर्मत्यागः प्राप्तुं दुःखमेवाशक्यमेवाना
प्यत इत्यर्थः सर्वसंकल्पदाहकज्ञानधारणाधिरोहं विनाप्तानीत्या कर्म
णां दुः[...]संन्यसनात् अतो योगकर्मसमाधानयुक्तः संवरो मननिमनता
शीलः सदाप्रमत्तो ब्रह्म निरुपाधिकं परं तत्त्वं न चिरेण शीघ्रमेवाधिगच्छ
ति आत्मतया समासादयति अतः कर्मयोगो विशिष्यते प्रथमोपायभूत
त्वात्[...] ६ ॥

पंचोलीटीका

तर्हि आदित एव संन्यासः कर्तव्य उक्त इति मत्वा नेत्याह संन्यासस्त्विति
हे महाबाहो तत्र तु संन्यासः सर्वकर्मणां त्यागः अयोगतः ईश्वरार्पि

फलनिरपेक्षकर्मविना दुःखंप्राप्तुं दुःखायैव भवति योगयुक्तः ^कर्मयोगयुक्तः मुनिः
ब्रह्मवित् अचिरेणातिशीघ्रं मुनिर्मननशीलः संन्यासी भूत्वा ब्रह्म सत्य
ज्ञानादिलक्षणमात्मानं शीघ्रमेवाधिगच्छति शीघ्रमेव ब्रह्मपरमार्थ
ज्ञानहेतुसंन्यासं वा अधिगच्छति प्राप्नोति ६ ॥

रगावीरसमिद्धार्थिनी ॥

नन्वकर्मयोगस्य कर्मसंन्यासं विना सत्येवा सिद्धिरुक्ता निर्णयेन त
दुत्तरलक्षणाभावित्वात् कर्मसंन्यासस्य तु प्रागेवोत्पत्तेः कथमित
रं विना सिद्धिरित्यर्जुनाभिप्रायमाशङ्क्य केवलस्य निषिद्धकर्मसं^
न्यासस्य न प्रवृत्तिनिमित्तीभूतप्रयोजनवत्त्वं विहितकर्मानाचरणे
योगातिलक्षणप्रत्यवायदर्शनादित्यभिप्रायेणोत्तरयति संन्यासस्त्वि
ति हे महाबाहो अर्जुन अयोगतो विहितकर्मयोगं विना संन्यास उक्त
लक्षणः स्ववर्णाश्रमे प्रतिनिषिद्धानां वर्णान्तरोचितानां तपस्याकृ^
षिवाणिज्यादीनां कर्मणायमैथमेवमांकायात्मकानां मानसिकव्या
पाराणां च त्यागः स दुःखं राज्यभ्रंशकीर्त्यादिलक्षणमैहिकं नरका
दिलक्षणं पारलौकिकं च प्रापयितुं नेय इति शेषः अन्तर्भावितण्यर्थोऽत्रा^
पिः अतश्च संन्यासो विहितकर्मप्रवृत्तिलक्षणयोगनिष्पत्तिफल
को योगश्चोभयलोकप्राप्तिफलक इति साक्षात्परंपरयापि तयोर्वै
कफलत्वमेवेति तयोरनैकान्तिकत्वमिति भावः तदेतदाह योग
युक्त इति मुनिर्गुणपाशबद्धवाक्येऽमता कथंभीष्ममहं संख्ये इत्यादि
प्रकारपर्यन्तयोगे युञ्जीथमास्थितस्तस्माद्दृढनिश्चयः क्षत्रियवीरः यो
गयुक्तः कर्मसु प्रवृत्तिमान्सन् अल्पयत्नैर्वै रसाध्यं राज्यस्वर्गोभय^
लोकभोगरूपं परमेश्वराख्यतत्त्वसायुज्यलक्षणापवर्गरूपं च
फलं शीघ्रमेवाधिगच्छति ६ ॥

मधुभाष्य

संन्यासस्त्विति योगाभावे मोक्षादिफलं न भवति अतः कामम
यादि दुःखमेव तस्य मोक्षाद्येव हि फलं अन्यत्तत्फलमस्त्वबाद

फलमेवेत्याशयः तच्चोक्तं विनामोक्षफलं यत्नेन तत्फ
लमुदीर्यते इति पाशे यत्नमहत्फलयोग्यं तस्याल्पं फल
मेव न भवति यथा पक्वरागस्य तंडुलमुष्टिः महाफलस्य
योग्यत्वमुक्तस्येतान्यामत्यादि ८ ॥

33

भाषा अनुवाद

जो ऐसा है कि योगी लोगों को भी शीघ्र ही संन्यास ही से ज्ञाननिष्ठा होती और ज्ञानके द्वारा मोक्षपद पावते तो फिर संन्यास से कर्मयोग को अधिक क्यों पीछे कहा उचित है कि प्रथम ही से संन्यास करे इस संशय युक्त अर्जुन के प्रति भगवान कहते हैं कि प्रथम कर्मयोग के किये विना हे महा बाहो अर्जुन संन्यास का अभ्यास करना अति कठिन और दुःख का मूल है क्योंकि चित्तशुद्ध भये बिना ज्ञान होना असंभव है परन्तु कर्म के अनुष्ठान करने वाले मुनि लोग चित्तशुद्धि के द्वारा संन्यासी होय अर्थात् कर्म छोड़ कर अविरात करे शीघ्र ही ब्रह्मपद को प्राप्त होते हैं याने ब्रह्म रूप होजाते हैं इससे चित्तशुद्धि के पहले निष्काम कर्म करना ही संन्यास से श्रेष्ठ होता है ६॥

दोहा॥

विना योग संन्यास नर दुख से प्रापत होय जो मुनि योग हि युक्त है सो ब्रह्म हि होय सोय ६॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्व
भूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

शांकरभाष्य

यदा पुनरयं सम्यग्दर्शनप्राप्त्युपायत्वेन योगेनेति योगेन युक्तो विशुद्धात्मा वि
शुद्धसत्त्वो विजितात्मा विजितदेहो जितेन्द्रियश्च सर्वभूतात्मभूतात्मा सर्वेषां ब्र
ह्मादीनां स्तंबपर्यंतानां भूतानामात्मभूत आत्मा प्रत्यक्चेतनो यस्य स सर्व
भूतात्मभूतात्मा सम्यग्दर्शीत्यर्थः स तत्रैवं वर्तमानो लोकसंग्रहाय कर्म कु
र्वन्नपि न लिप्यते योगयुक्तो न कर्मभिर्बध्यत इत्यर्थः ॥ ७ ॥

आनंदगिरिटीका

ननु पारिव्राज्यपरिहरेण श्रवणादिसाधनमसकृदनुतिष्ठतो लब्धसम्यग्बोध
स्यापि यथापूर्वं कर्माण्युपलभ्यंते तानि च बन्धहेतूनि भविष्यंतीत्याशंक्या।
श्लोकांतरमवतारयति यदा पुनरिति सम्यग्दर्शनप्राप्त्युपायत्वेन यदा पुनरयं
पुरुषो योगयुक्तत्वादिविशेषणः सम्यग्दर्शी संपद्यते तदा प्रातिभासिकीं।
प्रवृत्तिमनुसृत्य कुर्वन्नपि न लिप्यते इति योजना योगेन नित्यनैमित्तिकक
र्मानुष्ठानेनेति यावत् आदौ नित्याद्यनुष्ठानवतो रजस्तमोमलाभ्यामकलु
षितं सत्त्वं सिद्ध्यतीत्याह विशुद्धेति बुद्धिशुद्धेः कार्यकरणसंघातस्यापि स्वाधी
नत्वं भवतीत्याह विजितेति तस्य यथोक्तविशेषणवतो जायते सम्यग्दर्शन
मित्याह सर्वभूतेति सम्यग्दर्शिनस्तर्हि कर्मानुष्ठाने कुतस्त्यं तदनुष्ठाने वाका
तो बंधविश्लेषसिद्धिरित्याशंक्याह स तत्रेति सम्यग्दर्शने सत्यर्थः ॥ ७ ॥

स्वामिकृतटीका

कर्मयोगादिक्रमेण ब्रह्माधिगममुक्त्वापि तदुपरितनेन कर्मणा बंधः स्या
दित्याशंक्याह योगयुक्त इति योगेन युक्तः अत एव विशुद्धः आत्मा चित्तं यस्य
अत एव विजित आत्मा शरीरं यस्य अत एव विजितानींद्रियाणि येन त
तश्च सर्वेषां भूतानां आत्मभूत आत्मा यस्य सः लोकसंग्रहार्थं स्वाभावि
कं वा कर्म कुर्वन्नपि न लिप्यते न बध्यत इत्यर्थः ॥ ७ ॥

पैशाचभाष्यटीका

अतो योगयुक्तो विशुद्धात्मा प्राप्तसत्त्वशुद्धिः विजितात्मा रागद्वेषाभ्यामना
क्रम्यमाणः जितेन्द्रियः सर्वभूतात्मभूतात्मा सर्वेषु भूतेष्वात्मैकत्वदर्शी
कर्माणि कुर्वन्नपि तत्फलैर्न लिप्यते न संबध्यते ॥ ७ ॥

रामानुजभाष्य

गी॰ टी॰ पं॰

35

योगयुक्त इति योगयुक्तस्त[illegible]शास्त्रीयपरमपुरुषाराधनरूपे विशुद्धकर्म
णि वर्तमानमनस्त्वेन विशुद्धमनेर्विजितात्मा स्वाभ्यस्ते कर्मणि व्याप्तमन
स्त्वेन स्ववेन विजितमनास्तत एव विजितेंद्रियः स्वाकर्तरात्मनो याथात्म्या
नुसंधाननिष्ठतया सर्वभूतात्मा सर्वेषां देवादिभूतानामात्मभूत आत्मा यस्य
सो सर्वभूतात्मभूतात्मा आत्मयाथात्म्यमनुसंधानस्य हि देवादीनां स्वस्या
चैकाकारत्वात् देवादिदेहानां प्रकृतिपरिणामविशेषरूपतयात्माकारतासं
भवात् प्रकृतिविमुक्तः सर्वत्र देवादिदेहेषु ज्ञानैकाकारतया समानाकार इति
निर्दोषं हि समं ब्रह्मेत्यनंतरं वक्ष्यते स एवंभूतः कर्म कुर्वन्नपि अनात्मन्यात्मा
भिमानेन न लिप्यते अतो न चिरेणात्मानमाप्नोतीत्यर्थः अतः सौकार्याच्छैघ्र्या
च्च कर्मयोग एव श्रेयान् ७॥

अभिनवगुप्तकृतटीका उपक्रमं ७ स्पष्टार्थमू

परमार्थप्रपाटीका

अथोक्तप्रमेये दृष्टौ कुर्वन् कर्मलेपाभावक्रममाह योगयुक्त इति योगे
न कर्मयोगेन युक्तस्तेन निष्पादितेन योगयुक्तः अत एव विशुद्धः शुद्धात्मा चित्तं यस्य
अत एव तद्वशवर्ती विशुद्धात्मा देहो येन अत एव तत्सेवनात् निर्जितानीन्द्रि
याणि येन स तथाभूतः सर्वभूतानामात्मभूत आत्मा यस्य सर्वेषु भूतेषु समत्व
दर्शनाद्भूतः एवमात्मा कर्म कुर्वन्नपि न लिप्यते न बध्यते ७॥

वनमालीटीका

नै॰ ननु कर्मणां बंधजनकत्वरीतिकर्मबंधकत्वश्रवणात् कथं तेन मोक्षो लाभ आह यो
गेति फलेच्छामन्तरेण भगवदाराधनरूपकर्मयोगेन युक्तो विशुद्धात्मा रजस्तमो
भ्यामकलुषितमना अत एव जितबाह्यान्तरिंद्रियजातस्तस्मात् स योगयुक्तोपि ए
तादृशस्य तत्त्वज्ञानमवश्यं भवतीत्याह सर्वेति सर्वभूतानामात्मभूते मयीश्व
रे सर्वान्तर्यामिणि आत्मा मनो यस्य सः सर्वभूतात्मभूतात्मा एष त आत्मान्त
र्याम्यमृत इति श्रुतेः अंतर्यामिण एव कारयितृत्वं स्वस्य स्वतोकर्तृत्वस्य च ज्ञा
नात्कर्मफललेपाभावात् अतः करणशुद्ध्या संन्यासस्तत्तत्त्वज्ञानमिति भावः
मुमुक्षादशायां साधनत्वेन तज्जीवन्मुक्तिदशायां प्रारब्धकर्मवशात् क्रियमाणा
न्यपि कर्माणि न लिंपंते स्वस्य स्वतोकर्तृत्वानुसंधानादिति भावः ७॥ पं॰

कुसुमवैजयन्ती

यदृशः स्वात्मा सर्वभूतानां प्रियतरः स्यादित्याह योगयुक्त इति योगे फलानुसंधाना
रहिते मदाराधनलक्षणे कर्मयोगे युक्तो विरतप्रीतिर्युक्तः अत एव तत एव तो वि

शुद्धात्मा विशेषेण शुद्धो विषयवासनारहितः आत्मा मनो यस्य सः भगवदा
राधनरूपेण कर्मणा निर्मलीकृतान्तःकरण इत्यर्थः तदेवं कृतो विजितात्मा
विशेषेण जितः स्ववशीकृतः आत्मा मनो येन सः अत एव जितेन्द्रियः जिता
नि स्वाधीनकृतानीन्द्रियाणि बाह्यानि दशेन्द्रियाणि येन तथा सः सर्वेषां प्रा
कृतवस्तूनां प्राचीनानामन्त्य इत्यर्थः अत एव सर्वभूतात्मभूतात्मा सर्वेषां भू
तानां प्राणिनामात्मभूतः प्रियतर आत्मा देहो यस्य तथा सः यद्वा सर्वेषां
ब्रह्मादिस्थावरान्तानां भूतानां जीवानामात्मभूतः स्वरूपभूतः आत्मा स्वस्वरू
पो यस्य तथा सः प्रकृतिकार्यरूपविविधदेहेन्द्रियादिसंघकृतेन नानाविधा
कारदृश्यमानत्वेपि स्वस्य च सर्वेषां जीवानामात्मनो प्रकृतिसंसर्गविरहितत्वेन
तत्स्वरूपत्वाज्ज्ञानादिधर्माश्रयत्वापरत्वेन समानाकत्वाद्वाणुपरिमाणक
त्वाच स्वस्वरूपसमानाकारवदित्यर्थः निर्दोषं हि समं ब्रह्मेति वक्ष्यमाणत्वात्
एवंभूतो मुमुक्षुः कर्म कुर्वन्नपि प्राकृतेषु नात्मस्वदेहादिष्वहंकर्तृत्वाकार
केनाभिमानेन न लिप्यते किं तान्मानं प्राप्नोति तस्मात्कर्मयोग एव श्रेयस्कर इत्यर्थः

ननु कर्मणो बंधहेतुत्वाद्योगयुक्तोपि निर्बं मधुसूदनी टीका न्धाधिगन्तेत्युपपन्न मित्यत आह दित्वा

भगवदर्पणफलाभिसंधिराहित्यादिगुणयुक्तः शास्त्रीयकर्मयोग इत्यु
च्यते तेन योगेन युक्तः पुरुषः प्रथमं विशुद्धात्मा विशुद्धो रजस्तमोभ्यामक
लुषित आत्मा अन्तःकरणरूपं सत्वं यस्य स तथा निर्मलान्तःकरणः सन् वि
जितात्मा स्ववशीकृतदेहः ततो जितेन्द्रियः स्ववशीकृतसर्वबाह्येन्द्रियः एते
न मनोवाक्कायसंयमरूपत्रिदण्डीकथितः वाग्दण्डोथ मनोदण्डः कायदण्डस्तथैव च यस्यैते
नियता दण्डाः स त्रिदण्डीति कथ्यते वागिति बाह्येन्द्रियोपलक्षणं एतादृशस्य
तत्त्वज्ञानमवश्यं भवतीत्याह सर्वभूतात्मभूतात्मेति सर्वभूत आत्मभूतश्च
आत्मा स्वरूपं यस्य स तथा जडाजडात्मकं सर्वमात्ममात्रं पश्यन्नित्यर्थः स
र्वेषां भूतानामात्मभूत आत्मा यस्येति व्याख्याने तु सर्वभूतात्मेत्येतावतै
वार्थलाभादात्मभूतेत्यधिकं स्यात् सर्वात्मपदयोर्जडाजडरूपपरत्वे तु समंज
सं एतादृशः परमार्थदर्शी कुर्वन्नपि कर्माणि परदृष्ट्या न लिप्यते तैः कर्म
भिः स्वदृष्ट्या तदभावादित्यर्थः ॥ ॥ ॥

सदानंदी टीका

कर्मणो बंधकत्वात्कथं मोक्षहेतुता स्यात् भगवत्समर्पणात्कर्मफलासं

गी॰ टी॰ ५

36

गविवर्जिते १ योगश्चाच्यते तेन युक्तः समस्त्रयमे ततः रजस्तमोमलात्स्पृ
ष्टमन्तेयस्य सशुद्धधीः २ स्ववशीकृतदेहः सन्स्वाधीनकृतेंद्रियः एतेन
मनोनिग्रहोत्र जितेंद्रीहि विजितात्मकः ३ वाग्दंडोथ मनोदंडः कायदंडस्तथैव
च यस्यैते नियतादंडाः स त्रिदंडीति कथ्यते ४ सर्वेंद्रियपरत्वं च वाकश्च
होस्ति मनुस्मृतौ ईदृशस्य भवेदेव तत्वज्ञानमितीर्यते ५ यस्यात्मा सर्व
भूतानामात्मभूतः स ईदृशः आविद्याहेतनिष्ठः संसारकृभेदमतिः शुभा
न् ६ सर्वभूतस्यात्मभूतस्यात्मा यस्येति विग्रहे जगज्जडात्मके विश्वेस्व
रूपज्ञात्मसमये मतिः ७ उभयत्राप्यवैराग्यं वा यथा सिद्धिरितीरिता ईदृश

दक्ष॰ स्तत्वज्ञं वैतप्यि लोकदृशा क्रियाः ८ ताभिर्न लिप्यते यस्मात्स्वदृष्ट्यानद
भावतः ९ ७ ॥

नीलकंठीटीका

योगेति योगेन निर्विकल्पसमाधिना युक्तो योगयुक्तः अत एव विशु-
द्धात्मा हृतिसारूप्यदोषराहित्यः आत्मा प्रत्यक्चेतनो यस्य निर्विकल्पा
वस्थायां केवल एव चेतनोस्ति नान्यदेतु के तदा द्रष्टुः स्वरूपेवस्थाने हृतिसा
रूप्यमितरत्रेति तदाहत्वभाव इतरत्रहति कालेश्च इति सौत्रपदद्वयार्थः अत्र
हेतुः यतोयं विजितात्मा विजितचित्तो जितेंद्रियश्च एवं शुद्धस्त्वंपदार्थ उक्त
स्तस्य तत्पदार्थाभेदमाह सर्वभूतात्मेति सर्वेषां भूतानां ब्रह्मादिस्तंबप
र्यंतानां विषयदेहीनां चेतनाचेतनानामात्मभूतः उपादानत्वेन स्वरूपभू
तः कनकमिव कुंडलादीनां स्वरूपभूतं कारणानन्यत्वात्कार्यस्य सर्वभूता
त्मभूत आत्मा प्रत्यक्चेतनो यस्य स सर्वभूतात्मभूतात्मा यत्तु सर्वेषां
भूतानां आत्मभूत आत्मा यस्येति भाष्ये सर्वभूतात्मेत्येतावतैवार्थलाभा
दात्मभूतत्वाधिकमिति दूषितं स्वयं च सर्वभूत आत्मभूतश्चात्मा यस्येति
विग्रहो दर्शितः तत्र संकोचकारणाभावात्सर्वपदेनैव विज्ञत्वयोर्ग्रहे
परस्यापि आत्मभूतत्वाधिकमेव सर्वभूतस्य चेतनाचेतनप्रपंचभूत आत्मा
यस्येति तत्रापीष्टार्थलाभात् सर्वं च आत्मा न स्यात्तद्भूत आत्मा यस्येति वि
गृह्य सर्वात्मभूतात्मेत्येतावतैव सिद्धेरस्य सर्वभूतपरस्य वैयर्थ्यं च भाष्य
मते ब्रह्मादीनां प्रत्यग्भूत आत्मा यस्येति श्रुत्यैव जीवेशाभेद उच्यते परस्य
त उपादानत्वलिंगेन जडमात्राभेदग्रहणे न जीवस्य ब्रह्माभेदोवगम्यत इति वि

बुद्धिरविनयः कृतवः यतोऽयं सर्वेषां प्रत्यगात्माऽतोऽहमिव सोऽपि कुर्वन्न
पि न लिप्यते असंगात्मत्वान्नात्मकर्तृदेहार्पितत्वाच्च अतस्तानेतन्मतो नावपि उ
त्वात् देहेन्द्रियादिव्यवधायकत्वाभावादित्यर्थः ७॥

आनंदीटीका

अतः परमाभ्यन्तरमेव संयमयोगं प्रपञ्चयति योगयुक्तः विशुद्धात्मा
विशुद्धो विमल आत्मा बुद्धिर्यस्य विजितः संयमेन वशीकृत आत्मा
येन एवं जितेन्द्रियः एवं सर्वेषु भूतेषु वर्त्तदेशाविधेषु आत्मभूतः सं
क्रान्तस्वकान्तिसामर्थ्याद्वक्ष्यमाणया महाविदेहाख्याया वृत्त्या त
त्कायावेशेन कर्मभोगार्थं संपन्न आत्मा यस्य स कुर्वन्नपि न लि
प्यते ७॥

रामकंठीटीका

कस्माद्योगयुक्त ब्रह्मसत्प्राप्नोति

यतो योगयुक्तः कुर्वन्नपि कर्माणि न लिप्यते ततो न चिरेणाप्यसावपि गच्छतीति सं
बंधः तदेव व्याख्यायते योगे ज्ञानकर्मसमुच्चयानुष्ठानसमाधौ युक्तस्तत्प
रतया नित्यसमाहितो योगी सम्यगविक्षेपाद्विशुद्धेषु आत्मसमाधावन्यपि स्वकर्मवे
पहेतुना तत्फलेन स्वव्यापारात्मना न लिप्यते न मलिनात्मतां नीयते यतोऽसौ वि
शुद्धात्मा देहप्रत्ययैकलक्षणो योऽतिसर्गनिर्मलाविद्यात्रस्वरूपात्मा तस्यैताव
त्यशुद्धिर्यदज्ञानाद्यविद्यावशाद्देहैकस्वरूपेणात्मादिविविधपरिच्छेदभाजि प्रति
नियते देहमात्रे स्वात्मप्रतिपत्तिः तदभावमात्रमेवास्य विशुद्धिः इत्थं विशुद्धस्या
त्मा यस्य सततया विधः सत्यस्वभावप्रतिनिश्चितात्मा भावतया स्वभाविकस्व
सादृश्यतया तत्तद्विजितात्मा जितेन्द्रियश्च अन्तरात्मेन्द्रियशब्दाभ्यां ज्ञानक्रियाशब्दा
भ्यां ज्ञानक्रियाप्रपंचो विवक्षितः स उभयात्मापि विजितः स्वशक्तित्वेन स्वेच्छा
विधेयस्वरूपत्वान्निहितत्वाद्वशीकृतो येन स एवं द्वयेन तथोक्तः एवं हि योगयुक्तः
कर्मयोगी स्वात्मा सक्रियासु वर्तमानोऽपि मुच्यते येयमकृत्रिमप्रकाशात्मक
स्वभावपरामर्शैकरूपा समाख्याता चितिः शक्तिः सैव स्वेच्छानिर्मितज्ञेयकार्यस्व
भावविषयप्रकाशात्मा प्रसरन्ती ज्ञानक्रियाभेदेन द्विप्रकारतयावभासते तस्या
अज्ञानरूपो योभेदः सोऽन्तःकरणवर्गो यः क्रियारूपः स बहिष्करणवर्ग इति स्वयं स्व
यथा प्रभारूपा शक्तिः किरणचक्रात्मनावभासते तथैवेयं स्वशक्तिरेवान्तःकर
णाबहिष्करणभावेन विजृंभते न च प्रकाशमानत्वेन स्वस्वदेशाभ्युत्तरवाच्य स्व
यैर्विषयैरेषा कलुषीकर्तुं पार्यते न हि दिनकरकिरणाः प्रकाश्यैर्नीलपीतादि
भिर्भावभेदैः स्वाभासेनोपरंजयितुं शक्यन्ते स्वतन्त्रा एवतान्प्रकाशयन्ति

गी॰
टी॰ पं॰

37

तथैवैतेऽन्तःकरणादिरूपाः शक्तिभेदा मम मध्येवं विजितात्मा जितेन्द्रियश्च
न त्वेवमपि विशुद्धात्मत्वादि व्याख्यातविशेषणविशिष्टत्वेनोपपद्यते कर्मयो
गिनो यतो विषयप्रवृत्तिस्तेभ्यश्च निवृत्तिरुपादेयत्वे हेयत्वे च विना न संभवति तत्
संभवे च रागद्वेषकलंकैर्दुर्निवारः तस्मिन्नतिक्रान्तो विशुद्धत्वादीनामपरिज्ञानार्थं
हेतुगर्भं विशेषणमाह ॥ सर्वभूतात्मभूतात्मेति सर्वाणि भूतान्यशेषाः स्था
वरजंगमाभावमापन्नाः पदार्थास्तेषामात्मभूतः स्वरूपत्वेन प्राप्तश्चात्मा विषयत्मा
स्वभावो यस्य स तथाविधः किमत्र तात्पर्यम् कर्मयोगी किल येषु विषयेषु छंत
र्बहिष्करणवृत्तिद्वारेण प्रवृत्तिनिवृत्ती भजते ते पुनस्तस्य यथोक्तज्ञाननिष्णातस्य
ज्ञत्वादेवं विपाकस्थिराप्रतिपत्तिः यथा यस्मैव चेतनाचेतनरूपाः पदार्थावि
षयमापन्नास्ते संवेद्यमानतया व्यतिरेकेण न तन्मतस्वरूपं प्रतिलंभन्ते न तत्
विदेव तेन तेन रूपेणावभासते न च तोनेन तत्स्वन्तरे किंचिदिति परमेश्वरप्र
सादापनीतमायातिमिरत्वादेकस्मिन् परमार्थसत्यात्मतत्वे निवृत्तद्वित्वावभा
सविभ्रमया समयदृष्ट्या सर्वमन्तःकरणबहिष्करणविषयात्मकं पदार्थजातं
परमात्मस्वरूपादत्यन्तमभिन्नतया निभालयन्नाशयः सहजात्मगुणस्वावि
हितासक्रियासु प्रवर्तमानो न नष्टशुद्धात्मत्वादिविशेषणव्यभिचारं भजते [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

कस्माद्योगयुक्तस्यैवब्रह्मसंपत्तिरित्याशंक्यानिषद्धविद्या ज्ञापयति

योगे कर्मानुष्ठाने युक्तो नित्यमात्मसमाहितः ...मित्यनुष्ठाह ॥ [illegible] टीका
द्धमिति प्रत्ययशून्यश्चात्मा स्वभावो यस्य स स्वरूपप्रतिष्ठ इति यावत् अत एव विशुद्धात्मा देहाद्य
विजितात्मा विजितो वशीकृतश्चात्मा स्वस्वभावो येन सः अत एव
द्रियो वशीकृतान्तर्वर्गः ततः सर्वभूतात्मभूतात्माभ्यासक्रमेण सर्वेषां भू
तानां स्थावरजंगमानामात्मभूतः स्वरूपत्वमाप्तः आत्मा स्वस्वभावो यस्य
सएवंविधो योगी कर्म कुर्वन्नपि न लिप्यते पुण्यपापादिकलंकितत्वामन्नया
न मलिनीक्रियते ब्रह्मभावापन्नत्वात् [illegible]
[illegible]
[illegible] ॥ ७ ॥

पुंचोलीटीका

कर्मयोगादिक्रमेणब्रह्मप्राप्तिर्गमेसत्यपितदुपरितनेनकर्मणाबंधः
स्यादित्याशंक्याह योगयुक्तइति योगयुक्तः कर्मयोगयुक्तः विशु
द्धात्माविशुद्धबुद्धिर्विजितात्माविजितदेहः जितेंद्रियः सर्वभूतात्मभू
तात्मासर्वेषांब्रह्मादीनामात्मभूतः आत्मायस्यसः लोकसंग्रहार्थं
कर्मकुर्वन्नपिनलिप्यते ७॥

रमावीरसमिद्धोपिनी॥

उक्तमेवार्थंद्रढयति योगयुक्तइति योगयुक्तः कर्मसुप्रवृत्तिमान्
विशुद्धात्मानिश्चयप्रद्दरणयोग्यतयानिर्मलबुद्धिः यतोविजितात्मा
विजितआत्मामनोयेनस्वायत्तीकृतेन्द्रियांतःकरणइत्यर्थः सर्वे
षांभूतानांप्राणिनामात्मभूतः परमेश्वरस्तत्रात्माबुद्धिर्यस्यसस
र्वभूतात्मभूतात्मापरमेश्वरमेवशरणीकुर्वाणइत्यर्थः यद्वा स
र्वस्यजगतोभूतेयुक्तेस्मादावृतेभूतेप्राणतीतेसमेविप्रियत्वउपा
सनायुक्ते उद्दिष्टमननेनातिहिते आत्मनियतत्वेभूतःसंपन्नआत्मा
बुद्धिर्यस्यजगज्ज्ञेयोविधानार्थेउद्दिष्टमननरूपेयत्नेप्रतबुद्धिरि
त्यर्थः यद्वासर्वत्रब्राह्मणश्वपाकादौभूतः समआत्माबुद्धिस्तेना
त्मनाकरणभूतेनभूतोयुक्तः प्रपास्यतरआत्मायत्नोयस्यब्राह्म
णत्वादिकंविहायाततात्स्विमंगीकृत्यकृतप्रयत्नप्रयोगइत्यर्थः
वक्ष्यतिच विद्याविनयसंपन्नइत्यादि यद्वासर्वेषांभूतानामात्म
भूतोधृतिभूतोधैर्यावलंबनभूत आत्माउद्दिष्टनियदरूपोयत्नोय
स्यसयत्नेनउद्दिष्टगजांतरकृतान्यायद्दंडाद्युपद्रवापसारणात्संतो
षितसर्वलोकइत्यर्थः सगुरुवधादिकं कुर्वन्नपिनलिप्यतेपा
पैरितिभावः ७॥

38

अथभाष्य

योगयुक्तइति सर्वभूतात्मभूतः परमेश्वरः यद्वा मोतीत्यादेः
सर्वात्मभूतः स्वसमीपं मत्यादानादि कर्तास्य सर्वभूता
त्मभूतात्मा संन्यासं स्पृहयति उक्तः श्लोकद्वयेन संन्यासयोग
युगपदेव कर्मण्यपि नलिप्यतइत्याह ७॥

भाषा अनुवाद

जो ऐसा कहो कि कर्म के अनुष्ठान से चित्तशुद्धि प्रभृति परम्परा प्रणाली क्रम से ब्रह्मज्ञान होने के अनन्तर इस ज्ञानी का पूर्वकृत कर्म प्रतिबंधक क्यों न होय इस आशंका पर कहते हैं कि जो पुरुष योगयुक्त अर्थात् निष्काम कर्मयोग रूप भक्ति अनुष्ठान करता है और जिसने चित्त तथा इंद्रियगण अपने वशीभूत कर राखा है औ र जो अपने आत्मा को शरीरधारी दूसरे प्राणियों के आत्मा से । भिन्न बुद्धि न करके सर्वभूतों में टिका जो चेतन रूप आत्मा तिसको अद्वैत कहे एकरूप विचार कर देखते हैं इसी से वे लोग शुद्धचित्त भिलाके अर्थ अथवा स्वभाव आधीन सोच चिंता आदि जो स ब कर्मों को करते हुये भी उन कर्मों में लिप्त नहीं होते न कर्म उनको लगते हैं ७ ॥

दोहा

योगसहित सुधबुद्धि मन जीत जितेंद्रि जोय ईश्वर में दृढ बुद्धि
जो करत लिपें नहि सोय ७॥

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् पश्यञ्शृ
ण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ८ ॥

शांकरभाष्यं

नचासौ परमार्थतः करोतीत्यत आह नैव किंचित्करोमीति युक्तः समाहितः
सन्मन्येत चिन्तयेत तत्त्ववित् आत्मनो याथात्म्यं तत्त्वं वेत्तीति तत्त्ववित् परमा
र्थदर्शीत्यर्थः कदा कथं वा तत्त्वमवधारयन् मन्येतेत्युच्यते पश्यन्निति मन्येते
ति पूर्वेण संबन्धः ८ ॥

आनंदगिरिकृतटीका

कर्माण्यंगीकृत्य तैरस्य विदुषो बन्धो नास्तीत्युक्त्वा मिदानीं वस्तुतस्तस्य कर्मा
ण्येव न संतीत्याह नचेति लोकदृष्ट्या विदुषोपि कर्माणि संतीत्याशंक्य स्वदृ
ष्ट्या तदभावमभिप्रेत्याह नैवेति साद्धं श्लोकम् अनंतरश्लोकमाकांक्षापूर्वकमुत्थाप
यति कदेत्यादिना चक्षुरादिभिर्ज्ञानेंद्रियैर्वागादिकर्मेंद्रियैः प्राणादिवायुभेदैरं
तःकरणचतुष्टयेन च तत्तच्चेष्टानिर्वर्तनावस्थायां तत्त्वदर्शी सर्वाः प्रकृतिरिंद्रि
याणामेवेत्यनुसंदधानो नैव किंचित् करोमीति विद्वान्प्रतिपद्यते इत्यर्थः ८

स्वामिकृतटीका

कर्म कुर्वन्नपि न लिप्यत इत्येतद्धि कुत इत्याशंक्य कर्तृत्वाभिमानाभावान्न वि
रुद्धमित्याह नैवेति द्वाभ्यां कर्मयोगेन युक्तः क्रमेण तत्त्ववित् भूत्वा दर्शनश्रवणा
दीनि कुर्वन्नपि इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् बुद्ध्या निश्चिन्वन्नहं
किंचिदपि नैव करोमीति मन्येत तत्र दर्शनश्रवणस्पर्शनघ्राणाशनानि च
क्षुरादिज्ञानेंद्रियव्यापाराः गतिः पादयोः स्वापो बुद्धेः श्वासः प्राणस्य ८ ॥

पैशाचभाष्यं

यत एवमतः नैवेति आत्मनोऽकर्तृत्वान्नैव किंचिदहं करोमीति मन्यते तद
र्शनादिषु कर्तृत्वस्य विचारतः प्रतिभासेऽप्यपि पश्यन् रूपमालोचयन्
शृण्वन् शब्दं स्पृशन् त्वचा जिघ्रन् गंधानुपाददानः अश्नन्नोदनान्नं जानः गच्छ
न्पदा विहरन् स्वपन् शयानः श्वसन् श्वासं विसृजन्नपि ८ ॥

रामानुजभाष्यं

अतस्तदपेति तं शृणु एवमात्मतत्त्ववित् श्रोत्रादीनि ज्ञानेंद्रियाणि वागादीनि
कर्मेंद्रियाणि प्राणाश्च स्वस्वविषयेषु वर्तंत इति धारयन्ननुसंदधानोऽहं किंचित् न
करोमीति मन्यते ज्ञानैकस्वभावस्याभावस्य मम कर्ममूलेंद्रियप्राणसंबंध
कृतमीदृशं कर्तृत्वं न स्वरूपप्रयुक्तमिति मन्यत इत्यर्थः ८ ॥

गी॰ टी॰ ५

40

परमार्थप्रपाटीका

अथयुक्तवे न लिप्यत इत्यनेन कर्तृत्वाभिमानशून्यत्वमुक्तमिममाह नैव
किंचिदिति द्वाभ्यां कर्मयोगेन युक्तः शुद्धचित्तः क्रमेण तत्त्ववित्सन् ज्ञानक
र्मेंद्रियप्राणव्यापारेष्वप्यहं किंचित्करोमीति न मन्येत ८।।

वनमालीटीका

संन्यासमेव स्पष्टयति नैवेति द्वाभ्यां युक्तो नियमितवान्तरिंद्रियः तत्त्ववि
त् अहं ज्ञानानंदस्वरूपः स्वतो निर्विकारो नैव किंचित्करोमीति मन्येत बलव
द्भिर्ज्ञानेंद्रियैर्वागादिकर्मेंद्रियैः प्राणादिवायुभिश्च तैः करणचतुष्टयेन चैतैरेत
योऽभिप्रेरितैस्तत्तद्दृष्टादृष्टक्रियमाणासु हरिप्रेरितेंद्रियादीन्येवेंद्रियार्थेषु स्व
स्वविषयेषु वर्तंते प्रवर्तंते न त्वहमिति धारयन् तत्र दर्शनश्रवणस्पर्शनघ्रा
णरसनानि चक्षुःश्रोत्रत्वग्घ्राणरसनानां पंचज्ञानेंद्रियाणां व्यापाराः प
श्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्निति उक्ताः गतिः पादयोः प्रलापो वाचः वि
सर्गः पायूपस्थयोः ग्रहणं हस्तयोरिति पंचकर्मेंद्रियव्यापाराः गच्छन् प्रल
पन् विसृजन् गृह्णन्निति उक्ताः श्वसन्निति प्राणादिपंचकव्यापारोपलक्षणम् उ
न्मिषन्निमिषन्निति नागकूर्मादिपंचकस्य व्यापारः तैः करणचतुष्टयस्य
अनाद्यविद्यया जीवस्य प्रमोहं वा यद्दृष्टसंबंधस्ततो देहेंद्रियादिष्वीश्वरप्रे
रितेषु जायमाने कर्मादिकं प्रागुक्तसंबंधेन वास्तवं जीवसंबंधेनैततोऽस्य
संसारः निःकामकर्मयोगादिनाराधितेश्वरप्रसादाद्विद्यानिवृत्तिस्ततो
देहेंद्रियतज्जन्यकर्मादिष्वहंममेत्यभिमाननिवृत्त्याभिमानरहितस्य स्वस्वा
मित्वादिसंबंधस्य जीवांतःकरणयोरभावेन कर्मादृष्टस्य सुखदुःखादिकं प्रार
ब्धकर्मादिवशाद्देहादौ लेशेनानुभवन्नपि जीवेन संबध्यते एतादृशावस्थो जीव
न्मुक्तस्य भवति मुक्तस्तगोक्तसंबंधेन दुःखादिमत्त्वापि तत्स्वरूपं सदा चिंत
यतास्वोचितं कार्यं मुक्तात्मा जलवत् क्रीडन् रममाण इति श्रुत्युक्ता क्रियावत्
स्वाम्यपि केवलस्वरूपेण निरंजनः परमं साम्यमुपैतीति श्रुत्या निर्मुक्तवनि
र्लेपतस्मानिरंतरादिनामुक्तस्य स्वरूपस्य पामुक्तेरिति भावः ८ ।।

ऊसमवैजयन्ती

न तु कर्मसंगवत्यपि देहादिषु न लिप्यते इत्यपरुक्तं तत्केन प्रकारेणेत्याशं
कयाह शुद्धस्यात्मने देहेंद्रियमनोबुद्धिप्राणादिभ्यो विलक्षणानंदरूपस्य स्वस्यतत्त्व

युक्तः कर्तृत्वं वारयति द्वाभ्याम् नैव किंचिदिति। तत्त्ववित् अहं किंचिदपि न करोमीति
मन्येतेति मन्येत यस्तत्त्वं याथात्म्यं स्वरूपं वेत्तीति तत्त्ववित्। युक्तः फलाकांक्षारहितेन भ
गवदाराधनतया कर्मणि युक्तः कर्मकर्तापि स्वस्वरूपं शुद्धं सन्न तु प्राकृताहंकार
रूपः प्राकृतेंद्रियादिप्रयुक्तो किंचिदपि स्वल्पमपि कर्म न करोमि प्राकृताचेतनव
र्गविलक्षणाद्रूपस्य चित्स्वरूपस्य मम मे तेषु तेन प्रयुक्तं कर्तृत्वं नास्ति स्वरूपप्रयुक्तं
तस्यैवेत्यर्थः। किं कुर्वन् सन्निंद्रियाणां तु प्रयुक्तं प्राणादीनां निंद्रियाणां वा
ह्याभ्यंतरकरणानि प्राणादयो दश वायवश्चक्षुरादिमेकादशपरिणामप्रयुक्तो कालेन
णानि या इंद्रियार्थेषु शब्दादिषु स्वस्वविषयेषु स्वस्वानुकूलेषु वर्तंते प्रवर्तंते इत्य
नुप्रकारेण धारयन् निश्चिन्वन्सन्निंद्रियादीनां पार्थक्येन स्वस्वविषयप्रवर्तक
त्वं दर्शयति पश्यन्। किं कुर्वन् शृण्वन् श्रवणेन शब्दान् शिरादिरूपं वाद्यादिकं वा स्पृशन्
त्वग्रवणं कुर्वन्नपि स्पृशन् त्वचा शीतोष्णमृदुकाठिन्यादिकं वस्तु स्पृशन् स्पर्शं कु
र्वन्नपि पश्यन् चक्षुषा नीलपीतादिरूपं पश्यन् अवलोकयन्नपि अश्नन् भक्षयन्नपि
घ्राणाद्यादिभक्ष्यमन्नपानादिकमश्नन् भोजनं कुर्वन्नपि जिघ्रन् नासिकया
सुगंधादिभक्ष्यादिकं जिघ्रन्नपि इत्येवं ज्ञानेंद्रियैर्व्यापारं कुर्वन्नपि प्रल
पन् वाचा शुभमशुभं वा वचनं ब्रुवन्नपि गृह्णन् हस्ताभ्यां फलपुष्पादीनां ग्रह
णं कुर्वन्नपि गच्छन् पादेन गमनं कुर्वन्नपि स्वपन् अंतःकरणव्यापारं रूपेण स्वपन्
पं व्यापारं कुर्वन्नपि श्वसन् प्राणादिपंचकेन श्वसनरूपं व्यापारं कुर्वन्नपि उन्मि
षन् निमिषन् नागादिपंचकेन उन्मेषनिमेषरूपं व्यापारं कुर्वन्नपि अध्य
क्षमवष्टभ्यात्मकर्म विहाय यत्नेषु कोपि व्यापारः एवं कर्मेंद्रियप्राणादिभि
र्युक्तः कर्तृत्वेन इतिहितस्य मम मनागपि नास्ति एवं तत्त्ववित् मन्येतेत्यर्थः ॥ ८ ॥

विसृजन् पायूपस्था
मलमूत्रादिकं त्यजन्

इव विहरणैति द्वाभ्यां ॥

मधुसूदनी टीका

+ चक्षुरादिभिर्ज्ञानेंद्रियैर्वागादिकर्मेंद्रियैः प्राणादिवायुभेदैरंतःकरणचतुष्टये
न च तत्तच्चेष्टासु क्रियमाणासु इंद्रियाणीइंद्रियाणीति इंद्रियार्थेषु स्वस्ववि
षयेषु वर्तंते प्रवर्तंते न तु अहमिति धारयन् अवधारयन् नैव किंचित्करोमीति म
न्येत मन्येत तत्त्ववित् परमार्थदर्शी युक्तः समाहितचित्तः अथवा देहो युक्तः कर्म
योगेन पश्चादंतःकरणशुद्धिद्वारेण तत्त्ववित् सन्नैव किंचित्करोमीति मन्ये
तेति संबंधः तत्र श्रवणादर्शनस्पर्शनघ्राणाशनानि च चक्षुःश्रोत्रत्वक्
घ्राणरसनानां पंचज्ञानेंद्रियाणां व्यापाराः पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्निति
वाक्पाणिपादपायूपस्थानां व्यापाराः विसर्गः पायूपस्थयोः ...

गी॰
टी॰
पं॰

41

पंचकर्मेंद्रियाणांव्यापाराः ८ ॥

सदानंदी टीका

द्वाभ्यांतदेतदेवेशोविहाराोतिस्फुटंहरिः धीशुद्ध्याशक्तपवादोभूतानतत्त्ववि
देवसः क्रियमाणांसचेष्टासनकरोमीतिमन्यते ८ ॥

नीलकंठी टीका

[illegible]
[illegible]
[illegible] नलिप्यतइत्येतदुपपादयति नैवेतिद्वाभ्यां तत्त्ववित्
हंनैवकिंचित्करोमीतिमन्येतमन्यते तत्रहेतुः इंद्रियाणिउपलक्षणमिदंप्रा
णादेरपि इंद्रियादयःइंद्रियार्थेषुस्वेषुविषयेषुवर्तंतेइतिधारयन्निश्चित्वन्
वस्तानेंद्रियाणांव्यापाराः गमनविसर्गप्रलपनग्रहणानिकर्मेंद्रियाणां तानिच
कर्मांत्वेप्राणस्यैतिविभागः कमस्वविवक्षितःएतानिजर्वेन्नश्यभिमानाभावा
नलिप्यतेइत्यर्थः ८ ॥

आनंदीटीका

कथमित्याह युक्तोज्ञानकर्मसमुच्चयात्तुष्टानसर्वंसेयमाभ्यासीनतत्त्ववि
त् विषयेंद्रिययोर्ग्राह्यग्राहकतोविदन्नपश्यञ्जालोचयन्नित्यर्थोवगमा
शृण्वन्स्पृशन्जिघ्रन्नितिश्रोत्रंस्पर्शनितित्वचं जिघ्रन्नितिघ्राणंअश्नन्नितिरस
नेगच्छन्नितिपादौस्वपन्नितिप्राणेन स्वपन्निति निरिंद्रियप्रदेशेमन
नसोवस्थानेनिद्रेतिलक्षणाउपगमान्मनः ८ ॥

रामकंठीटीका ॥

नैमेतंकर्मयोगिनःसमाधिमासनप्राणजयप्रत्याहाराद्यभ्यासपरि
कर्मनिरपेक्षंयथोपस्थितविषयपर्श्यश्यविलसपरवैराग्यंसर्वथास
वेदासर्वस्यतुलभपरमात्मप्रतिष्ठालाभलक्षणंनिरतिशयहृल्पफ
लंवितन्प्रतिपादयितुमाह ॥ उत्तरश्लोकेगम्यार्थम् ८ ॥

लासिकी टीका

कर्मकुर्वन्नपिनलिप्यते इत्येतद्विरुद्धमित्याशंक्य कर्तृत्वाभिमाना
भावान्नविरुद्धमित्याह ॥ उत्तरश्लोकेगम्यार्थम् ॥ ८ ॥

पंचोलीटीका

कुर्वन्नपि न लिप्यते इति विरुद्धमाशंक्य कर्तृत्वाभिमानाभा-
वान्न विरुद्धमित्याह नैवेति युक्तः समाहितस्तत्त्ववित् आत्म
नो याथात्म्यवित् अहं किंचिन्नैव करोमीति मन्येत चिंतयेत्क
दा कथं तावत्तत्त्वमवधारयन् मन्येतेत्युच्यते पश्यन्निति सा
र्धेन तत्त्ववित्परमार्थदर्शी दर्शनश्रवणादिक्रियां कुर्वन्नपि इंद्रि
याणि इंद्रियार्थेषु वर्तंते नाहं किंचित्करोमीति अवधारय-
न् चिंतयन् सन् मन्यते ८ ॥

रणा वीरसमिद्धायिनी ॥

न कर्मणामनारंभादित्यत्र सूचितां नैष्कर्म्यसिद्धिं विवृणोति नैवे
ति नाप एवेति पदच्छेदः एवशब्दो भिन्नक्रमः करोमीत्यनेन संब
ध्यते तथा चायमर्थः नाप्नुरुषः पौरुषत्वलक्षणविशिष्टः क्षत्रिय-
वीरः युक्तः प्राप्तकर्मयोगः तत्त्ववित् कर्मसंन्यासयाथात्म्यज्ञान
वान् एवं मन्येत निश्चिनुयात् अहं किंचित्कर्म करोम्येव न पुनः स
र्वथा कर्मयोगः संभवतीति कोर्थः सर्वथा कर्मत्यागलक्षणो नैष्क
र्म्यं न सिध्यतीति कुतो न सिध्यतीत्याह यतः इंद्रियाणि विषयेषु प्र
वर्तंते प्रवृत्तिमंतो भवंतीति धारयन् देहत्वेन जानन् कथं वर्तंते
इत्यतो विशिनष्टि पश्यन्नित्यादि यतो दर्शनादिव्यापारान्कुर्वन्
तत्र दर्शनश्रवणस्पर्शनाघ्राणाशनानि चक्षुरादिबुद्धींद्रिय-
व्यापाराः गतिः पादयोः स्वापो बुद्धेः श्वासः प्राणस्य प्रलपनं वाचः
विसर्गो मलमूत्रोत्सर्जनमुपस्थयोः ग्रहणं हस्तयोः उन्मिषणनि
मिषणे कूर्माख्यप्राणस्येति विवेकः अत्र चेंद्रियाणां रूपादिषु दर्श
नादिव्यापारवत्त्वात्सर्वथा कर्मणामत्यागो सिद्धे किं प्रयोजनो विहि
तरूपाणां तेषां त्याग इति निरयादिनिवर्तनप्रयोजनो निषिद्धकर्म
त्याग एव स्वीकार्यो न पुनर्वैदिककाम्यादि कामभयफलककर्मणां त्यागो

42

पीतिभावः यद्वा न केवलमारंभाव्यवहितपूर्वदशापर्वोक्तलद
णोनिश्चयो विषयोपि तु शुद्धमारभ्यापि मध्ये सर्वदा सविषये यद्य
स्यात् नैवेति युक्तः कर्मसु प्रवृत्तः क्रियाप्रवीरः तत्त्ववित् शुद्धमा
त्मस्वरूपज्ञानवान् एवं मन्येत निश्चिनुयात् कथमित्यत अहं किं
नैव करोमि करिष्यामि अपि तु संवेडुः साध्यमपि साधयिष्यामीति
वर्तमानसामीप्ये वर्तमानवद्वापि लट् कीदृशः सन्नेवं निश्चिन्वी
तेत्याह पश्यन्नित्यादि पश्यन् चक्षुषा लक्ष्यमवलोकयन् तथा
शृण्वन् परप्रेरितां मम छिद्रदत्तेजोवधनिमित्तभूतां वाचः श्रुति
गोचरीकुर्वन् तथा स्पृशन् तत्प्रयुक्तं पादादिकं रूक्षयादेः संलग्नम
नुभवन् तथा जिघ्रन् रक्तमांसवसादिगंधं घ्रिंघ्रमाणः तथाश्नन्
कोथेन रदैरदक्षदान्दधान् यद्वा वीरपानादिकं कुर्वन् अश्नाति
रसपानविशेषपरः तथा गच्छन् रथादिना पद्भ्यां वा प्राप्नु संसुत्वंप
तिष्ठमानः तथा स्वपन् पाने पारदात् स्वस्यपाः स्वपास्ववदाम
तत्करोतीति स्वप स्वरत्नकः सारथिः सश्वाचरमीति स्वपन् स्वं
यातिरत्नतीति प्रतोनुपेतिडे स्वपः सारथिः सश्वाचरन् स्वपन्
सारथिमरणे सति तत्कर्मापि स्वयमेव कुर्वन्नित्यर्थः यद्वा यत्नतः
पाहूनिरत्नस्य त्वगां विश्रमार्थं स्वापमपि कुर्वन् यद्वा दिने समर
कर्म कृत्वा रात्रौ श्रमापनोदार्थं निद्रां भजन् तथा श्वसन् सर्पवद्वा
कोय विषमक्लिश्यन् यद्वा कारणकार्योपचाराच्छ्रमकार्येण श्वासे
नाभिव्याप्तोपि श्रमार्तोपीतियावत् तथा प्रलपन् परस्परं वीर
गोष्ठीमाचरन् तथा विसृजन्नगारादीन्मुञ्चन् तथा गृह्णन् अस्त्रा
रिणासंहरन् यद्वा परप्रहितानि प्रशस्त्राणि याद्वा निरस्वकरेणान रुद्धी
त्वा तं प्रत्येव प्रतिविसृजन् यद्वा तत्सृष्टानि शस्त्राणि स्वीकुर्वन्
वीरादिन्यस्तासिवाच्छदीष्व सिवेन्नुक्तास्तव्यामीतितेन प्रयुक्ते शु
ह्णाति दद्यामीत्युक्ते मुंचतीति तथोन्मिषन् स्वयं वा दृष्ट्वादि पा
यागे विहृतनेत्रः परप्रयुक्ताच्छादीचनागतूकस्य तथा निमिषन्

अस्वदेवतास्मरणादौ क्षणमक्षिमीलनं कुर्वन् तथाइंद्रियाणि
कर्मेंद्रियाणि हस्तपादादीनि विषयेषु भाषणादिषु वर्तंते प्रयो
गसमर्थानि भवंति न पुनः शिथिलानीति धारयन् हे तवेनम
नसा निश्चिन्वन् यतश्चममसर्वाणि हस्तादीनि कर्मेंद्रियाणि
चक्षुरादीनि ज्ञानेंद्रियाणि च स्वस्वविषयग्रहणसमर्थानि भ
वंति ततोहं सर्वं युद्धकर्मापि महारथजयं करिष्यामीति निश्चि
न्वीतेति भावः ८ ॥

मधुभाष्य

८ ॥

43

भाषा अनुवाद

और जो ऐसी शङ्का करो कि कर्म्म अनुष्ठान करके भी उसमे लिप्त
कहे आशक्त नहोना यह अत्यन्त असंभव है लिप्त हीहोगा इस प
र दो श्लोकसे कहते हैं कि कर्त्तत्व अभिमान रहित होना असं
भव नहीं है क्यों कि निष्काम कर्मयोग रूप भक्ति अनुष्ठान
करने वाले मनुष्य क्रमसे तत्वज्ञानी होयके दर्शन आदि इन्द्रि
यव्यापार करते भी इन्द्रिय सव अपना अपना काम करतीहैं
और हम कछुभी नहीं करते ऐसी बुद्धि उनको निश्चय वनी
रहती है यथा दर्शन श्रवण पर्श घ्राण भोजन ये ज्ञान इन्द्रियों
के व्यापार और गमन वचन विसृजन कहे विष्टा मूत्र त्याग जो
कर्म इन्द्री के काम औ ग्रहण जो करका व्यापार औ स्वपन बुद्धि
व्यापार निद्राहोना श्वसन् प्राणवायु व्यापार और उन्मेष नि
मेष कहे पलक लगना खुलना जो कूर्म वायुसे होताहै यह स
व इन्द्रिय आदि का कर्म है और हमद्रष्टा साक्षी रूप है यह कछु
नहीं करते ऐसेही ज्ञानी पुरुष इन कर्मो मे अभिमान शून्य लि
प्त नहीं होते हैं सोई कहा दो श्लोकसे कि इन्द्रियाणीन्द्रियार्थे
षु वर्त्तन्ते इति पर्यन्त यहा तक ८ ॥

चौपई

करों नाहि मे कर्म्म कहुं किंचित ऐसें माने युक्त जो तत्ववित देष
त सुनत पर्सत सूंघत खावत चलत पायन दि स्वासत ८

55

प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि । इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥

शांकरभाष्यं

यस्यैवं तत्त्वविदः सर्वकार्यकरणचेष्टासु कर्मसु अकर्मैव पश्यतः सम्यग्दर्शिनस्तस्य सर्वकर्मसंन्यास एवाधिकारः कर्मणोऽभावदर्शनान्नहि मृगतृष्णिकायामुदकबुद्ध्या पानाय प्रवृत्त उदकाभावज्ञानेऽपि तत्रैव पानप्रयोजनाय प्रवर्तते ॥ ९ ॥

आनन्दगिरिकृतटीका

यथोक्तस्य विदुषो विध्यभावेऽपि विद्यासामर्थ्यात् प्रतिपत्तिकर्मभूतं कर्मसंन्यासं फलात्मकमभिलषति यस्येति अतत्त्वविदुषोऽपि कर्मसु प्रवृत्तिसंभवात्ततः संन्यासेऽधिकारः स्यादित्याशंक्याह नहीति ॥ ९ ॥

स्वामिकृतटीका

प्रलपनं वागिन्द्रियस्य विसर्गः पायूपस्थयोः ग्रहणं हस्तयोः उन्मेषणनिमेषणे कूर्माख्यप्राणस्येति विवेकः एतानि कर्माणि कुर्वन्नपि अभिमानाभावात् ब्रह्मवित् न लिप्यते तथा च परमार्थसूत्रं तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ ९ ॥

पैशाचभाष्यं

तथा प्रलपन् भाष्यमाणः विसृजन्मूत्रपुरीषे विसृजन् गृह्णन् हस्तेनोपाददानः उन्मिषन्निमिष… निमीलोन्निमीलन्नपि … इन्द्रियाणि चक्षुरादीनि इन्द्रियार्थेषु विषयाभिमुखं वर्तन्त इति धारयन्मन्यमानः नैव किंचित्करोमीति युक्तो मन्येत तत्त्वविदिति पूर्वेण संबंधः यस्यैवं तत्त्वविदः सर्वकार्यकारणचेष्टासु कर्मसु अकर्मैव पश्यतः सम्यग्दर्शिनः सर्वकर्मसंन्यास एवाधिकारः न कर्मणोऽभावदर्शनात् नहि मृगतृष्णिकायामुदकबुद्ध्या पानाय प्रवृत्त उदकाभावज्ञानेऽपि तत्रैव पानप्रयोजनाय प्रवर्तते ९

रामानुजभाष्यं ९ पूर्वश्लोके उक्तम्

श्रीमधुसूदनकृतटीका ९ स्पष्टार्थम्

परमार्थप्रपा

अथ येन देवाह पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन्निति ज्ञानेन्द्रियकर्तव्यं तथा गच्छन् प्रलपन् गृह्णन् कर्मेन्द्रियकर्तव्यं तथा स्वपन् उन्मिषन् निमिषन्निति प्राणकर्तव्यं एतत्सर्वं मया किमपि न करोमीति मन्येत न तु क्रियमाणं कार्यमे

गी॰ टी॰ पं॰

45

तदहंकरोमीति यः कश्चिज्ज्ञानात्मेव स कथं न मन्येतेत्याशयं काह इंद्रियाणी ति ९॥

वनमालीटीका उपक्रमे ९॥ पूर्वश्लोके उक्तार्थं

ऊरुगमवैजयन्ती उपक्रमे ९ पूर्वश्लोके उक्तार्थं

मधुसूदनी टीका

गच्छन्प्रलपन्विसृजन्गृह्णन्नित्यत्र गताः पश्यन्निति प्राणादिपंचकस्य व्यापारोपलक्षणं उन्मिषन्निमिषन्निति नागकूर्मादिपंचकस्य स्वपन्निति अंतःकरणचतुष्टयस्यार्थक्रमवशात्पाठक्रमभंगे क्वाप्याव्याख्यातोयं श्लोकः। यस्मात्सर्वव्यापारेष्वात्मनोऽकर्तृत्वमेव पश्यति अतः कुर्वन्नपि न लिप्यत इति युक्तमेवोक्तमिति भावः ९॥

ध्या॰ ५

सदानंदी टीका

ज्ञानकर्मेन्द्रियैः कर्मदृष्टाभिस्तत्तद्यथायथं कुर्वन्नकर्तृतावृत्त्या पश्यन्नात्मानमक्रियं स्मरन्प्राणैः स्वपन्नन्तःकरणेन चिन्तयन् तथा उन्मिषन्निमिषन्नेवं नागकूर्मादिपंचकैः एतानि स्वस्वविषये वर्तन्ते न त्वहं किंचिदिति धारयन्सर्वव्यापारेष्वात्मानमक्रियं विदन् कुर्वन्न लिप्यते वा तो युक्तमेवेति वचः ९॥

नीलकंठी टीका उपक्रमे ९

आनन्दी टीका

प्रलपन्निति वाचं विसृजन्निति पायूपस्थयोः गृह्णन्निति हस्तयोः उन्मिषन्निति चक्षुर्व्यापारयन्निति तेष्वयं ज्ञानेन्द्रियकर्मेन्द्रियप्राणान्तःकरणानां व्यापारं कुर्वन्नपि इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् विषयेन्द्रिययोर्हि ग्राह्यग्राहकात्मको यः संबंधः स्वाभाविकोऽनपायी आत्मनस्तु फलानपेक्षस्य न कश्चिदेभिः सम्बन्ध इत्यवधारयन् नैव किंचित्करोमि फलग्रहणाभावात् कृतमकृतमेवेति ज्ञानेन अथ चतुष्कं अभ्यन्तरयोगाभ्यासेन पूर्वपूर्वभूमिजयादुत्तरोत्तरां भूमिं आरुह्य तत्त्वविन्मुमुक्षुः प्रज्ञालोकः पश्यञ्शृण्वन्निति संयमादिन्द्रियसिद्धिः इन्द्रियार्थेषु वर्तन्त इत्यवधारयन् योगानुशासने द्वितीये पादे इन्द्रियाणां विषयासंप्रयोगे चित्तस्वरूपानुकार इव प्रत्याहार इति ततः परमावश्यतेन्द्रियाणामिति सूत्रद्वये शब्दादिष्वव्यसनमिन्द्रियजय इत्येको रागद्वेषाभावे सुखदुःखशून्यं शब्दादिज्ञानमिन्द्रियजय इति केचित् चित्तैकाग्र्यादप्रतिपत्तिरेवेति जैगीषव्य इति त्रयाणामवगमात् धारणाविषयीकृतैर्नैव किंचित्करोमीति मन्येत एवं ध्यानधारणासमाधिसमुदायसंज्ञके संयमे दृढाभ्यासपरिग्रहणस्वरूपाभिन्नान्तर्याणि च संयमादिन्द्रियजय इति सूत्रे शब्दादिषु विषयेषु श्रोत्रादीनां वृत्ति

तदनन्तरं

गृह्णन् श्रोत्रस्पर्शादीन् एव वर्त्तन्तेत्यादिः स्वरूपम् अहंस्पृशामीत्या^
दिरहंकारोस्मिताध्यवसायात्मकः प्रकाशक्रियास्थितिशीला हि
गुणास्तेषामिन्द्रियाणि साहंकाराणि विषयिणामत्यानयः सर्वे
एवैते पुरुषोपभोगप्रयोजना इत्यर्थवत्त्वं एवं पंचत्वयथाक्रमं सं
यमादिंद्रियाजयः प्रादुर्भवतीति हृत्पर्यावगमाद्योगारूढस्य — चरम^
स्फुटएव कर्तृत्वाभिमानः ९ ॥ ॥ ॥ । — वानुपा^

रामकंठीटीका

अतोस्यैव फलत्यागात्ख्यातस्वरूपः कर्मयोगसमाहितः कुर्वन्नपि न लिप्यते
यतो नैव किंचित्करोमीति मन्यते सर्वाश्च क्रियाः स लोकवदनुतिष्ठन्नपि ने
कर्म्यफलमेव प्रतिपद्यते इति संबंधः किंतु वक्ष्येवं मन्यते पश्यन्नित्यादिना सर्वे — न्या^
न्द्रियवृत्तीः प्राणवृत्तीश्च प्रवर्त्तयन्नपीति धारयन्नेवंविधा मम सकर्मयोगस्य
यथोक्तफलप्राप्त्युपायभूता धारणामहहन् कथं धारयन् दर्शनादिक्रि^
यासु प्रवृत्तान्यपीन्द्रियाणि प्राणाश्चेंद्रियार्थेषु स्वेषु स्वेषु विषयेषु वर्तंते सं
वन्मात्रैस्तैर्न भवंति न तु तेषु स्वविषयसंबंधेषु नित्यानित्यनिरतिशयवि
त्प्रकाशस्वभावस्य मम लोकवद्रागादिकलंकस्पर्शो न ततः संभवतीति पश्य
न्नित्यादिना निमिषन्नित्येतेन ग्रंथेन सर्वेंद्रियप्राणवृत्तयः संगृहीताः तथा च
बुद्धीन्द्रियवृत्तयः श्रवणस्पर्शनदर्शनरसनघ्राणरूपाः क्रमम् अनपेक्ष्य पा^
शयन्नित्यादिना स्पृशन्नित्येतेन पदपंचकेन प्रतिपादिताः एवमेव वचनग्रहणग
मनविसर्गप्रजननरूपाः कर्मेन्द्रियवृत्तयः प्रलपन्गच्छन् त्यजन् विसृज
ये^ न्निति पदचतुष्टयेन प्रतिपादिताः यतो विसृजन्निति पदेन विसर्गप्रजननवृ
त्ती द्वे वृत्ती प्रतिपाद्येते स्वपन्नित्यनेन मनोवृत्तिः प्रतिपादिता स्वप्नावस्थायां
हि मन एव वृत्तिमत्तु भवति नेंद्रियाणि उन्मिषन्निमिषन्निति पदद्वयेन बुद्धि
वृत्तिः प्रतिपादिता निश्चयात्मिका हि बुद्धिवृत्तिरिति सा भावविषयैव
न भवत्युन्मेषशब्देनोक्ता अभावविषयतेनभवतीति निमेषशब्देन भावा
भावौ हि बुद्धिवृत्तिरेव निश्चिनुते अहंकाररूपा तु वृत्तिः पश्यन्शृण्वन्निति
कर्तृतया व्यपदिश्य प्रकृष्यप्रवर्तते इत्येता अंतर्बहिष्करणवृत्तयः प्राणवि

वं^

मेनेनप्राणाहुतिः प्रतिपादिता प्राणापानयोरेव वह्निप्रज्वलनमिति तदिदम
स्यवाक्यस्यतात्पर्यम् यस्मिन्सर्वमिति व्याख्यातस्वरूपस्यपरस्यतत्त्वा
स्यात्मनएवपरमेश्वरस्यतादृक्स्वभावपरामर्शमात्रात्मिकायाशक्तिर
व्यतिरिक्ता सैवतदिच्छावभासितज्ञेयकार्यात्मकजगत्क्रीडनकविषय
त्वेनप्रसरन्तीतन्मायाजनितविपर्ययदर्शनानांसांसारिकपुरुषाणांसं
ग्रहेणज्ञानक्रियारूपापि अन्तर्बहिष्करणप्राणवृत्तिभेदेनचतुर्दशमार्ग
प्रसृतत्वेनावभासमानासंसारबन्धहेतुत्वेनपर्यवस्यति परमेश्वरानु
ग्रहादुन्मिषितपरिमृष्टैतत्कलंकनिर्मलनिजज्ञानचक्षुषांसर्वस्व
हारव्याप्ततानामपियथोक्तस्वभावमात्रपरामर्शैकरूपतयायोक्तक
र्मयोगिनामवभासमाना परमात्मसमापत्तिलक्षणमोक्षफलप्राप्त्य
र्थमेवकल्पते इत्येतायुक्तोनैवकिंचित्करोमीति मन्यते इत्याद्युक्तम्
[illegible] ९॥

लाक्ष्मीरामी टीका

युक्तःकर्मणिक्रियमाणोपिआत्मनिसमाहितः ततोभ्यासक्रमेणत
त्त्वविद्भूत्वा आविर्भूताद्वैतज्ञानः सन्कर्मकुर्वाणोपिनैवकिंचित्करोमीति
मन्येन्निश्चिनोतिकीदृशः सन्पश्यन्नित्यादि ज्ञानेन्द्रियकर्मेन्द्रियान्तःकर
णप्राणवृत्तिभिःकर्मकुर्वन्नपि तथेन्द्रियाणिइन्द्रियार्थेषुस्वस्वविषये
प्रवर्तन्तेह्यनिभज्यन्ते नाहमित्येवंधारयन्प्रत्यभिजानन् एतान्किंचिद्
कृदहमिति तदुक्तंजलार्णवे स्वकार्येषुप्रवर्तन्तेकरणानीतिचिंतयन्अ
हंभावमपास्यैवयःकुर्यान्नसलिप्यतेइति [illegible]
[illegible] ९॥

पंचोलीटीका स्पष्टार्थम् ९

राजवीरसमिद्धोधिनी॥

स्पष्टार्थम् ९॥

[illegible]॥

[illegible]॥

भाषा अनुवाद

अथ नव इन दोनो श्लोक का अर्थ एक ही साथ है ९

चौपई॥

कहितहिंत्याग तजो पुनटहुन अरुउनमेदखन जोहि निमे
खन इंद्रि इंद्रिमें वरतैंनित ऐसें सो निजमनमेधरत ९॥

48

ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते
न स पापेन पद्मपत्रमिवांभसा १० ॥

शंकरभाष्यं टीका

यस्तु पुनरतत्त्ववित् प्रवृत्तश्च कर्मयोगे ब्रह्मणीति ब्रह्मणीश्वरे आधाय नि
क्षिप्य तदर्थं करोमीति भृत्य इव स्वाम्यर्थं सर्वाणि कर्माणि मोक्षेऽपि फले संगं त्य
क्त्वा करोति यः सर्वकर्माणि लिप्यते न स पापेन न संबध्यते पद्मपत्रमिवांभसोदके
न १० ॥

आनंदगिरिटीका

तर्हि विद्यावानिवाविद्यावानपि कर्माणि न प्रवर्तेत पापापहतिप्रसंगादि
त्याशंक्याह यस्त्विति यथा भृत्यः स्वाम्यर्थं कर्माणि करोति न स्वफलमपे
क्षते तथैव यो विद्वान् मोक्षेऽपि संगं त्यक्त्वा भगवदर्थमेव सर्वाणि कर्माणि ।
करोति न स कर्मणा बध्यते न हि पद्मपत्रमंभसा संबध्यते तद्वदित्यर्थः १०

स्वामिकृतटीका

तर्हि यस्य करोमीत्यभिमानो नास्ति तस्य कर्मलेपो ऽस्ति वा अविशुद्धचित्तत्वा
त्संन्यासोऽपि नास्तीति मत्वा स कस्मात्प्रपन्नमित्याशंक्याह ब्रह्मणीति ब्रह्मण्या
धाय परमेश्वरे समर्प्य तत्फलसंगं त्यक्त्वा यः कर्माणि करोति असौ पापेन
बंधहेतुतया पापविशिष्टेन पुण्यपापात्मकेन कर्मणा न लिप्यते यथा पद्मप
त्रं मध्ये स्थितमप्यंभसा न लिप्यते तद्वत् १० ॥

पिशाचभाष्य

यस्तु पुनरतत्त्ववित्प्रवृत्तश्च कर्मयोगे भवति ब्रह्मणीति कर्माणि ब्रह्मणि
ईश्वरे आधाय तत्तदर्थं करोमीति भृत्य इव स्वाम्यर्थं मोक्षेऽपि फले संगं त्यक्त्वा क
रोति यः कर्माणि लिप्यते न स पापेन न संबध्यते यथा पद्मपत्रमिवांभसा उदकेन

रामानुजभाष्य

ब्रह्मणीति ब्रह्मशब्देन प्रकृतिरिहोच्यते मम योनिर्महद्ब्रह्मेति वक्ष्यते इंद्रिया
णां प्रकृतिपरिणामविशेषरूपत्वेनेंद्रियाकारेणावस्थितायां प्रकृतौ पश्य
न् शृण्वन्नित्यादिनोक्तप्रकारेण कर्माण्याधाय फलसंगं त्यक्त्वा नैव किंचित्करो
मीति यः कर्माणि करोति स प्रकृतिसंसृष्टतया वर्तमानोऽपि प्रकृत्यात्माभिमा
नरूपेण बंधहेतुना पापेन न लिप्यते यथा पद्मपत्रमंभसा संसृष्टमपि न लि
प्यते तथा न लिप्यत इत्यर्थः १० ॥

गी॰ टी॰ ५॰

49

अभिनवगुप्तकृतटीका [illegible] १० स्पष्टार्थम्

परमार्थप्रपा टीका

इंद्रति जानातीद्रः परमात्मानतस्तैव हानींद्रियाणि वर्त्तन्दीति इंद्रियार्थेषु
रूपरसादिषु वर्त्तन्ते प्रवर्त्तन्ते अथवा आहृतिरूपेणातिष्ठन्तीति धारयेन् स्थिरीकृत्व
न सर्वं प्रतीतिरूपे ब्रह्मणि कर्माणि दर्शनश्रवणादीनि आधाय आरोप्य सं
गं कर्तृत्वाभिमानं त्यक्त्वा यः करोति स पापेन बंधहेतुना न लिप्यते श्रुतिर
पि आत पद्मीवदंभवाकपपंश्रुतः श्रुणवनुप्रोक्तं मत्वा नो मनस्तान्मसैवेता
लिकर्मणा माप्नोति तथा आत्मेवासे कर्मात्मना दहि कर्म करोमीति स्वयं त
याकर्म यायकेपि कोपमात्मेति वयमपास्येद्वे कृतरः सज्जात्मापम्नवापपूपति
१५ येनैवागंधानाजिघ्नति येनैवाचव्याकरोति येनैवास्वादु चास्वादु विजानाति य
१४ देतेषु पंमनवैनतेज्ञानमात्रानविज्ञानमज्ञानमेधाष्युनिमनीषाज्योतिः स्मृ
तिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येतानि प्रज्ञानस्य नामधेयानि
भवंतीत्यादि समष्टार्थं पश्रुतिः अश्नैतद्गें भवति पश्यन्शृण्वन्नित्यादि
बुद्धिप्राणकर्माणि कर्तृत्वाभिमानशून्यतेष्टानतेवनपोनितानितथाहि।
स्वप्नसुखापंनिहांऊर्वनित्य अनिद्रातमनसो निरिंद्रियप्रदेशावस्थानेतदक
स्मादसंकल्पितमेव भवति तथैव प्रासोच्छ्वासनिमेषोन्मेषादयोपि भवंति तद्वत्
नसर्वि दर्शनादिकर्माण्येतत्त्वविदाः वथास्वनजनपदवनतत्त्वविदिति शेषः पवकर्मा
णि वर्तमानोपि कर्मभिर्न लिप्यत इत्यत्र दृष्टांतमाह पद्मपत्रमिवेति स्पष्टोम
तस्कं स्फटिकः प्रतिविंबेन यथा नायाति रंजनं तद्वत् कर्मफलेनात्मा यथा
नायाति रंजनं १०॥

वनमाली टीका

ननु वस्तोसंतदेहेन संयोगेन ब्रह्मबस्वास्तव इदितं यथा तथोदेहादावह
मित्यभिमानवतो मम कर्तोवास्तव कर्मादृष्ट [illegible] दुःखादिसंवंधिताकथं।
तस्याकर्तृत्वभावनामात्रेणात निवृत्तिः नहि मूर्कोनु ष्यव कर्मकर्तृत्वादि
कर्मात्मन्यारोपितं येनसुकितत्तानात्मनतमिव स्वस्याकर्तृत्वज्ञानतानिव
र्त्तेतेतितत्राह ब्रह्मणीति ब्रह्मणि सर्वेश्वरे तत्पादामि निमग्नि आधाय समर्प्य
संगं फलाभिलाषं त्यक्त्वाहं स्वार्थं भगवदर्थं स्वफलनिरपेक्षतत्पाक
रोमीत्यभिप्रायेण कर्माणि लौकिकानि वानि विहितानि यः करोति स पापेन सं

सारहेतुसहतनत्वःकृतात्मकेनकर्ममात्रेणनलिप्यते पद्मपत्रमुपरिप्र
तिष्ठितंभसानलिप्यते एतादृशेनकर्मानुष्ठानेनभगवज्ज्ञानंतेनसतत्त्वदर्श
नेनसत्तया ब्रह्महत्यायाययानिहतनिसत्तयासत्यविद्याभिमानादेतन्नहतिनि
तिभावः १०॥

ऊसमवैजयनूती टीका

[illegible] ऽकर्मार्थंविशदयति ब्रह्मणीति ब्रह्मणि
तस्मादेतद्ब्रह्मनामरूपमन्नंचजायतइतिश्रुतेः ममयोनिर्महद्ब्रह्मेतिवस्मा
गाच्चब्रह्मस्मृतिनिर्दिष्टेत्रिगुणात्मकेदेहेंद्रियादिरूपेणपरिणामप्राप्तेप्रधानेक
र्माणिदर्शनश्रवणादीनि आधायसर्वात्मपतानींद्रियकर्माणिप्रधानाभिधेय
स्यब्रह्मणएवभवंतिनतुमह्यमितिनिश्चयमेतिनिर्धार्येत्यर्थः संगंकर्मफला
नुसंधानंतत्कर्तृत्वाभिनिवेशंचत्यक्त्वापरित्यज्ययोमनत्वस्तानिसर्वाणिकर्मा
णिकरोतिआचरतिमत्तादृग्देहेंद्रियादिरूपः संनपिपापेनदेहेंद्रियादिष्वात्मता
भिमानरूपेणानुलिप्यतेलिप्तोनभवेत् तत्रदृष्टांतः पद्मपत्रमंभसाजलेनोपरिति
ष्ठितेनपद्मपत्रंकमलदलंननलिप्यतेतद्वल्लिप्यतेतद्वदित्यर्थः १०

मधुसूदनी टीका

नत्वविद्वान्कर्तृत्वाभिमानात्लिप्यतेव तथाचकथंतस्यसत्वसर्वविकात्ता
नुनिष्टास्यादितितत्राह ॥ ब्रह्मणिपरमेश्वरेआधायसमर्प्यसंगंफलाभिला
षंत्यक्त्वाईश्वरार्थंभृत्यइवस्वाम्यर्थंस्वफलनिरपेक्षतयाकरोमीतिभिप्रायेण
कर्माणिलौकिकानिवैदिकानिचकरोतियःलिप्यतेनसपापेनपापपुण्या
त्मकेनकर्मणेतियावत् यथापद्मपत्रमुपरिप्रक्षिप्तेनांभसानलिप्यतेतद्वत् ।
भगवदर्पणबुद्ध्यानुष्ठितंकर्मबुद्धिशुद्धिफलमेवस्यात् । [struck out] ॥

सदानंदी टीका

नर्यतोलिप्यतेतंकर्तृत्वाभिनिवेशातः ज्ञाननिष्ठस्तंत्यासाकथंतस्येतिचे
न्नाह १ फलासंगंपरित्यज्यसमर्प्यपरमेश्वरेकर्माणिवैदिकानस्मिलौकिका
निकरोतियः २ पापपुण्यात्मकेनासौकर्मणानैवलिप्यते यथोपरिप्रक्षिप्तेनप
द्मपत्रंनचांभसा २ लिप्यतेनहरीशेपिकर्मार्पितमलेपकं प्रत्युतेशप्रसादेनधी
शुद्धिमात्रस्यजायते ५ १० ॥

नीलकंठी टीका

ब्रह्मणीतियतोविद्वान्ब्रह्मसंगत्वात्कुर्वन्नपिनलिप्यते तस्माद्विद्वानपिब्रह्म

गी॰ टी॰ पं॰

50

णि सर्वाणि तथा नित्यानि कर्माणि कश्यायायमेव कारयिता न त्वहं करोमीति सम
र्प्य यः कर्माणि करोति सः पापेन न लिप्यते भस्मा पद्मपत्रमिव १०॥

ज्ञानेश्वरी टीका

एतदेवोपपादयति ब्रह्मार्पणप्रकारेण ब्रह्मण्याय समर्प्य कर्माणि संगं त्यक्त्वाकृतिचोदिताः क्रियाः फलस्पृहां त्यक्त्वा यः करोति स पापेन न लिप्यते अथच योजितेंद्रियो योगी सर्वपर्वेन पुरुषोपभोगप्रयोजनार्थं वर्तत्वं स्वयमात्मकर्माणि वाह्यांतःकारणकार्याणि श्रवणदर्शनादीनि ब्रह्मणि समर्प्य तदनन्तरं संगं त्यक्त्वा ज्ञानेंद्रियविषयीकृतं सर्पं स्वर्णत्वेनादिकं हि वस्त्राहेयोपादेयोपेक्षणीयत्वेनाध्यवसितं मनसाप्येवमेव संकल्पितम् अत्राहमधिकृत इत्यहंकारेणाभिमतं पुरुषो हानादानोपेक्षालक्षणक्रियाविषयीकरोति ततः क्रियाफलं स्वर्गादिकं भुंक्ते इत्येवं मुख्यत्वेलाबन्धरूपो हि संगः प्राइर्भूतेंद्रियजयो हि संगपरस्य राभिप्रायेहेतुकं सर्वं पुरुषोपभोगार्थमेव प्रवर्तयन्त इति प्रोक्तम्॥

इदानीमेतदेव प्रकटयितुमाह॥

रामकंठी टीका

ब्रह्मणि परमात्मनि सर्वाणि क्रियमाणानि कर्माणि आधाय तत्स्वीकृतत्वेन विनिवेश्य तत एव संगं स्वरूपव्यतिरिक्तत्वेनावभासमाने भुविषयेष्वभिनिवेशं विजित्य लौकिकं त्यक्त्वा यथोक्तया ज्ञाननिष्ठया परमेश्वरभावावस्थितो यः करोति सर्वाः क्रियाः समाचरति स लौकिकवत् पापेन कर्मफलरूपेण स्वाभाव्यात्मना न लिप्यते न कलुषीक्रियते कथम् अम्भसा सलिलेन निर्लेपवथा न तया स्वसंश्लिष्टमपि कमलदलमिव ॥

+ नन्वेवंविधस्य ज्ञानाधारा वि वात्कर्मलोपो मा स्त्वयत्त्व एव अभिमानस्य सर्वथाविलानादित्याशंकाह +

सामिती वल्लभाचारी टीका

रूढस्य ब्रह्मभावस्य यत्र स्याभिमानाभावाय मात्रः कर्मयोगाधिकृतः सलि

यतः उत्पन्नबोधो ब्रह्मणि परमेश्वरे कर्माण्याधाय त्यक्त्वा समर्प्य संगं तत्रिमन्नविनतं त्यक्त्वा तिष्ठति असौ पापेन बन्धहेतुना याप्यपि ष्टेन पुण्यपापात्मकेन कर्मणा न लिप्यते न कलुषीक्रियते

कारसुखेलाबंधेत्पन्नकायः करोति नासौ पापेन लिप्यते
पद्मपत्रमिवांभसेति दृष्टान्तः तथा चोक्तमिदं कैवल्य
पादे कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामि
ति सूत्रे च तत्पात् खल्वियं कर्मजातिः कृष्णा शुक्ला
शुक्लकृष्णा अशुक्लाकृष्णा चेति तत्र कृष्णा दुरात्म
नां परान्पीडयित्वा भवति शुक्ला तपःस्वाध्यायवतां
मनसश्चायत्तत्वात् बहिस्साधनाधीना परान्पीडयि
त्वा न भवति शुक्लकृष्णा बहिर्ध्यानसाध्या परपीडानु
ग्रहद्वारेण कर्माशयप्रचयात् अशुक्लाकृष्णा सं
न्यासिनां क्षीणक्लेशानां चरमदेहानामिति अशुक्लं
कर्मसंन्यासात् अकृष्णं चानुपादनात् इतरेषां तु भूता
नां पूर्वमेव त्रिविधमिति ७ ॥ इति आनंदीटीकायां श्रुतिः ॥

51

मत्वत उक्तोपपत्यादेहाभिमानस्यक्रमापचीयमानतयाविशुद्धीक्रियते
यथापद्मपत्रमंभसिस्थितमप्यंभसा न लिप्यते तद्वत्
१० ॥

पंचोलीटीका

यस्तुपुनः अतत्ववित् कर्मयोगप्रवृत्तः तस्य कर्मयथाबंधनेनभवतितंप्रकारमाह ब्रह्मणीति यः कर्माणिब्रह्मणिईश्वरे आधायतदर्थं कर्मकरोमीतिबुद्ध्याकर्मफलेमोहापिसंगंत्यक्त्वाकरोतिसपापेनलिप्यतेनसतस्यांतःकरणस्यशुद्धिरेवतेषांफलमित्यभिप्रायः १० ॥

भगवीरसमिद्धोधिनी ॥

ब्रह्मण्याधायेति ब्रह्मणीइतिद्वितीयाद्विवचनांतस्यच्छेदः संधिस्त्वार्षः यः पुमान् ब्रह्मणी वेदस्तत्वंतपोब्रह्मेत्यनुशासनाद्वेदंपरमेश्वरौ आधाय आसमंताद्धारयित्वा यत्तु वेदोक्तंप्रकारेसर्वांगंयथास्यात्तथास्वीकृत्यपरमेश्वरंचस्वामित्वेनशरणीकृत्यसंगं पूर्वोक्तलक्षणंपुत्रमित्रादिस्नेहंचत्यक्त्वा कर्माणिस्वाचारोचितानिपुष्टाणीनिकरोति सपापेनगुरुवधादिलक्षणेननलिप्यतेनकलुषीक्रियते अंभसाजलेननिर्व्यवधाननतयासंश्लिष्टमपिकमलदलमिवेत्यर्थः यद्वाब्रह्मणीति सप्तम्यंतमेवब्रह्मणिपरमेश्वरे आधायसमर्प्य अनेनतदनुष्ठितेनस्वोचितेनानुष्ठीयमानेनकर्मणापरमेश्वरोमेप्रीयतामितिसंकल्पेत्यर्थः
१० ॥

मधुभाष्य

ब्रह्मणीति साधननियमस्योपचारत्वनिवृत्त्यर्थंपुनःपुनःफलकथनं एवंचाचार इत्याह १० ॥

भाषा अनुवाद

और जो मनुष्य हम कर्म करते हैं ऐसा अभिमान रखते हैं ते ई कर्ममे लिप्त होते औ उन्ही को कर्मबन्ध होता हैं फेरि वि नकी अशुद्धता से उनको संन्यास भी दुर्घट है इस से उनको सब तरह शङ्कट है जो ऐसी शङ्काकरो तो यह उत्तर सुनो कि अन्तर्यामी ईश्वर की प्रेरणा से हम सब कर्म करते हैं ऐसे विचार करि सकल कर्म ईश्वर मे समर्पण करके औ कर्म कालमे आशक्ति रहित कर्म करते हैं तो उनको कर्म अतिबन्धक नहीं होते और वे कर्म से लिप्त नहीं हैं जैसे जैसे पद्मपत्र जलमे निरन्तर रहते भी जलसे अलग है सोई कहा कि ब्रह्ममे कर्म अर्पण करि सङ्ग कहे आशक्ति छोडि जो कर्म करैं हैं सो पाप से नहीं लिप्त होता जैसे कमलका पत्ता जलमे रहि जलसे भिन्न है १०॥

दोहा

ब्रह्मसमर्पण कर्मकरी त्यागसंगको सोय कमलभिन्न ज लसें यथा लिपें न पापहि सोय १०॥

कायेनमनसाबुद्ध्या केवलैरिन्द्रियैरपि योगिनः क
र्मकुर्वंति संगंत्यक्त्वात्मशुद्धये ॥ ११ ॥

शांकरभाष्य

केवलसत्वशुद्धिमात्रंफलमेव तस्यैवकर्मणः स्यात् यस्मात्कायेने
ति कायेनदेहेनमनसाबुद्ध्याचकेवलैरिंद्रियैर्ममत्ववर्जितैरपि ईश्वरायैवक
र्मकरोमीति नफलायेतिममत्वबुद्धिशून्यैरिंद्रियैरपिकेवलशब्दः कायादिभिर
पि प्रत्येकंसंबध्यते सर्वव्यापारेषुममतावर्जिताययोगिनः कर्मिणः कर्मकुर्वंति
संगंत्यक्त्वाफलविषयमात्मशुद्धये सत्वशुद्धयेइत्यर्थः ॥ ११ ॥

आनंदगिरिकृतटीका

अविशुद्धसत्वस्तर्हिकृतेनकर्मणाकिंस्यादित्याशंक्याह केवलमिति अनुष्ठेयस्येश्वरा
र्पणबुद्ध्यानुष्ठितेकर्मणिबुद्धिशुद्धिफलमित्यत्रैव हेतुमाह यस्मादिति केवल
शब्दस्यप्रत्येकंसंबंधे प्रयोजनमाह सर्वव्यापारेष्विति ॥ ११ ॥

स्वामिकृतटीका

बंधकत्वाभावमुक्त्वामोक्षहेतुत्वंसदाचारेणदर्शयति कायेनेति कायेन
स्नानादिमनसाध्यानादिबुद्ध्यातत्वनिश्चयादिकेवलैः कर्माभिनिवेशरहि
तैरिंद्रियैः श्रवणकीर्तनादिलक्षणंकर्मफलेसंगंत्यक्त्वाचित्तशुद्धयेकर्मयोगि
नः कर्मकुर्वंति ॥ ११ ॥

बध्यते सर्वव्यापारादिषु ममतावर्जि
कर्माणिकुर्वंति
फलविषयं
सत्वशुद्धये

पिशाचभाष्य

बुद्धिशून्यैः इंद्रियैः केवलशब्दः कायादिभिरपिप्रत्येकं सं ॥ ११ ॥

रामानुजभाष्य

कायेनेति कायमनोबुद्धींद्रियसाध्यंकर्मस्वर्गादिफलसंगंत्यक्त्वायोगिनआत्
मशुद्धयेकुर्वंति आत्मगतप्राचीनकर्मबंधनविनाशायकुर्वंतीत्यर्थः ॥ ११ ॥

अभिनवगुप्तकृतटीका

सर्वभूतानामात्मभूतआत्मायस्यसर्वंसमपिकुर्वाणोनलिप्यतेकरणाप्र
तिषेधात्कृत्वात् अतएवदर्शनादीनिकुर्वन्नपिअसावेवंधारयतिप्रतिपत्ति
दार्ढ्येननिश्चिनुते चक्षुरादीनामिंद्रियाणांयदिस्वविषयेषुप्रवृत्तिर्ममकिं
मायातं नह्यात्मकृतेनपरस्यलेपइति तदेवब्रह्मणिकर्मणांसमर्पणं अत्र
विकल्पस्यगतसंगत्वात् अतोनलिप्यते योगिनश्चकेवलैः संगरहितैःपरस्परा

नयेत्तिभिश्चकायादिभिः कुर्वंति कर्माणि संगाभावात् ११ ॥

परमार्थप्रपा

एवं बंधकत्वाभावमुक्त्वा मोक्षहेतुत्वं तदाचारेण दर्शयति कायेनेति कायेन स्नानोपवासादि मनसा ध्यानादि बुद्ध्या तत्त्वनिश्चयादि केवलैः कर्माभिनिवेशरहितैरिंद्रियैः श्रवणकीर्तनादिलक्षणं कर्म फलसंगं त्यक्त्वा चित्तशुद्धये योगिनः कुर्वंति ११

वनमाली टीका

तदेव विवृणोति कायेनेति कायेन मनसा बुद्ध्येंद्रियैरपि योगिनः कर्मफलासक्तिं त्यक्त्वा कर्म कुर्वंति कायादीनां सर्वेषां केवलैरिति विशेषणमीश्वरायैव करोमि न तत्फलायनेदं मदीयं कर्मेत्यादि ममताशून्यैरित्यर्थः आत्मशुद्धये चित्तशुद्ध्यर्थं ॥

कुलमवैजयन्ती

उक्तमर्थं विवृण्वन् सदाचारं प्रमाणयति कायेनेति कायेन देहेन मनसा बुद्ध्या च केवलैर्ममेदमिति रहितैरिंद्रियैरपि देहाद्यभिमानरहिता योगिनो मुमुक्षवः आत्मशुद्धये आत्मगतानादि शुभाशुभरूपकर्मबंधनप्रध्वंसाय संगं त्यक्त्वा स्वर्गादिफलकामं परित्यज्य देहादिभिः साध्यं कर्म कुर्वंति तस्मात्त्वमप्येवं बुद्धि[?]व कर्म कु[र्वि]त्यर्थः ११ ॥

तदेव विवृणोति ॥

मधुसूदनी टीका

कायेन मनसा बुद्धींद्रियैरपि योगिनः कर्मिणः फलसंगं त्यक्त्वा कर्म कुर्वंति कायादीनां सर्वेषां विशेषणं केवलैरिति ईश्वरायैव करोमि न मम फलायेति ममताशून्यैरित्यर्थः आत्मशुद्धये चित्तसत्वशुद्ध्यर्थं ११ ॥

सदानंदी टीका

त्यक्त्वा फलाभिलाषं तु कर्म कुर्वंति कर्मिणः चित्तशुद्ध्यपि या सर्वैवेव कायेन मनसेंद्रियैः १ केवलैरिति सर्वेषां कायादीनां विशेषणं ईश्वरार्थं करोमीदं नैतन्मम फलाय च २ स्वाम्यर्थं भृत्यवच्च ममतामलवर्जितैः २ ११ ॥

नीलकंठी टीका

कायेनेति केवलैरिति विपरिणामेन सर्वत्र संबंधनीयं केवलेन कायेन अहमयं आत्मनिता[?]र्किकादिवदहं करोमीत्यभिनिवेशं त्यक्त्वा योगिनः कर्म कुर्वंति आत्मशुद्धये चित्तशुद्ध्यर्थं तस्मात्त्वयापि तत्रैवाधिकारोऽस्तीति तदेव त्वं कुरु ११ ॥

आनन्दीटीका

इदमेवलक्षयति तत्रतत्रसंयमेनभूयसीनांभूमीनांजयेविदेहाधारः
णाप्रमाः इंद्रियजयप्रादुर्भावान्मनोजवित्वविकारं प्राप्यभावः प्रधान
जयइतिसिद्धित्रयंप्राप्यकायिकस्यतत्रतत्रदेशेकालेवहस्तपादह
गादिभोगयस्यकर्मणःक्षपणार्थंकेवलेनकायेनेंद्रियबुद्धिमनोहंका
रनिरपेक्षणैतएवसंगंपरस्पराभिप्रायेणसुखलाबंधरूपंप्रवर्तनंस्व
कामसिद्धयेभूतेंद्रियसंघातात्प्रकृतेःपृथक्केनस्वरूपेवस्थानं

११ र्थंयोगारूढाःकर्मकुर्वन्ति एवंमानसिकस्यकर्मणः भोगन
क्षपनार्थंकेवलेनमनसेत्यादियोज्यम् ॥ ११ ॥

रामकंठीटीका

यतएवमतः॥

कायग्रहणेनकर्मेंद्रियाणिमनोबुद्धिग्रहणेनांतःकरणम् इन्द्रियग्रह
णेनबुद्धींद्रियाण्यत्रगृह्यन्ते एतैःकेवलैस्तद्विषयादहंकाराद्यपरिग्रहा
द्विशुद्धैः पृथग्भूतैर्वाकर्मयथास्वंव्यापारैःप्रासक्तचोदनयाशरीरमप्यभि
चारितयाचतद्वस्यत्वेयोगिनःकर्मयोगसमाहिताः कुर्वन्त्यनुतिष्ठन्त्येव
किंतद्यथोक्तस्यसत्त्वस्यात्मनःसिद्धयेहंतयाप्रतीतिनिष्पत्तये संगंत्यक्त्वा
कुर्वन्तिकिमुक्तंभवति संगत्यागएवसंन्यासःनकर्मत्यागः [illegible]
[illegible] ॥ ११ ॥

तदेवविशुद्धिहेतुत्वेविहरणेनि॥त्यासिंधौ मधुसूदनीटीका

योगिनआत्मतत्त्वेसमाहिताः संगंकर्मणिलीनचित्तत्वंत्यक्त्वादेहेनमन
साबुद्ध्याबुद्धिकर्मेन्द्रियैरपि केवलैरहन्तयाज्ञवद्ध्रा मपरामृष्टैःकर्म
कुर्वन्त्येव किमर्थमित्याह आत्मशुद्धयेआत्मनःस्वस्वभावस्यशुद्धयेके
वल्याय देहाभिमानमलशोधनाय तदुक्तंकुलार्णवे कर्मणोदीरितः

१४ ज्ञानंज्ञानेनशिवतांव्रजेत् शिवैकमेवमुक्तिःस्यात्तस्मात्कर्मसमाचरेदिति
संगत्यागलक्षणंयोगवासिष्ठे अनास्थयेतिभावानांयदभावनमान्तर
मनाहंकर्तानभोक्तेतिसामान्योभावसंगमइति [illegible]
[illegible] ११

गी॰ टी॰ पं॰

55

पंचोलीटीका

कर्मणां बंधकत्वाभावप्रकारमुक्त्वा तस्यैव चित्तशुद्धिफलत्वं सदा-
चारेण दर्शयति कायेनेति योगिनः कर्मिणः आत्मशुद्धये अंतः
करणशुद्ध्यर्थं कायेन मनसा बुद्ध्या केवलैरिंद्रियैः कायमनोबु
द्धिभिः संगं त्यक्त्वा फलविषयं संगं त्यक्त्वा कर्म नित्यनैमित्तिकं कुर्वंति ॥

रणवीरसमिद्बोधिनी ॥

उक्तमेवार्थं स्पष्टयति कायेनेति अकेवलैरिति च्छेदः कायेनेति क
र्मेंद्रियाणि मनसा बुद्ध्येत्यंतःकरणद्वयं इंद्रियैरिति ज्ञानेंद्रियाणि
गृह्यंते पाठक्रमादर्थक्रमो बलीयानिति न्यायेन व्युत्क्रमोऽपि क्रमेणै
व व्याख्येयः आदौ कायग्रहणं च कर्मेंद्रियव्यापारस्यैव प्राधान्येन प्र
दर्शनार्थं तथा च योगिनः कर्मयोगिनः इंद्रियैर्ज्ञानेंद्रियैः शास्त्रं दृष्टी
कृत्य तदुक्तां श्रापवादं श्रुतिगोचरीकृत्य तदुक्तशास्त्राणि वाग
मंगलानि स्पर्शेन संभाव्य बुद्ध्या च तत्त्वातिकारोपायं निश्चित्य मनसा
वाक्यानि संस्मृत्य कर्मेंद्रियैश्च तत्तद्योगादिकं विधायेत्येतैरकेवलैः
समुदितैरेव कर्मसमाचरणलक्षणं कुर्वंति प्रतिपादयंति किमर्थं
आत्मनः स्वस्य शुद्धिः पापास्पर्शो कीर्तिमलहरीकरणं वा तदर्थं प
तादृशकर्माचरणेनाकीर्त्यादिकमैहिकं नरकादिलक्षणं पारत्रि
कं च मलमपसरतीति भावः कथं कुर्वंति संगं त्यक्त्वा अयं गक्रनंदं
तव्य इति कृत्वा उपाधिं प्रवृत्तिनिरोधकं विहायेत्यर्थः ११ ॥

मधुभाष्य

कायेनेति भगवद्भक्त्यादिनियमनार्थमुक्त्वाप्युक्तफलमाह ११ ॥

॥

भाषा अनुवाद

निष्काम कर्म बन्धक नहीं है इस कहनेके बाद अब उत्तम मनुष्यों को कर्मके द्वारा मुक्ति दिखावते हैं कि शरीर से स्नानादि मनसे ध्यानादि औ बुद्धिसे तत्व निश्चयादि तथा कर्ममे आशक्तिरहित औ फलाभिलाष शून्य होकर इन्द्रियों के द्वारा श्रवण कीर्त्तन आदि चित्तशुद्धिके अर्थ कर्मानुष्ठाई योगी कर्म करते हैं सोई कहा कि कायमन बुद्धिसे औ केवल इन्द्रियों से आत्मशुद्धिके हेत सङ्ग छोडि योगीजन कर्म करते हैं ११ ॥

दोहा

देह मन अरु बुद्धिसें केवल इंद्रियसें नांहि योगी कर्मनिजशुद्धि हितकरें सो संग विहाहि ११ ॥

56

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् अयु
क्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥

शांकरभाष्यं

तस्मान्नैव न वाधिकार इति कुरु कर्मैव यस्माच्च युक्त इति युक्त ईश्वराय कर्माणि
करोमि न मम फलायेति एवं समाहितः सन् कर्मफलं त्यक्त्वा परित्यज्य शांतिं
मोक्षाख्यामाप्नोति नैष्ठिकीं निष्ठायां भवां सत्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यास
ज्ञाननिष्ठाक्रमेणेति वाक्यशेषः यस्तु पुनरयुक्तोऽसमाहितः कामकारेण कर
णं कारः कामस्य कारः कामकारस्तेन कामकारेण कामप्रेरिततयेत्यर्थः मम
फलायेदं करोमि कर्मेत्येवं फले सक्तो निबध्यते अतस्त्वं युक्तो भवेत्यर्थः १२

आनन्दगिरिकृतटीका

कर्मणामात्मशुद्धिफलत्वे तात्पर्येण कर्मानुष्ठानमेव न तत्कर्तव्यमिति यस्मादित्या
द्यपेक्षितं वक्तुं फलितमाह तस्मादिति तत्र सङ्गं त्यक्त्वा कर्मानुष्ठानं त्वया क
र्तव्यमित्याह यस्माच्चेति युक्तः सन् फलं त्यक्त्वा कर्म कुर्वन् मोक्षाख्यां शांतिं यस्मा
दाप्नोति तस्माच्च त्वया सङ्गं त्यक्त्वा कर्म कर्तव्यमिति योजना विपक्षे दोषमाह अयुक्त
इति युक्तं व्याकरोति ईश्वरायेति फलं परित्यज्य कर्म कुर्वन्निति शेषः नैष्ठिकीं
शांतिं निष्ठेनेदेव विशदयति सत्त्वेति द्वितीयमर्धं विभजते यस्त्विति असमाधाने
दोषादर्शनस्य नियोगं दर्शयति अतस्त्वमिति १२ ॥

स्वामिकृतटीका

न त्वेतेनैव कर्मणा कश्चिन्मुच्यते कश्चिद्बध्यते इति व्यवस्था कथमत आह युक्त
इति युक्तः परमेश्वरैकनिष्ठः सन् कर्मणां फलं त्यक्त्वा कर्माणि कुर्वन्नात्यंतिकीं शां
तिं मोक्षं प्राप्नोति अयुक्तस्तु बहिर्मुखः कामकारेण कामतः प्रवृत्त्या फले सक्तः
क्रोनितरां बंधं प्राप्नोति १२ ॥

पिशाचभाष्यं

युक्त इति तस्माद्युक्तः कर्मफलं त्यक्त्वा युक्त ईश्वराय कर्माणि न कर्मफलायेति
एवं समाहितः सन् कर्मफलं त्यक्त्वा शांतिं मोक्षाख्यामाप्नोति नैष्ठिकीं निष्ठायां
भवां सत्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषः
यस्तु पुनरयुक्तः असमाहितः कामेन कारणं कामकारस्तेन कामकारेण का
मप्रेरिततयेत्यर्थः मम फलायेदं करोमि कर्मेत्येवं फले सक्तो निबध्यते न मुच्यते

गी॰
टी॰
पं॰

57

वेदित्यर्थः १२॥

रामानुजभाष्यं

युक्त इति युक्तः आत्मव्यतिरिक्तफलेष्वचपलः आत्मैकप्रवणः कर्मफलं त्यक्त्वा
केवलात्मशुद्धये कर्मानुष्ठाय नैष्ठिकीं शांतिमाप्नोति स्थिरामात्मानुभवरू
पां निर्वृतिमाप्नोति अयुक्तः आत्मव्यतिरिक्तफलेषु चपलः आत्मावलोक
नविमुखः कामकारेण फले सक्तः कर्माणि कुर्वन्नित्यं कर्मभिर्बध्यते नि
त्यसंसारी भवति अतः फलसंगरहित इंद्रियाकारेण परिणतानां प्रकृतेः
कर्माणि इत्यनुसंधानेनात्मनो बंधमोचनायैव कर्माणि कुर्वीतेत्युक्तं भवति १२॥

अभिनवगुप्तकृतटीका उपरामे १२ नैष्ठिकीमपुनरावर्तिनी

तस्मान्नैवैतत्वाधिकारः इति कर्मैवकार्य

परमार्थप्रपा टीका

अथ वितत्य हेतुः फलमाह युक्त इति कर्मफलं त्यक्त्वा युक्तः शुद्धचित्तः प्रमात्रैष्ठि
कीमात्यंतिकीं शांतिमेतं प्राप्नोति अथायुक्तस्य गतिमाह अ
युक्त इति अयुक्तो बहिर्मुखः कामकारेण कामतः प्रवृत्त्या फले सक्तः संनिब
ध्यते एवं तावच्चित्तशुद्धिमतः कर्मसंन्यासापेक्षया कर्मयोगो विशिष्य
ते इति सर्वमयुक्तं १२॥

वनमालीटीका

ननु कर्मकर्तृत्वाविशेषे कथमेकस्य मोक्षोऽपरस्य बंधः कर्मणा तत्राह
युक्त इति युक्तो जितेंद्रियो विषयभोगालंपटो भगवत्प्रीत्यर्थमिदं कर्म न मम
फलायेत्येवमभिप्रायवान् कर्मफलं त्यक्त्वा कर्माणि कुर्वन् शांतिं मोक्षाख्यां
नैष्ठिकीं सत्त्वशुद्धिश्रवणमनननिदिध्यासनापरोक्षप्रसाद्निष्ठाक्रमेण
जातां यस्त्वयुक्तोऽजितेंद्रियज्ञानाभिप्रायशून्यः सकामः कामकारेण कामतः प्र
वृत्त्या मम फलायैवेदं कर्म करोमीति फले सक्तो निबध्यते तत्र कर्मफलभो
यु॰ गायनीचोच्चयोनीन्नितरां गच्छतीत्यर्थः १२॥

ज्ञानमवैजयन्ती टीका

ननु तस्यैव कर्मणोऽनुष्ठानेनैको मुच्यतेऽपरो बध्यते इति कथं स्यादित्याशंक्य
व्यवस्थामाह युक्त इति युक्तः स्वात्मस्वरूपे यतनात् स्थिरमनाः आत्मैकम
नाः इत्यर्थः कर्मफलमैहिकामुष्मिकभोगरूपं त्यक्त्वा परित्यज्य केवलात्मप्राप्त
ये कर्माचरणान्नैष्ठिकीं निश्चलां शांतिमात्मावलोकरूपां निर्वृतिमाप्नोति मा॰

मोतिप्राप्नोति अयुक्तस्त्वात्मेतरस्थिरमनास्तत्कामकारेण कामतः फलेस
क्तः सन् लिप्तः सन् निबध्यते नित्यमेव जन्ममरणलक्षणे संसारे परिभ्रमती
त्यर्थः इत्येवं व्यवस्थायां बंधमोक्षयोः स्यात् तस्मात्फलानुसंधानरहितेन क
र्मकृतात्मप्रवणो भवेदिति भावः १२ ॥

मधुसूदनी टीका

कर्तृत्वाभिमानसाम्येऽपि तेनैव कर्मणा कश्चिन्मुच्यते कश्चिद्बध्यत इति वै
षम्ये को हेतुरिति तत्राह । युक्तः ईश्वरायैवैतानि कर्माणि न मम फलायेत्ये
वमभिप्रायवान् कर्मफलं त्यक्त्वा कर्माणि कुर्वन् शांतिं मोक्षाख्यामाप्नोति नैष्ठि
कीम् सत्वशुद्धिनित्यानित्यवस्तुविवेकसंन्यासज्ञाननिष्ठाक्रमेण जायमाना मि
ति यावत् यस्तु पुनरयुक्तः ईश्वरायैवैतानि कर्माणि न मम फलायैवेदं कर्म
करोमीति फले सक्तो निबध्यते कर्मभिर्नितरां संसारबंधं प्राप्नोति यस्मादेवं त
स्मात्त्वमपि युक्तः सन् कर्माणि कुर्विति वाक्यशेषः १२ [illegible]
[illegible]
[illegible] ॥

ममफलायेत्यभिप्राययु
क्तकामकारेण कामतः
ममफलाय

सदानंदी टीका

कर्तृत्वाध्याससाम्येऽपि कश्चित्तेनैव कर्मणा मुच्यते बध्यते कश्चिद्वैषम्ये हेतुरस्ति
कः १ भगवदर्पणायैव कर्माणि नैतानि फलाय मे इत्यभिप्रायवान्युक्तस्त्यक्त्वा क
र्मफलेषु धीः २ कुर्वन्कर्माणि मोक्षाख्यां शांतिमाप्नोति नैष्ठिकीं शुद्धिविवेकसं
न्याससज्ञाननिष्ठाक्रमेणाप्ता ३ ज्ञानात्मा नैष्ठिकीं शांतिमोक्षरूपामिति यावत्
यस्त्वयुक्तोऽस्ति एवं स्माद्विपरीतः सकामतः ४ मह्यमेव फलायेदं करोमीति
फले सक्तः कर्मभिर्नितरां बंधं संसाराख्यं प्रयात्यसौ ५ देहाभिमानसाम्येऽपि
[illegible] ६ विनिश्चया
कृते भगवदर्पणं कर्म श्रौतं तथा स्मार्तं लौकिकं च समस्तमिः ७ इद
मवैराग्यज्ञानद्वारे विमुक्तिदं नरैः कामकारेण कृतं सत्फलकामिभिः
बंधाय मृत्युनां भवतीत्याशयो हरेः यस्मादेवं ततस्त्वं भो विहायासक्तिमात्म
ज्ञो ८ सर्वकर्मफलेष्वीशार्पणतो धार्यं कुरु क्रियां वैदिकीं लौकिकीं वापि बंधान्मु
क्तो भविष्यसि ९ १२ ॥

नीलकंठी टीका

किंच युक्त इति युक्तो ब्रह्मण्याधाय कर्माणीत्यादिनोक्तलक्षणः कर्मणां फलं त
क्त्वा ईश्वरे समर्प्य शांतिं कैवल्यं नैष्ठिकीं सत्वशुद्ध्यादिक्रमप्राप्तज्ञाननिष्ठाफलभूतां

गी॰
टी॰
५

प्राप्नोति अयुक्तस्तद्विपरीतः कामकारेण स्वैरवृत्त्या फले सक्तः सन् नितरां बध्यते १२ ॥

आनंदटीका

एतदेवाभ्यासार्थं प्रपञ्चयन्नाह युक्तः प्रोक्तेन क्रमेणाभ्यस्तयोगधारणः कर्मणः कायिकादेः फलं ब्रह्मण्यादाय कर्माणीति व्याख्यातार्थानुसारं परस्पराभिप्रायप्रवृत्तिजनितस्वदुःखादिकं त्यक्त्वा नैष्ठिकीं परमां काष्ठां प्राप्तः शांतिमाप्नोति अयुक्तोनभ्यस्तयोगो युगपस्तद्विष्य प्रवृत्तिः क्रमभ्रान्तस्य निर्दिष्टः उक्तेष्टे तथाप्यहं ऐश्वर्यस्य तत्त्वविकाहति स्वांशं प्रतिपद्य नेपरस्य राक्तन्हेहेतुकी हत्तिमित्तक्रियाक्रमात्स्रोमेनकामकारेण फले सक्तः शुभ्रवेलाबंधप्राप्ते फले सक्तो निबध्यते १२ ॥

स च संगत्यागः कर्मफलत्यागात्प्रबंध रामकंठीटीका प्रतिपादितान्द्वतीत्याह ॥

योज्ञाननिष्ठतया कर्मणि युक्तः सन्ननभिसंधानेन कर्मफलं त्यक्त्वा नैष्ठिकीं निष्ठायां परस्यां काष्ठायां स्थितां शांतिं द्वैतप्रत्ययलयात्तो भवहितसत्यात्मस्वरूपविश्रमात्मकं प्रशमं समधिगच्छति यस्तु निसर्गदुष्टत्वे कर्मणि सर्वदा प्रवृत्तः सन्सक्तो न भवति यथोक्तेन क्रमेण समाहितो न भवति सोऽवश्यमेव फलसंगित्वाद्बध्यते संसारे नियम्यते [illegible] १२ ॥

संगत्याग एव संन्यासो न कर्मत्यागः [illegible] टीका तस्मात्कर्मफ(परसं)लत्यागादेव संन्यासंभवतीत्याह युक्त आत्मनिष्ठः कर्मफलमनभिसंधानेन त्यक्त्वा निष्ठायां काष्ठायां स्थितां नैष्ठिकीमपुनरावर्तिनीं शांतिं द्वैतप्रत्ययवसेभो परतिं मोक्षाख्यां क्रमेणाप्नोति अयुक्तो बाधप्रत्यो बहिर्मुखः कामकारेण कामतोभिलाषेण प्रवृत्त्या फले सक्तो लीनचित्तो निबध्यते संसारबन्धं प्राप्नोति [illegible] १२ ॥

पंचोली टीका

ननु कथं तेनैव कर्मणा कश्चिन्मुच्यते कश्चिद्बध्यते इत्यपेक्षायामाह युक्त इति युक्तः फलनिस्पृहः ईश्वरार्थं कर्म कुर्वन् शान्तिं मोक्षाख्यां नैष्ठिकीं सत्त्वशुद्धिक्रमेणैव प्रत्यक्षज्ञाननिष्ठां प्राप्नोति यस्त्वयुक्तः कर्मकामी सकाम प्रेरणेन फले सक्तो निबध्यते १२

प्राणवीरसमिद्बोधिनी॥

न च सन्न्यसनादेवेत्यत्र सूचितमर्थं विवृणोति युक्त इति युक्तः कर्मसु प्रवृत्तः कर्मफलं कर्मणः प्रक्रान्तस्य युद्धस्य फलं परवश्यस्य मरणान्यतरलक्षणं त्यक्त्वा ईश्वरे समर्प्य परमेश्वर एव जय पराजयविषये स्वतन्त्रः कर्ता यस्तदिच्छाविषयं स्यात्तदेव भविष्यति परमहं स्वधर्ममनुतिष्ठे येन स एवेश्वरः प्रीतः स्यादिति निश्चित्य नैष्ठिकीं शान्तिं ब्रह्मसायुज्यलक्षणं मोक्षसुखमाप्नोति कामकारेण कामः पुत्रादिजीवितविषयेच्छा तस्य कारेण करणेन अयुक्तः विहितकर्माननुतिष्ठन् निबध्यते पापेनाभिभूयते शत्रुभिर्बध्यते नीयते च यतोयं फले प्रोक्तलक्षणे सक्तः कृतासंगः पुनः पुनस्तदेव संस्मरन्नित्यर्थः तथा च श्रुतिः न कर्मणा न प्रजया धनेन त्यागेनैके नामृतत्वमानशुरिति यथा च तृतीयाध्याये न कर्मणामित्यत्र व्याख्याता १२॥

अथ भाष्य

युक्त इति युक्तो योगयुक्तः पुनः सन्न्यासशास्त्रार्थं स्पष्टयति १२॥

59

भाषा अनुवाद

जो ऐसी शङ्का करो कि वही एक कर्मसे कोईतो मुक्त औ कोइको बन्ध यह कैसी व्यवस्था है तो इसका निवारण करते कहते हैं कि योगी कहे कर्मकारी पुरुष ईश्वरमे एक निष्ट हो कर्म फल को त्यागि कर्म अनुष्ठान करिके अत्यन्त शान्ति स्वरूप जो मुक्ति तिसको प्राप्त होते हैं परन्तु अयुक्त कहे कामना विशिष्ट कर्म फलाशक्त वहिर्मुख लोग काम्यकर्म से अवश्य ही वद्ध होतेहैं युक्त कहे ईश्वरार्थ कर्म करने वाले १२ ॥

दोहा

कर्मनिके फलत्याग दृढ़ शांति प्राप्त होययोगि पुत्रादिक के स्नेहसें वधयोहिसक्त अयोगि १२॥

60

सर्वकर्माणिमनसा संन्यस्यास्तेसुखंवशी नवद्वारेपु
रेदेही नैवकुर्वन्नकारयन् १३॥

शांकरभाष्यं

यस्तुपरमार्थदर्शीसर्वाणीति सर्वाणिकर्माणि सर्वकर्माणिसंन्यस्यपरित्यज्य।
नित्यंनैमित्तिकंकाम्यंप्रतिषिद्धंचतानिसर्वाणिकर्माणिमनसाविवेकबुद्ध्या
कर्मादावकर्मसंदर्शनेन संत्यज्येत्यर्थः आस्तेतिष्ठतिसुखं त्यक्तवाङ्मनःका
यचेष्टोयतिः निरायासः प्रसन्नचित्तः आत्मनोऽन्यत्र निवृत्तबाह्यसर्वप्रयोज
नइति सुखमास्तइत्युच्यते वशीजितेंद्रिय इत्यर्थः क्वास्तइत्याह नवद्वारेपुरे
सप्तशीर्षण्यात्मन उपलब्धिद्वाराण्यर्वाग् द्वेमूत्रपुरीषविसर्गार्थे तैर्द्वारैः
नवद्वारं पुरमुच्यते शरीरमिव पुरमात्मैकस्वामिकं तदर्थप्रयोजनैश्चेन्द्रियमनो
बुद्धिविषयैरनेकफलविज्ञानस्योत्पादकैः पौरैरिवाधिष्ठितं तस्मिन्नवद्वारे
पुरेदेहीसर्वंकर्मसंन्यस्यास्तइति किंविशेषणेन सर्वोहिदेहीसंन्यास्यसंन्या
सीवदेहएवास्ते तत्रानर्थकं विशेषणमुच्यते यस्त्वज्ञोदेहीदेहेंद्रियसंघात
मात्रात्मदर्शीससर्वोपिगेहेभूमावासनेवास्ते इतिमन्यतेनहिदेहमा
त्रात्मदर्शिनोगेहइवदेहआसइतिप्रत्ययः संभवति देहादिसंघातव्यतिरि
क्तात्मदर्शिनस्तु देहआसइतिप्रत्यय उपपद्यते परकर्मणांच परस्मिन्ना
त्मन्यविद्ययाध्यारोपितानां विद्ययाविवेकज्ञानेन मनसा संन्यासउपपद्य
ते. उत्पन्नविवेकविज्ञानस्य सर्वकर्मसंन्यासिनोपिगेहइव
देहएव नवद्वारेपुरेआसनं प्रारब्धफलकर्मसंस्कारशेषानुवृत्त्या देहएव
विशेषविज्ञानोत्पत्तेर्देहएवास्तइत्यस्त्येवविशेषणफलं विद्वदविद्वत्प्रत्यय
भेदापेक्षत्वात् यद्यपि कार्यकरणकर्माण्यविद्ययात्मन्यध्यारोपितानि सं
न्यस्यास्ते इत्युक्तं तथाप्यात्मसमवायित्वकर्तृत्वंकारयितृत्वंच स्यादित्याशं
क्य नैवकुर्वन् स्वयंनचकार्यकरणानि कारयन् क्रियासुप्रवर्तयन् किंयत
त्तत्कर्तृत्वं कारयितृत्वंच देहिनः स्वात्मसमवायिसत् संन्यासान्न संभवति
यथागच्छतोगतिः गमनव्यापारपरित्यागेनस्यात्तद्वत् किंवास्वतएवात्मनो
नास्तीत्युच्यते नास्त्यात्मनः स्वतः कर्तृत्वंकारयितृत्वंचोक्तं ह्यविकार्योय
मुच्यते शरीरस्थोपिकौंतेय नकरोति नलिप्यत इतिध्यायतीवलेलायतीवेति
श्रुतेः १३

गी॰
टी॰
प॰

61

तर्हि फलेषु किं त्यक्त्वा सर्वैरपि कर्म कर्तव्यमिति कर्मसंन्यासस्य निरवकाशत
मित्याशंक्याविदुषः सकाशाद्विदुषो विशेषं दर्शयति यस्त्विति सर्वकर्मपरि
त्यागे शमं मरणं व्यावर्तयति आस्तइति हस्तिलभमानोपि शरीरतापेनाध्या
त्मिकादिना तप्यमानस्तिष्ठतीति चेन्नेत्याह सुखमिति कार्यकरणसंघा
तपारवश्यं पर्युदस्यति वशीति आसनस्यापेक्षितमधिकरणं निर्दिशति
नवेति देहसम्बन्धाभिमानाभासवत्त्वमाह देहीति मनसा सर्वकर्म
संन्यासेपि लोकसंग्रहार्थं बहिः सर्वं कर्म कर्तव्यमिति प्रासं प्रत्याह ने
वेति तान्येव सर्वाणि कर्माणि परित्यज्याति विशिनष्टि नित्यमिति ने
षां परित्यागे हेतुमाह तानीति यदुक्तं सुखमास्तइति तदुपपादय
ति त्यक्त्वेति जितेन्द्रियत्वं कायवशीकारस्याप्युपलक्षणं द्वे श्रोत्रे द्वे चक्ष
षी द्वे नासिके वागेकेति सप्त शीर्षण्यानि शिरोगतानि पायूप
लक्षिद्वाराणि तथापि कथं नवद्वारत्वमधोगताभ्यां पायूपस्थाभ्यां ।
सहेत्याह सर्वाणीति शरीरस्य पुरसाम्यं स्वामिना पौरैश्चाधिष्ठितत्वेन
दर्शयति आस्तेत्यादिना यद्यपि देहे जीवनवान् देहसंबन्धाभिमानाभा
सवानवतिष्ठते तथापि प्रवासीव परगेहे तत्पूजापरिभवादिभिरप्र
हृष्टन् विषीदन् व्यामोहादिरहितस्तिष्ठतीति मत्वाह तस्मिन्निति ।
विशेषणमात्तिपति किमिति तदनुपपत्तिमेवादर्शयति सर्वो हीति
सर्वसाधारणं देहावस्थानं संन्यस्य देहे तिष्ठति विद्वानिति विशेषणम
किं विकरमिति फलितमाह नत्वेति विशेषणफलं दर्शयन्नुत्तरमाह उ
च्यतइति किमविवेकिनं प्रति विशेषणानर्थक्यं चोद्यते किं वा विवेकिनं
प्रतीति विकल्प्याद्यमङ्गीकरोति यस्त्विति अज्ञत्वदेहित्वे हेतुः तदेव देहि
त्वं स्फुटयति देहेति संघातात्मदर्शिनोपि देहे स्थितिप्रतिभासः स्यादिति
चेन्नेत्याह नहीति द्वितीयं दूषयति देहादीति दृष्टादिषु देहस्यावस्थानेना
त्मावस्थानभ्रमव्याहत्यर्थं देहे विद्वानास्तइति विशेषणमुपपद्यते वि
वेकवतो देहेवस्थानप्रतिभाससंभवादित्यर्थः ननु विवेकिनो देहावस्थ

नप्रतिभानेपि वास्तुनोदेहव्यापारात्मनोकर्मणांतस्मिन् प्रसंगा
भावात् तस्यागेनकृतत्वस्यदेहेवस्थानमयुक्तंतत्राह परकर्मणांचेति
ननुविवेकिनोदिगाद्यनवच्छिंनवास्याभ्यंतराविक्रियब्रह्मात्मनो मन्य
मानस्यकुतोदेहेवस्थानमास्थातुंशक्यते तत्राहउत्पन्नेति तत्रैवमाह
प्रारब्धेति यद्धिप्रारब्धफलं धर्माधर्मात्मकंकर्मतस्योपभुक्तस्य शे
षात्तदुपभुक्तत्वाद्देहादिसंस्कारोनुवर्तते तदनुवृत्त्याचतत्रैवदेहे विशेष
विज्ञानमवस्थानविषयमुपपद्यते अतोविवेकवतः संन्यासिनोदेहेव
स्थानव्यपदेशः संभवतीत्यर्थः अविदुषस्तस्यापेक्षया विशेषणासंभ
वेपि विदुषस्तदपेक्षया विशेषणमर्थवदित्युपसंहरतिदेहएवेति
देहेस्वावस्थानविषयोविदुषस्तस्यप्रत्ययस्तद्विषयश्चाविदुषस्तस्यप्रत्ययो
देवंभेदेविदुषस्तस्यापेक्षया विशेषणमर्थवदित्युपसंहरनेवदेहेतं वि
शदयतिविद्वदिति आरोपितकर्तृत्वाद्यभावेपिस्वगतकर्तृत्वादि उ
र्वारमित्याशंकामनूद्य दूषयतियद्यपीत्यादिना क्रियास्वप्रवर्तयत्रा
त्मनइतिसर्वेणासंबंधः सर्वस्यापिप्रागुक्तेनेतसंबंधः कर्तृत्वंकारयितृत्व
ञ्चात्मनोनेत्येवंविचारयतिकिमिति यत्कर्तृत्वंकारयितृत्वंचतत्किंदे
हिनंस्वात्मसमवायिसदेवसंन्यासमात्रं भवतीत्युच्यते यथागच्छतोदेव
दत्तस्यस्वगतैवगतिस्तत्त्यागात्संन्यासमात्रं भवति अथवास्वारस्येनकर्तृ
त्वेकारयितृत्वंवात्मनोनास्तीति वक्तव्यमाद्येसंक्रितं द्वितीयेतुद्दत्स्यात
मित्यर्थः द्वितीयंपक्षमाश्रित्योत्तरमाहअत्रेति उक्तेर्थेवाक्योपक्रम
मनुकूलयतिउक्तेहीति तत्रैववाक्यशेषमपिसम्पादयतिशरीरस्थोऽ
पीति स्मृत्युक्तेर्थेश्रुतिमपिदर्शयति ध्यायतीवेति उपाधिगतैवसर्वा
विक्रियानात्मनिस्वतोस्तीत्यर्थः १३ ॥

स्वामिकृतटीका

एवंतावच्चित्तशुद्धिशून्यस्यसंन्यासात्कर्मयोगोविशिष्यतेइत्युक्तमेवंवि
ने इदानींशुद्धचित्तस्यसंन्यासःश्रेष्ठइत्याह सर्वकर्माणीति वशीजि
तचित्तः सर्वाणिकर्माणिविक्षेपकाणिमनसाविवेकयुक्तेनसंन्यस्य

सुखंयथाभवतिएवंज्ञाननिष्ठःसन्नास्तेकुत्रास्तइत्यतआह नवद्वारेनेत्रे
नासिकेकर्णौमुखंचेतिसप्तशिरोगतानिअधोद्वेपायूपस्थरूपेइत्येवंन
वद्वाराणियस्मिन्पुरेपुरवद्देहेभावस्थन्येदेहेसुवतिष्ठति अहंकाराभा
वादेवस्वयंतेनदेहेननैवकुर्वन् ममकाराभावाच्चनकारयन्नित्याविश
ष्टवित्याह तिसुखमाप्रशुद्धविज्ञानादिसंन्यस्यपुनःकरोतिकारयतिच ।
नत्वयंतथाअतःसुखमास्तइत्यर्थः १३ ॥

पिशाचभाष्यं

यस्तुपरमार्थदर्शी सर्वकर्माणीति सनित्यनैमित्तिकंकाम्यंप्रतिषि
द्धंचतंसर्वाणिकर्माणितानिमनसाविवेकबुद्ध्याअकर्मदर्शनेनसं
न्यस्येदित्यर्थः आस्तेतिष्ठतिसुखमित्यर्थः वाङ्मनःकायचेष्टानिराया
सःप्रसन्नचित्तःआत्मनोन्यत्रनिवृत्तात्यन्तवाह्यसर्वप्रयोजनइतिसुख
मास्तेइत्युच्यतेवशीजितेन्द्रियइत्यर्थः क्वास्तइत्यत्राह नवद्वारेसप्तशी
र्षण्यात्मनउपलब्धिद्वाराणि अधोद्वेमूत्रपुरीषविसर्गार्थेइतितै
र्द्वारैर्नवद्वारंपुरमुच्यते शरीरंपुरमिवपुरमात्मैकस्वामिकंतदर्थप्रयो
जनैश्चेन्द्रियमनोबुद्धिविषयैःअनेकफलविज्ञानोत्पादकैःपौरैरिवा
धिष्ठितेदेहेदेहीसर्वाणिसंन्यस्यास्तेकिंविशेषणेन सर्वोपिदेहीदे
हस्संन्यासीवदेहएवास्तेइतिचेदुच्यते यस्त्वज्ञोदेहेन्द्रियसंघातमा
त्रात्मदर्शीस सर्वोपिदेहेभूमावासनेवाआस्तइतिमन्यते नहिदेह
मात्रात्मदर्शिनोगेहइवदेहेआस्तइतिप्रत्ययउपपद्यते परकर्माणांच
परस्मिन्नात्मन्यविद्ययाध्यारोपितानांविद्ययाविवेकज्ञानेनमन
सासंन्यासउपपद्यते उत्पन्नविवेकज्ञानस्यसर्वकर्मसंन्यासिनोपिदे
हएवनवद्वारेआसनंप्रारब्धकर्मादिसंस्कारशेषानुवृत्त्यादेह
एवविशेषविज्ञानोत्पत्तेः देहएवास्तेइत्यस्त्येवविशेषणफलंविद्वद्वि
द्वत्प्रत्ययभेदापेक्षत्वात् यद्यपिकर्मभागविषयाध्यारोपितानिसंन्यस्यास्तेइ
त्यात्मकं तथापिआत्मसमवायिकर्तृत्वंकारयितृत्वंचदेहिनःस्वात्म
समवायिसत्संन्यासंभवति यथागच्छतोगतिःकिंवासतएवात्मनो।

नास्य ज्ञोच्यते नास्ति स्वात्मनः कर्तृत्वं कारयितृत्वं वा उक्तं हि अविका-
र्योयमुच्यत इति शरीरस्थोपि कौन्तेय न करोति न लिप्यत इति ध्यायती-
व लेलायतीवेति श्रुतेः १३ ॥

रामानुजभाष्यं

आत्मनो देहाकारपरिणतायां प्रकृतौ कर्तृत्वसंन्यास उच्यते सर्वेति आत्म-
नः प्राचीनकर्ममूलदेहसंबंधप्रयुक्तमित्थं कर्मणां कर्तृत्वं न स्वरूपप्र-
युक्तमिति विवेकविषयेण मनसा सर्वाणि कर्माणि नवद्वारे पुरे संन्यस्य
वशी देहस्य देहाधिष्ठानमकुर्वन् देहं नैव कारयन् सुखमास्ते १३ ॥

अभिनवगुप्तकृतटीका

नैष्कर्म्यलक्षणमाह सर्वेति यथा वेश्मान्तर्गतस्य पुंसो न गृहगतैर्जीर्णत्वा-
दिभिर्योगः एवं वशमनस्त्वादिच्छिद्रगवाक्षनवकालेकृतदेहगेह-
गतस्यानन्तद्धर्मयोगः १३ ॥

परमार्थप्रपा टीका

इदानीं शुद्धचित्तस्य संन्यास एव श्रेयानित्याह सर्वकर्माणीति वशी जित-
चित्तः सर्वकर्माणि विक्षेपकाणि विवेकयुक्तेन मनसा संन्यस्य स्वत एवो-
परतानि कृतात्सुखं यथा भवति तथास्ते वर्तते कुत्रास्त इत्याह नव-
द्वारेति नेत्रकर्णनासाद्वाराणि मुखमेकं चेति सप्त पायूपस्थं चेति द्वे ए-
वं नवद्वारे पुरे अहंभावप्राप्ते देही अवतिष्ठति यथा कश्चिन्नवद्वारे न-
गरे तिष्ठन्नपि नागरधर्मान्न स्पृशति तद्वदहंकाराभावाच्छुद्धचित्तो न कुर्व-
न्ममाकाराभावाच्च न कारयन् अशुद्धचित्तस्तु करोति कारयति च नतु
ज्ञानाभिधर्मं न च मे प्रवृत्तिरित्यादिवाक्यैः स्वतंत्रस्य शुद्धस्य नैव कर्तृत्व-
कारयितृत्वादिना स्वतंत्रत्वं कथमुक्तं अथास्तामीश्वरस्यैव प्रयोज-
कत्वमिति चेन्न हि सत्यस्वकार्यप्रवर्तकत्वेनास्मदादिवत्तस्यापि विषमत्वं
स्यादित्याह १३ ॥

वनमाली टीका

अपक्वकषायस्यास्थिरचित्तस्य कर्मयोगः श्रेयानिति पूर्वं प्रपंच्याधुनाप-
क्वकषायस्य शुद्धचित्तस्य संन्यास एव श्रेयानित्याह सर्वेति अदेही देहं दि

यादावहंममेत्यभिमानशून्यः नित्यं नैमित्तिकं काम्यं निषिद्धं चेति सर्वा॰
णि मनसा स्वस्य स्वतो कर्तृत्वे तिष्ठिन्नवनीश्वरकारितानीमानि नवद्वारे
मेंद्रिये देहेज्ञायते नमयेति देहस्यैव स्वस्य न कुर्वन्न कारयन्नास्ते किंतु स्वस्य दे॰
हादितोभिन्नत्वपानेंद्रियता कर्तृत्वादिना त्वानेन स्वरूपमास्ते कृतो यतो वशी
नियमितवान्योतरिंद्रियः कर्मकर्तृत्वं कारयितृत्वं च जीवस्य देहाद्यभिन्ना॰
त्वाभिमानात् भवति तद्विहतोऽहमानंदस्य स्वतो निर्विकारस्य तदुभयो॰
न संभवतीति भावः १३ ॥

अतमवैजयतीटीका

एवं युक्तायुक्तयोर्मोक्षबंधव्यवस्थामुक्त्वेदानीं प्रकृतो सर्वकर्मार्पयि
त्वा कर्म करोत्यपि स नैव करोतीत्याह सर्वकर्माणीति वशी विजितें
द्रियो मस्वल: उक्तप्रकारेकत्वलनान्निप्रधाने विवेकयुक्तेन मनसा स
र्वकर्माणि सर्वाणि वर्णाश्रमोचितानि नित्यनैमित्तिकानि सर्वेंद्रिय
कृतानि श्रवणादीनि वा कर्माणि संन्यस्य संन्यस्यार्पयित्वेत्यर्थः नवा
द्वारे श्रोत्रे द्वे नेत्रे द्वे नासिके द्वे मुखं चैकमिति सप्त द्वाराणि शिरसि पायूप
स्थाख्ये द्वे वाधोदेश इति नवद्वाराणि यस्मिन् सः तस्मिन् पुरे पुरवद्देहभा
ववर्जिते देहे सुखं सुखेनास्ते तिष्ठति किं कुर्वन् देहाभिमानत्यागात्स्व
तान: ते च तः देहेंद्रियादिभिस्तानि कर्माणि वहिः कुर्वन्नपि स नैव कुर्वन्क
र्त्ता न भवति न कारयन् स नैव कारयिता चेत्येवं विजानन् सन्नित्यर्थः १३

श्री स्वा॰ — अशुद्धचित्तस्य केवलात्संन्यासा **मधुसूदनीटीका** कर्मयोगः श्रेयानिति पूर्वोक्तं प्रपंचायशुनाशुद्ध
त्तस्य सर्वकर्मसंन्यासः वश्रेयानित्याह ॥ नित्यं नैमित्तिकं काम्यं प्रतिषिद्धं चेति सर्वाणि कर्माणि मनसा कर्मण्य॰
कर्मयः पश्येदित्युक्तेनाकर्त्रात्मस्वरूपसम्यग्दर्शनेन संन्यस्य परित्यज्य
प्रारब्धकर्मवशाद्देहे तिष्ठत्येव किं दुःखेनेत्याह सुखमनायासेन॰
श्रायासहेतुकायवाङ्मनोव्यापारशून्यत्वात् कायवाङ्मनोभिः स्वच्छंद
निवृत्तेन व्याप्रियेत तत्राह वशी स्ववशीकृतकार्यकारणसंघातः क्वा॰
स्ते नवद्वारे पुरे द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके वागेकेति शिरसि सप्त द्वा॰
पायूपस्थे अध इति नवद्वारविशिष्टे देहे देही देहाभिमानात्मदर्शी प्रवासीव

परगृहीतत्वज्ञापरिभवादिभिरप्रहृष्टोऽविषीदन्नहंकारममकारशू
न्यस्तिष्ठति अतोहि देहतादात्म्याऽभिमानाद्देहएव ननु देही सर्वदे
हाधिकरणमेवात्मनोऽधिकरणं मन्यमानोऽहं देहमावासनेवाहमा
स इत्यभिमन्यते ननु देहेऽहमास इति भेददर्शनाभावात् संघातव्यति
रिक्तात्मदर्शीत्व सर्वकर्मसंन्यासी भेददर्शनाद्देहेऽहमास इति प्रतिपद्य
ते अतएव देहादिव्यापाराणामविद्ययात्मन्यक्रिये समारोपितानां
विद्ययाबाध एव सर्वकर्मसंन्यास इत्युच्यते एतस्मादेवाज्ञवैलक्षण्य
त्वफलं विशेषणं नवद्वारे पुरे आस्त इति ननु देहादिव्यापाराणामा
त्मन्यारोपितानां तेषां व्यापाराणां तीरस्य हन्त इव विद्ययाबाधेऽपि सव्यापार
णात्मनः कर्तृत्वं देहादिव्यापारेषु कारयितृत्वं च स्यादिति नेत्याह नैव
कुर्वन्नकारयन्नास्त इति संबंधः १३ [illegible]

[illegible] ॥

सदानंदीटीका

संन्यासात्केवलात्कर्मयोगाच्छुद्धधियोवरः इत्युक्ताहाफलाच्छुद्धबुद्धेःसं
न्यासंवदे १ नित्यंनैमित्तिकंकाम्यंनिषिद्धंचेतिसर्वशः कर्माणिकर्म
याप्यपरोक्षदित्यज्ञोक्तविवेकतः २ अकर्त्रात्मस्वरूपस्यविचाराद्विनिवेतसा
त्यक्त्वासारव्यवशतोनायासेनैवतिष्ठति ३ आयामहेवकायवाङ्मनो
व्यापारवर्जितः कार्यकारणसंघातोयेनादौस्ववशीकृतः ४ कुत्सतइ
त्याहभगवान्देहभिन्नात्मनत्वटक नवद्वारविशिष्टेस्मिंदेहेतिष्ठत्यसौपु
रे ५ परगेहेप्रवासीवनिर्ममोनिरहंकृतिः देहमात्रात्मदर्शीत्तुदेहा
धिकरणोनरः ६ स्वस्याधिकरणंमत्वाहंदेहमौनयासने अहमासेऽभि
मानीतिनतामेदेहइत्यपि ७ संघातव्यतिरिक्तात्मदर्शिनस्तुप्रपद्यते दे
हस्थासइतिज्ञानेविद्ययाभ्रांतिबाधनात् ८ ननुदेहादिव्यापाराआत्म
न्यारोपिताभ्रमात् विद्ययाभ्रांतिबाधेहितेषांबाधोभवत्विति ९ किंत्वात्
मनःस्वकीयेनव्यापारेणास्यकर्तृता तथाकारयितृत्वंस्याद्देहादिव्याप्ट

गी॰
टी॰
पं॰ द्वयस्या४

64

नाविति १ नैवमात्माक्रियोयास्तेनैवकुर्वन्नकारयन् यथाकाशस्यनीलि
म्नासंबंधोनास्तिसर्वथा ११ तथात्मनोनसंबंधःकर्तृतादिभिरप्यपि अक्रिय
स्यास्यकर्तृतायैरसंगिनः १२ कर्तृतायाःकुतोधर्माभवंत्याविद्यकाजडाः।
आकाशेवर्णवन्नास्तिकर्तृतादिस्ततोऽमले १३ आविद्यकंतद्विधस्तेनतथा
जन्ममात्रतः तस्मात्पात्मासकर्मास्तेनैवकुर्वन्नकारयन् १४ वसन्देहागारेप
रमयदनिष्टोविजयतेनकर्तानोभोक्ताक्वचिदपिकदाचिद्विहरणो निजाते
हारामोविषयविरतिर्नात्मशरणः परब्रह्मद्वैते परिमितवपुःसन्विहरति १५ १२

नीलकंठी टीका

एवमविद्वान्फलासक्त्यानासक्तिवशात्कर्मभिर्बध्यतेनबध्यते
वेत्युक्ते विद्वांस्तुतद्विपरीतइत्याह सर्वकर्माणीति वशीजितचित्तःसमा
धिस्थोयोगीनवद्वारेनवैवपंच ज्ञानेंद्रियाणिषट्ःप्राणास्तेनैवतत्स्थवर्ती
नांकर्मेंद्रियाणांसंग्रहः बुद्ध्यहंकारचित्तानीतिनवपतानिद्वाराणीवपु
रगतेजीवस्यभोगार्थंविषयप्रवेशस्थानानि यस्मिन्नवद्वारेशरीराख्येपुरेवि
चित्रवासनाकल्पितानंतविषयवतिअनेकैःकर्मसचिवैरधिष्ठितेस्वच
छःस्वदिनानागुणवति मनसासर्वद्वारोद्घाटनंक्रियाकयासह सर्वाणि
कर्माणिप्रयतिरिवराजकार्याणि संन्यस्य स्वस्वनिर्विकल्पसचिन्मात्ररू
पेणास्ते कर्माणितेत्रस्यैवधर्मोनत्वात्मनइतिदेहेत्यक्तेशकास्येव तथा
चश्रुतिः शरीरेपापमनोहितेति यत्रसहादेःसकृतोमदेतेविहायरोगत
न्वाऽऽत्मायामितिच देहीसन्देहाभिमानकाले बुध्यानेपीत्यर्थः नस
पिनैवकुर्वन्नास्तेनापिकारयन्नास्तेराजेवामात्येषुनिहितभारः समाधौ
तेत्रैणामहात्मनःसंबंधाभावदर्शनात् यद्वानवद्वाराणिचक्षुःश्रोत्रना
साबिलद्वैद्वानिषट्समस्तेस्वविश्रयस्तानेहइति अस्मिन्पक्षेइंद्रियाणिप
रिवारकाबुद्धिरमात्योऽहंकारोयुवराजइत्यादिकमूह्यं विदुषःकर्मसंबं
धएवनास्तिकुतस्तत्फलासक्त्यानासक्तीइतिभावः १३ ॥

आनंदीटीका

वशीस्वतंत्रोगुणसमुदायात्मिकायाःप्रकृत्यायोगाभ्यासवशात्पृथग्
भूतःसर्वेषांमहदादीनांप्रकृतिविकृतीनांकर्माण्यपृथ्वसायादीनि

मनसासमस्य मननाभावो देवोपेत्तेंद्रियजयपो ऽर्भावे ऽहंकारसं
यमो नैव कुर्वन्नर्थवत्वसंयमो नैव कारयन् प्रकृतिजयेश्रमः न
वद्वारे पुरे शरीर एव गृहे इत्तु एवमात्मजीवन्मुक्त्या विश्रामः भजति
यथा चक्रवर्ती राजा विजितसकलभूमिरश्रमप्रेप्सायाः प्रभावा
त् कृतकृत्यो नैव कुर्वन्न कारयन्न व द्वारे पुरे सुखमास्ते तथैत्य
र्थः ॥ १३ ॥

+ अथैवंविधयोः कर्मयोगसंन्यासयोर्यथा **रामकंठीटीका** योमिन्नबंधपादितयोरुपसंहारावसरे स्वरूपानुवा
पूर्वं तदत्रय
तु नैष्ठिकी फलसिद्धिस्स्व
कंठमाह +

+ इह मतः प्राहेन बुद्धिरेव विवर्तिता न बुद्धिविषयमतो लौकिकं योगिम
वान्धिषु तत्राविर्तिभिन्नरमायाशक्तिवशाद्भूतं हैतप्रपञ्चपतिमिरमयं लौ
किकं येन लोक एकमेव परमार्थसतत्वं नानात्वेन मन्यते योगिसंवद्धितं
येन भगवदनुग्रहाविर्भावितविद्याशक्तिविमलीकृतेन योगिनः सर्वभ
वान्यथाक्रपरमात्मैकरूपतया मन्येत तदेवंविधमभयात्मकत्वमनसो
मुति नैवानुगीतासु भगवदहवसैवार्जुनवोधायैवेति सूत्रविरचनक्रमेः
णाप्रदर्शितं यदाहं उभे वां मनसीगत्वा भूतात्मानमपृच्छताम् आवयोः
श्रेष्ठमाचक्ष्व छिंधि नौ संशयं विभो मन इत्येव भगवांस्तदा प्राह सत्वरौ
अहं कामदुघात्मेति ते प्राह वागथ मतो माहं स्थावरं जंगमं चैवा
विद्धि मे मनसी मम स्थावरं मत्सकाशे वै जंगमं विषयं तव ते एवंविधेन सर्व
स्थिरपरमात्मस्वरूपमननैकनिष्ठत्वात् स्थिरतया स्थावरशब्दोक्तेन पर
मेश्वराभ्याशवर्तिना मनसान्तःकरणेन सर्वकर्माणि चित्तवाक्कायप्रवृत्ति
वर्त्याः सर्वाः क्रियाः शास्त्रचोदिताः शारीरवाच्याभिधारिणीश्च संन्यस्य वन्य
हेतना नाफलाभिसंधित्यागाद्धृत्सापे व विक्षिप्य तेनैव क्रमेण वशीकृ
तात्मा स्वीकृतस्वभावः सत्कर्मयोगी सुखमास्ते जो घमवतिष्ठते निमर्गो
निहत निर्विकल्पकैकप्रसंपर्क निरतस्पानंदमये स्वात्मनि विश्राम्यतीत्यर्थः
वं^ वीरस्यासत्त्रास्त अस्मिन् नवद्वारे देह एव वापिष्ठान मामात्याद्देहत्वेनाभिरुपि
ते अत एव वीरस्थेन नवद्वारे वतः श्रोत्रचक्षुर्नासिकाद्वाराणि षट्सुखानि द

गी·
टी·पं·
65

र्शनश्रवणाघ्राणादिक्रियाप्रवृत्तिवर्त्मानि तथान्नवपायूपस्थानि निर्ग
णा[illegible]वमनविसर्गक्रियाप्रवृत्तिवर्त्मानीति नवद्वाराणि यस्मिन्
तत्राहंयवित्मात्रपरमात्मस्वभावविश्रान्तत्वात्सर्वाः क्रियाः सर्वा
णि कार्याणि स्वरूपमात्रत्वेन प्रतिपाद्यमानो न कुर्वन् इतरशरीरवत्
कर्माभिमानमनुभवन् केचित्किल प्रतिशरीरं भिन्नान्तुरीश्वराः
स्वाभाविकेन प्रतिनियतेन कर्तृत्वेन युक्तान्मन्यन्ते तथा न कारयन् ।
अन्यान्प्रयोजयन् अपरे हि केचन सन्निधिमात्रेणाजड्याः प्रकृतेः ।
क्रियाप्रवृत्तौ प्रयोजकमात्मानं मन्यन्ते अस्य तु उभयथापि कर्तृत्वं प्रति
षिध्यते अयं हि परमात्मसमापन्नत्वान्न करोति न कारयति [illegible]
[illegible] ॥

+ एवमुक्तयुक्त्या वशीलमानः कर्मयोगे लाभिकी [illegible] टीका न केवलं देहाहंभावमेव त्यजन्न करोति याव
देहममतामपीत्याह +
वशी स्वीकृतस्वभावः सर्वाणि कायवाङ्मनस्सनिर्वर्त्यानि स्वाभाविका
नि वैदिकानि च कर्माणि मनसा ममतनात्मकेनान्तःकरणेन संन्यस्य
त्यागाय समर्प्य सुखं यथा भवत्येवमास्ते इत्यत आह नवद्वारे नेत्र
नासिके कर्णौ मुखं च सप्त शिरोरन्ध्राणि अधः पायूपस्थरूपे द्वे एवं न
वद्वाराणि यस्मिंस्तस्मिन् स्थिरदृग्वा लनवकालं कृते पुरे देहगेहे
देही देहाभिन्नात्मदर्शी अ[illegible]तो हि देहतादात्म्यादेहमेव तथा देहेऽहंकार
भावान्नैव कुर्वन् ममकाराभावाच्च न कारयन् अतः सुखमास्ते इत्यु
र्थः यथा विप्रमात्तगीतस्य [illegible] ग्रहगतैर्जीर्णत्वादिभिर्योगः एवं दे
हगेहगतस्य परमात्मसमापन्नस्य तत्तत्कर्मयोगः तदुक्तं श्रेष्ठासंगल
त्वाणि योगवासिष्ठे अ[illegible]निमज्जनमर्थेषु भावनाभावनेष्वपि अवेदने
सुखादीनामसंसंगपरे विदुरिति [illegible]

पंचोलीटीका

एवं तावच्चित्तशुद्धिमूलस्य संन्यासात्कर्मयोगो विशिष्यत इति इदानीं
शुद्धचित्तस्य संन्यासः श्रेष्ठः इत्याह सर्वकर्माणीति वशी जितेन्द्रियः देही
आत्मा मनसा विवेकबुद्ध्या कर्मादौ अकर्मादिदर्शनेन सर्वकर्माणि नि
त्यनैमित्तिककाम्यनिषिद्धानि कर्माणि संन्यस्य परित्यज्य नवद्वारे पुरे

नः

नवद्धिद्वारेदेहेस्वयंअकुर्वन्नकारयंश्चअकारयन्सुखंसुखेनआस्तेतिश्रुति १३

रसावीरसमसिद्धोधिनी॥

एतदेवस्पष्टयति सर्वकर्माणीति वशीस्वायत्तीकृतेंद्रियः सर्वा॰
णिकर्माणिकथंभीष्ममित्यादिरूपाणिविक्षेपकाणिसंकल्पात्मनसा
निश्चयात्मकेनज्ञानेनदृढीकृतचेतसासंन्यस्यविहाय नवद्वारेन
वानिपूर्वैषांद्वाराणीकृतत्वात्नवीकृतानिद्वाराणियत्रतस्मिन्पुरेस्वकी
येपरकीयेवानगरेसुखंयथास्यात्तथास्ते कीदृशःसन्सुखमास्तेइ
त्यादृ देहेनेति एवशब्दोभिन्नक्रमः कारयन्नित्यनेनान्वेति देहेन
कर्मेंद्रियैःस्वयंकुर्वन् नतुनरन्यैर्भटैःकारयन्नेवकोर्थः सैन्यानाम
नायकत्वेन शीघ्रंपलायनसंभवात्स्वयंचकुर्वीत सैन्याश्चकारयेदि
ति शत्रून्विजित्यनिष्कंटकंराज्यसुखमनुभवतीत्यर्थः १३॥

मथभाष्य

सर्वकर्माणीति मनसेति विशेषणादभिमानत्यागः नच॰
करोतिवस्तुतइत्यादृ १३॥

भाषा अनुवाद

इन सब बातों से अशुद्ध चित्त मनुष्य को संन्यास की अपेक्षा निष्काम कर्म करना ही श्रेय है यह विस्तार पूर्वक कहि कर अव शुद्धचित्त पुरुष को संन्यास ही श्रेष्ठ है यह कहते हैं कि जिनाचित्त विवेकयुक्त बुद्धि के द्वारा विक्षेप कारक सब कर्म छाड़ि जे से स्ववश रहते जैसे ज्ञाननिष्ठ युक्त होके भी स्ववश रहते हैं सो कहो कि कहां रहते तो कहते हैं कि नवद्वारपुर जो अहङ्कार सून्य शरीर तिसमें आत्म स्वरूप से स्थित रहते हैं और अहङ्कार के अभाव से आप शारीरक कर्म नहीं करते और ममता के अभाव से दूसरे से भी वे कोई काम नहीं करावते हैं यह शुद्ध औ अशुद्धचित्त मनुष्यों का भेद भगवानने कहा १२ ।

दोहा

कर्मसमस्तहित्याग मन सुखी जीतेंद्रि होय नौद्वार पुर देह में करे न करावे सोय १३॥

67

नकर्तृत्वंनकर्माणि लोकस्यसृजतिप्रभुः नकर्म
फलसंयोगं स्वभावस्तुप्रवर्तते १४॥

शांकरभाष्यं

किंचनकर्तृत्वमिति नकर्तृत्वंस्वतः कुर्विति नापिकर्माणिरथघटप्रासा
दादीनि ईप्सिततमानिलोकस्य सृजत्युत्पादयति प्रभुरात्मानापिरथादि
कृतवतस्तत् फलेनसंयोगंनकर्मफलसंयोगंयदिकिंचिदपि स्वतोन
करोतिनकारयतिचदेहीकस्तर्हि कुर्वन्कारयंश्च प्रवर्तत इत्युच्यतेस्वभा
वस्तुस्वोभावः स्वभावोऽविद्यालक्षणाप्रकृतिः मायाप्रवर्ततेदैवी हीत्या
दीति वक्ष्यमाणा १४॥

आनंदगिरिकृतटीका

आत्मनोयदुक्तंकारयितृत्वं नास्तीतितत्प्रपंचयति नेत्यादिना यद्यपिलो
कस्यकर्तृत्वंनसृजतीति नास्तीतिकारयितृत्वंतथापिरथघटादीनि
कुर्वन् भवतिकर्तेत्याशंक्याह नकर्माणीति तथापिभोजयितृत्वेन वि
क्रियावत्त्वंदुष्परिहारमित्याशंक्याह नकर्मेति कस्तर्हिप्रवर्तकस्तत्राह
स्वभावस्त्विति कुर्विति कर्तृत्वेलोकस्यनसृजत्यात्मेति संबन्धः रथादीनां
कर्मत्वंमाभूदितिविशिनष्टि ईप्सिततमानीति आत्मनोदेहादिस्वामित्वेनप्रभुत्वंरथादिकृतव
तोलोकस्य रथादिफलेनसंबंधमपिनसृजत्यात्मेत्यात्मनोभोजयितृत्वं
प्रत्याचष्टेनापीति चतुर्थपादंशंकोत्तरत्वेनावतारयतियदीत्यादिना स्व
भावशब्दस्तर्हीत्याशंक्यव्याकरोति अविद्यालक्षणेति प्रकृतेर्विद्याभाव
त्वंसूचयितुंमायेत्युक्तंमायात्वमस्यामेवसत्तेनप्रधानविलक्षणेत्याह दैवी
हीति १४॥

स्वामिकृतटीका

नन्वेषएवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतएषएवा
साधुकर्मकारयतितंयमेभ्योलोकेभ्योऽधोनिनीषतइत्यादिश्रुतेः पर
मेश्वरेणैवशुभाशुभफलेषुकर्मसुकर्तृत्वेनप्रयुज्यमानः अस्वतंत्रःपु
रुषःकथंतानिकर्माणित्यजेत् ईश्वरेणैवज्ञानमार्गेप्रयुज्यमानस्तु
त्यजतिचेत् एवंसतिवैषम्यनैर्घृण्याभ्यांप्रयोजककर्तृत्वादीश्वरस्यापि
पापपुण्यसंबंधःस्यादित्याशंक्याह नकर्तृत्वमितिद्वाभ्यां प्रभुरीश्वरो

गी॰
टी॰
पं

68

जीवलोकस्य कर्तृत्वादिकं न सृजति किं तु जीवस्यैव स्वभावो विद्यैव कर्तृत्वादिरूपेण प्रवर्तते अनाद्यविद्याकामवशात्प्रवृत्तिस्वभावं जीवलोकमीश्वरः कर्मसु नियुंक्ते न तु स्वयमेव कर्तृत्वादिकमुत्पादयतीत्यर्थः १४

पिशाचभाष्यं

न कर्तृत्वं स्वतः न च कर्तृत्वं अपि कर्माणि रथप्रासादादीनि ईप्सिततमानि लोकस्य सृजति उत्पादयति प्रभुरात्मा नापि रथादिकृतवतस्तत्फलेन संयोगं कर्मसंयोगं यदि किंचिदपि स्वतो न करोति न कारयति च देही कस्तर्हि कुर्वन् कारयंश्च प्रवर्तत इत्युच्यते स्वभावस्तु स्वभावश्चाविद्यालक्षणा प्रकृतिर्माया प्रवर्तते १४

रामानुजभाष्यं

मातादात्मनः स्वाभाविकं रूपमाह न कर्तृत्वमिति अस्य देवतिर्यङ्मनुष्यस्थावरात्मना प्रकृतिसंसर्गेण वर्तमानस्य लोकस्य देवाद्यसाधारणं कर्तृत्वं देवाद्यसाधारणानि कर्माणि न कर्मजन्यदेवादिफलसंयोगं वा अयं प्रभुरकर्मवश्यः स्वाभाविकस्वरूपेणावस्थित आत्मा न सृजति नोत्पादयति कस्तर्हि स्वभावस्तु प्रवर्तते स्वभावः प्रकृतिवासना अनादिकालप्रवृत्तपूर्वकर्मजनितदेवाद्याकारप्रकृतिसंसर्गकृततत्तदात्माभिमानजनितवासनाकृतमीदृशं कर्तृत्वादिकं न स्वरूपप्रयुक्तमित्यर्थः १४ ॥

अभिनवगुप्तकृतटीका

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते यत एष आत्मा न किंचित्कस्यचित्करोति प्रवृत्तिस्तु स्वस्य स्वभावमात्रेण फलेच्छया तथाहि संवेदनात्मनो भगवतः प्रकाशानन्दस्वातंत्र्यपरमार्थस्वभावस्य स्वभावमात्रात्तिसृणां सृष्टिस्थितिसंहृतिप्रवृत्तेः स्वस्वभावान्न मनागप्यपायो जातुचिदिति न कर्तृत्वस्यातिरिक्तं कर्तृत्वं किंचित् तत्स्वभावात्मकानि कर्माणि न तस्यैव कस्य फले को वा कर्मफलसंबंधः कर्मात्र क्रिया कर्मफलमपि च क्रियाफलमेव तथाहि चंद्रनपरिवर्तनादिक्रियानाम्ना न चासौ चटनिष्पत्त्यादिना संविदं न वंतीति तन्न तस्मात् स्वतंत्रः परमेश्वर एव तथा तथा भातीति न तत्कृता क्रियातत्फलादिकमिति सिद्धांतः

+ ननु जानामि धर्मं न च मे प्रवृत्तिरित्यादिवाक्यैरस्वतन्त्रस्य पुरुषस्य नैव कुर्वन्न कारयन्नित्यादिना स्वातन्त्र्यं कथमुक्तं अथात्मा मीश्वरस्यैव प्रयोजकत्वमिति चेत्तर्हि सदसत्कार्यप्रवर्तकत्वेना स्मदादिवत्तस्यापि विषमत्वं स्यादित्याह +

[illegible] ॥ १४ न कर्तृत्वमिति द्वाभ्यां प्रभुरीश्वरोऽपि

परमार्थप्रपा टीका

+ नकर्तृत्वमिति द्वाभ्यां प्रभुरीश्वरोपि लोकस्य जीवलोकस्य कर्तृत्वं कर्मा
णि कर्मफलसंसयोगं वा न सृजति न प्रयोजयति तर्हि स्वतन्त्रः स्यादित्या
ह स्वभावस्तु इति अनाद्यविद्यायोगोत्पन्नस्तत्संस्कारः स्वभावः स एव
लोकेषु प्रवर्तते प्रवृत्तिजनको भवति स एवेश्वरोऽनुग्रहोति [illegible]ग्रहो वेति
कथ्यते १४ ॥

वनमाली टीका

ननु यदुक्तं नैव किंचित्करोमीति मन्येतेति सा भ्रान्तिः कर्ता शास्त्रार्थवत्त्वादि
ति सूत्रेण जीवस्य कर्मकर्तृत्वोक्तेस्तथा च कथं भ्रान्तिरूपज्ञानान्मोक्ष
स्तदुपदेष्टुर्विप्रलम्भकत्वप्रसंगाच्चेत्याशंकां निरासाय श्रीहरिश्चैतदेव
कुर्वन्कारयन्नपि स्वातंत्र्येण न करोति कारयति चेत्युच्यते इत्याह नेति
देहेन्द्रियाद्युपाधिना यः प्रभुः समर्थो जीवः लोकस्य देहेन्द्रियादेः कर्तृत्वं न सृ
जति कर्माणि स्वयं न सृजन् कर्मफलसंयोगं संबंधं स्व[illegible]वा सृज
ति कर्मकर्तृत्वाभावादेव कर्मजन्यफलसंबंधो नास्तीत्यर्थः स्वं जीवं भा
वयति व्यापारयतीति स्वभावः परमेश्वरः स एव प्रवृत्तः स्वयं करोति कर्म
नाहं स्वातंत्र्येण किंचित्करोमि तदधीनकर्मणो वाहं विहितकृदिति भाव
यत्रैव प्रवर्तत इत्यर्थः एक एव साधु कर्म कारयति तं यमुन्निनीषत एष
उ वासाधु कर्म कारयति तं यमधो निनीषत इत्यादिश्रुतेः अज्ञो जन्तुरनी
शोऽयमात्मनः सुखदुःखयोः ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वेति
स्मृतेश्च न च भगवान्कांश्चित्सुखयति दुःखयति च कांश्चिदिति विषमो नि
र्घृणश्च स्यादिति वाच्यं वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयतीति सूत्रे
ण पुण्येन पुण्यं लोकं नयति पापेन पापमिति श्रुत्या च जीवादृष्टसापेक्षक
र्तृत्वान्नवैषम्याद्यसंभवात् न च विविधकर्माणि तेनैव कारितमिति वैष
म्यादिकं तदवस्थमिति वाच्यं पूर्वपूर्वकर्मसापेक्षतयैवोत्तरोत्तरैहिककर्मका
रयितृत्वे कर्मणां प्रवाहानादित्वेन दोषाभावात् न चैवमागतं जीवस्य कर्मा

गी॰
टी॰
पं॰ ६

69

दीस्वातंत्र्यं सर्वसर्वकर्मणाममपि जीवेनेश्वरप्रेरितेनैव कृतत्वात् नचैवं जी
वस्य स्वर्गनरकादिभोगो न स्यात्तस्य कर्माभावादिति वाच्यं अनाद्यविद्यया
देहेंद्रियकर्मादृष्टादावहंममेति प्रवाहानाद्यभिमानस्ततः प्रागुक्तसंबंधे
नकर्तृत्वादसुखावद्दुःखादेर्हेतोत्पन्नदेहस्य संयोगेन शुभाशुभवद्वास्तवस्य
जीवे विद्यमानत्वात् अतोविद्यासंबंधादीश्वराधीनत्वात् स्वतोकर्तृत्वा
जीवस्य कर्तृत्वादिबोधकवाक्यद्वय मप्युपपन्नमिति भावः १४

उत्तममैवजयंती टीका

नन्वात्मनः कर्तृत्वं कारयितृत्वं च सर्वेषामत्यंतसिद्धं देही नैव कुर्वन्नैव कार
यन्नित्युक्तिः कथमुपपद्यते एवंतस्य यदि कर्तृत्वादिकं नास्ति तर्हि को वा
करोति को वा कारयतीत्याशंक्यात्मनः प्रकृतिसंबंधत्वेन कर्तृत्वादिकं वद
न् शुद्धं स्वाभाविकं स्वरूपमाह नकर्तृत्वमिति प्रभुः शरीरेंद्रियादिपतिरक
र्माधीनः स्वस्वाभाविकरूपावस्थितः प्रकृतिसंबंधरहितः प्रत्यगात्मास्य
लोकस्य सुरासुरनरतिर्यक्स्थावरादि विविधाकाररूपप्रकृतिसंबंधेनाव
स्थितस्य जनस्य कर्तृत्वं न सृजति त्वं कर्म कुर्वित्येवं कारयिता न भवति तस्य
कर्माणि चेप्सिततमानि वस्त्रालंकारादीनि न सृजति कर्तापि स्वयं न भवति ना
पि च तस्य कर्मफलसंयोगं सृजति भोक्ता भोजयिता चापि स्वयं न भवति एवं
चेत्तर्हि कः कर्ता कारयिता तत्प्रेरकतायामाह स्वभावस्त्विति तुपुनः स्वभावः प्रवर्त
ते ऽ स्वभावशब्देनानादिकालप्रवृत्ता प्रकृतिवासनोच्यते ऽनादिप्रकृतिसंस
र्गेनानादि शुभाशुभकर्मजन्यादिविजमनुजतिर्यगाद्याकृतिकतद्देवनमनु
ष्यत्वाद्यभिमानोऽहंवासनाप्रपञ्चमेवंभूतं कर्तृत्वं कारयितृत्वं च भवति न
तु शांतिविकस्वरूपप्रयुक्तं स्वरूपेणात्मत्वादिवद्धर्माधारतायामभूतं स्वाभावि
कं यत्कर्तृत्वादिकं तत् प्राकृतवासनाप्रयुक्तं न भवति किंत्वीश्वरप्रयुक्तं पर
तंत्रं स्वरूपवन्नित्यमेवेदं न तु नित्यमित्यर्थः १४॥

+देवदत्तस्य स्वर्गेनैव गतिर्ययास्थितोस

…ानभसितत्समलि
…नादिवद्धत्वा +
…नात्रोपवतिसंदेहा
…ह्याह +

मधुसूदनी टीका

त्वं न भवति एवमात्मनोपि कर्तृत्वं च
सुगतमेवसतत्संन्यासे सति न भवति ॥

लोकस्य देहादेः कर्तृत्वं प्रभुरात्मा स्वामी न सृजति त्वं कुर्विति नियोगेन तस्य
कारयिता न भवतीत्यर्थः नापि लोकस्य कर्माणीप्सिततमानि घटादीनि स्व
यं सृजति कर्तापि न भवतीत्यर्थः नापि लोकस्य कर्मकृतवतस्तत्फलसंबंधं

सृजति भोजयितापि भोक्तापि न भवतीत्यर्थः सत्यमानाः सत्तु भोलोकाव
नुसंधत्ते तिष्ठायतीवलेलायतीवसत्यौरित्यादिश्रुतेः अज्ञापि शरीरस्थोपि कौ
न्तेय न करोति न लिप्यत इत्युक्तेः यदि किंचिदपि स्वतो न कारयति न करोति चा
त्मा कस्तर्हि कारयन्कुर्वंश्च प्रवर्तत इति तत्राह स्वभावस्तु अज्ञानात्मिका दै
वी माया प्रकृतिः प्रवर्तते १४ ॥

सदानंदी टीका

यथाप्येषः स्वनिष्ठैव गतिः सर्वत्र स्थितो नत्मा तथात्मनोपि कर्तृत्वं संभा
व्यते नास्ति किं यद्वा न भसि वर्णादिवत्तात्स्यात्मनि वस्तुतः इति संदेह
विच्छित्यै भगवानाह नेति मे २ सृजत्यात्मा न कर्तृत्वं देहादेरित्यं च कुर्वति
नापि लोकस्य कर्माणि प्रासादादीनि यानि च ३ अतएव तेषु तत्फलानि स्व
यं सृजति कर्हिचित् न वा कृतवतः कर्म लोकस्य तत्फलेन च ४ संसं वे
यं सृजत्यात्मा भोक्ता भोजयिता न सः यथात्मा न स्वतः किंचित्कुरुते का
रयत्यजः ५ कस्तर्हि कारयन्कुर्वन्प्रवर्तत इहेति चेत् श्रृणु स्वभावशब्दे
न माया विद्यादिशब्दिता प्रकृतिर्यास्मिन्मे वेयं बहुविधप्रवर्तते ७ १४

नीलकंठी टीका

नन्वेवं सत्यवक्तृत्वे स्वामित्वकारयितृत्वं वा स्यमात्तु अत आह यस्कां न व
रविकारस्यैव सतः कर्त्रादिधर्मकाहंकारादिप्रवर्तकत्वमस्तित्याशंक्याह
न कर्तृत्वमिति कर्तृत्वमहंकारस्य कर्माणि इंद्रियाणां वचनादानादी
नि अश्वरथदर्शनादीनि च लोकस्य लोकानेन प्रकाश्यत इति लोको जडवर्गः
प्रभुश्चिदात्मा सूर्य इवास्मदादीनां प्रकाशकोपि न कर्मादौ प्रवर्तकस्तदहं
अस्य कर्मफलसंयोगं वा न सृजति किं तु यो यादृक्तस्य स्वभावः स तथा प्रव
र्तते यथा सूर्ये भुदिते कमलानां विकसनं कुमुदानां मकुलनं चेति तद्दे
वमात्मनि प्रकाशमाने चराचरयोन्नवेष्टते स्वभावादयस्तु चेष्टंते न त्वात्मा
कस्यचित्प्रवर्तको निवर्तको वा लोह्नायस्कांतयोरिव सत्त्वान्नात्मयोरात्मा
नात्मनोः संबंधाभावादिति भावः १४ ॥

आनंदी टीका

एवं तस्य जीवन्मुक्तस्य देहयात्रायां शरीरचेष्टा सा कथमित्याह प्रभुः सर्वतीनि
रभावात्स्वातंत्र्येण वैभवप्राप्तः स्वयं निष्क्रियो लोकस्य देहप्रपंचबुद्ध्यादेः कर्तृत्वं क्रि
यतामित्येवमायादिविधिकारं न सृजति नापि कर्माण्येवमायादीनि सृजति न च क

गी॰
टी॰ पं

मेणाथवा मायादेः फलेन रागद्वेषाद्गुणाद्वा नोपेतात्मना संयोगं सृजति तत्पुनः
स्वभावः बुद्ध्यादीनां स्वात्मीयो भावोऽथवा मायादिः प्रवर्तते यथाज्ञितसकलसाम
न्तस्पृक्कवर्ती स्वपुरे विश्रांतिसमये मात्यवर्गस्य प्रयोजनाभावात्किंचिन्नाज्ञापयति
तेतु स्वयमेव स्वाधिकारेषु प्रवर्तंते तद्वदयमर्थः तथा चोक्तं सम्यग्ज्ञानाधिगमाद्ध
र्मादीनामकारणप्राप्तौ तिष्ठति ॥ रामकंठी टीका ॥ संस्कारवशाच्चक्रभ्रमिवद्धृतः
शरीरः

अत एव परमात्मस्वरूपं स्मारयन्नाह ॥

70

यस्माद्धृदयचिन्मात्रस्वभावप्रतिष्ठितात्ममहेश्वरः परमात्मा वास्तवेन
रूपेणालोकस्य तन्मायामहिमोज्जृंभितपरस्परभेदस्य जीववर्गस्य न कर्तृत्वं
तास्ताः क्रियाः प्रतिनियतफलाः स्वतंत्रत्वं सृजति नापि पुण्यपापल
क्षणानि कर्माणि लोकस्य चित्तं सृजति न च स्वर्गाप्यात्मकैस्तत्फलैः संबं
धम् अतस्तत्स्वरूपसमापन्नः कर्मयोगी तादृश एव भवतीति पूर्वश्लोकेन
संगतिः नन्वेवं यथोक्तस्वरूपमात्रनिष्ठत्वादीश्वरो न करोति न कारयति
तत्कृतो जगद्व्यवहारः स्यादत आह स्वभावस्तु प्रवर्तते इति स्वभावः प्राक्प्रकृत्य
परपर्यायमायाशक्तिरेवाचिंत्यस्वरूपैश्वर्यते सा प्रवर्तते अनंतभावभेदो
द्भूतविचित्रजगदात्मनावभासनाय प्रसरति साहि वास्तवसर्वभावा
भेदख्यातिमात्रजीविता प्रकृतिपादितया नियत्या सर्वमिदमवभासयति
एवमवभासमानमप्येतत्तत्त्वज्ञानदृशा परामृश्यमानं यथोक्तपरमात्मस्व
रूपान्नव्यतिरिच्यते ततः परमेश्वरस्य प्रतिनियतकार्यकर्तृत्वादिर्न वास्तवोऽथ
र्मः [illegible] १४

अतः परमात्मस्वरूपं स्मरन्नाह ॥ [illegible] टीका
तद्विया

प्रभुः स्वामी परमात्मा लोकस्य जीवलोकस्य कर्तृत्वं न सृजति न च पुण्य
पापात्मकानि ईप्सिततमानि कर्माणि न च कर्मफलैः स्वाप्यात्मकैः
संबंधं वास्तवेन रूपेण सृजत्युत्पादयति अतस्तत्स्वरूपमापन्नः कर्मयो
गी तादृश एव भवति यदि किंचित्स्वतो न कारयति न करोति वा तर्हि कस्त
र्हि कारयन् कुर्वन् प्रवर्तते तत्राह स्वभावो जीवस्याविद्यैव प्रवर्तते अनाद्य
विद्याकामवशात्प्रवृत्तिस्वभावो जीवलोकः कर्तृत्वादिकं कर्मापादयतीत्य
र्थः १४ ॥

पंचोलीटीका

तर्हिपरमेश्वरस्यहेतुकर्तृत्वात्पापपुण्येसंबंधःस्यादित्याशंक्याह
नकर्तृत्वमिति प्रभुरीश्वरः आत्मालोकस्यकर्तृत्वंनसृजति नउत्पा
दयतिकर्माणिरथघटप्रासादादीनिलोकस्यईप्सितानिनोत्पादयति
कर्मकर्तुःफलसंयोगंनोत्पादयतितर्हिपुनः स्वभावः अविद्यामाया
कर्तृत्वादिरूपेणप्रवर्तते १४ ॥

रणवीरससिद्धोधिनी ॥

नकर्तृत्वमिति करोति तच्छीलस्तद्धर्मोवाकर्ता ताच्छील्येतितृन्
कर्माणिकायकंवाङ्मनोनिष्पाद्यानित्रिविधानिसामान्यानिकर्ता
नलोकेतिकर्मणिषष्ठीनिषेधः त्रिविधकर्माचरणशीलःस्वस्वव
र्णाश्रमोचितकर्मकरणोद्यतश्च तस्यभावःकर्माणिकर्तृत्वं लोक
स्यब्राह्मणादिवर्णचतुष्टयस्यप्रभुरीश्वरोनसृजतीतिन अपितुसृ
जत्येव परंतस्यलोकस्यस्वभावःस्वोभिप्रायोन्यथाप्रतिपत्त्यात्मकः
कर्मफलसंयोगंकर्मणांस्वोचितानांफलस्यराज्यस्वर्गापवर्गल
क्षणस्यसंयोगोयथास्यात्तथानप्रवर्तते प्रवर्तयते प्रवृत्तिजनको
नभवतीति अंतर्भावितणिजर्थोत्रवृत्तिः अयमभिप्रायः ईश्वरेणप्र
जाःसकर्माणएवसृष्टास्तत्रापियथायथमनुष्ठिष्टकर्माणएव
(ष्टास्तत्रापि) परंतासामदृष्टवशात्स्वकीयेनैवबुद्धिमालिन्येनान्य
थाप्रतिपत्तेर्निषिद्धएव तस्मिन्प्रवृत्तिः सत्फलावभासते विषव
वाम्रतमितिनेश्वरस्यवैषम्यमिति १४ ॥

मधभाष्य

नकर्तृत्वमिति प्रभुर्हि जीवोजडमपेक्ष्य ज्ञानमेवाज्ञान
नाशकमित्याह १४ ॥

भाषा अनुवाद

ईश्वर जिस को इस लोकसे श्रेष्ठ लोक कोलेजाने की इच्छा करते हैं उ
ससे सत्कर्म करावते और जिसे अधो लोक लेजाने की इच्छा करते उस
से कुकर्म करवावते हैं यह श्रुतिमे कहा है तो परमेश्वर की प्रेरणासे प
राधीन जो मनुष्य सो कैसेवे कर्मत्याग करने शकें एक दूसरे जो परमे
श्वरहीकी प्रेरणा से शुभ अशुभ कर्ममे लोग प्रवृत्त होते हैं तो ईश्व
र भी विषम दृष्टि औ निर्दय है फेरि कर्मोका करवावने वाला भी वह
है तो उसको भी उस पाप संबन्ध होय जो यह शङ्का करो तो इस
का सिद्धान्त यह दो श्लोकसे कहते हैं कि प्रभु जो ईश्वर सो मनु
ष्यों को कर्तृत्व अथवा कर्म सृजन नही किया किन्तु मनुष्यों को पू
र्व कर्म संस्कार रूप जो अज्ञान सोइ कर्तृत्वादि मे प्रवृत्त करै है इसी
से अपनी अनादि अविद्या से कामना वश हो प्रवृत्ति युक्त पुरुष को
ईश्वर भी कर्ममे नियुक्त करते हैं और ईश्वर कुछ आपसे उसको प्रवृत्ति
नही देते हैं सोइ कहा कि कर्तृत्व औ कर्म तथा फलयोग प्रभुने नही
किया लोग स्वभाव अर्थात् माया से प्रवृत्त है १४ ॥

दोहा

कर्तानादिन लोक को करैं न कर्म प्रभु सोय कर्त न कर्म सं
योग हिं सभी स्वभावक होय १४ ॥

72

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः १५ ॥

शांकरभाष्यं

परमार्थतस्तु नेति नादत्ते न च गृह्णाति भक्तस्यापि कस्यचित् पापं न चैवादत्ते सुकृतं विभुः भक्तैः प्रयुक्तं विभुः किमर्थं तर्हि भक्तैः पूजादिलक्षणं यागदानहोमादिकं च सुकृतं प्रयुज्यत इत्याह अज्ञानेनावृतं ज्ञानं विवेकविज्ञानं तेन मुह्यन्ति करोमि कारयामि भोक्ष्ये भोजयामीत्येवं मोहं गच्छन्त्यविवेकिनः संसारिणो जन्तवः १५ ॥

आनंदगिरिकृतटीका

कर्तृत्वभोक्तृत्वे प्रत्यगात्मनोऽविद्याकृते नोक्ते किमिदानीमीश्वरे संन्यस्तसमस्तव्यापारस्य तदेकशरणस्य दुरितं सुकृतं वा तदनुग्रहार्थं भगवानादत्ते मदेकशरणो मत्प्रीत्यर्थं कर्म कुर्वाणो दुष्कृतादपनोद्ये नानुग्राह्यो मयेति प्रत्ययभाक्त्वादित्याशंक्य सोपि परमार्थतो न स्पृशति विक्रियत्वादित्याह परमार्थतस्त्विति कथं तर्हि भक्तानामनुग्राह्यत्वमीश्वरस्यानुग्रहीतृत्वमिति प्रसिद्धिस्तत्राह अज्ञानेनेति पूर्वार्द्धगतान्यक्षराणि व्याख्याय आकांक्षापूर्वकमुत्तरार्द्धमवतार्य व्याचष्टे किमर्थमित्यादिना

स्वामिकृतटीका

यस्मादेवं तस्मात् नादत्त इति प्रयोजकोपि सन् प्रभुः कस्यचित्पापं सुकृतं चैव नादत्ते न भजते तत्र हेतुः विभुः परिपूर्ण आप्तकाम इत्यर्थः यदि हि स्वार्थकामनया कारयेत् तर्हि तथा स्यात् न त्वेतदस्ति आप्तकामस्यैवाचिंत्यनिजमायया तत्पूर्वकर्मानुसारेण प्रवर्तकत्वात् न च भक्ताननुगृह्णतोऽभक्तान्निगृह्णतश्च वैषम्योपलंभात् कथमाप्तकामत्वमित्यत आह अज्ञानेनेति अज्ञानेन निग्रहोपि दंडरूपोऽनुग्रह एवेत्येवमज्ञानेन सर्वत्र समः परमेश्वर इत्येवंभूतं ज्ञानमावृतं तेन हेतुना जंतवो जीवा मुह्यंति भगवति वैषम्यं मन्यंत इत्यर्थः १५ ॥

पिशाचभाष्यं

परमार्थतस्तु नादत्ते न गृह्णाति भक्तस्यापि कस्यचित्पापं नैवादत्ते सुकृतं

गी॰
टी॰
पं॰

भक्तैः प्रयुक्तं विभुः कथं तर्हि भक्तैः प्रक्षालनयागदानादि सुकृतं प्रयुज्य
नः स्वयमाह अज्ञानेनावृतं ज्ञानं तेन मुह्यंति करोमि कारयामि भोक्ष्ये भोज
यामि इत्येवं मोहं गच्छंति अविवेकिनः संसारिणो जंतवः १५ ॥

73

रामानुजभाष्यं

कस्यचित्संबंधितयाभिमतस्य पुत्रादेः पापं दुःखं न दत्ते नापनुदति क
स्यचित्प्रतिकूलतयाभिमतस्य सुकृतं सुखं नादत्ते नापनुदति यतोयं
विभुः न क्वचित्केनचिद्देवादिदेहेन स्थापारयादेः अत एव न कस्यचित्संबं
धीन कस्यचित्प्रतिकूलश्च सर्वमिदं वासनाकृतं एवं स्वभावस्य कथमि
यं विपरीतवासनोत्पद्यते अज्ञानेनावृतं ज्ञानं ज्ञानविरोधिना पूर्वकर्म
णा स्वफलानुभवायोग्यत्वापादनाय ज्ञानमावृतं संकुचितं तेन ज्ञानावरण
रूपेण कर्मणा देवादिदेहयोगः तन्नात्माभिमानरूपमोहश्च जायते तेन
च देहात्माभिमानवासना तदुचितकर्मवासना च वासनातो विपरीतात्मा
भिमानकर्मारंभश्चोपपद्यते १५ ॥

अभिनवगुप्तकृतटीका

नादत्ते कस्यचित्पापं नचैव सुकृतं विभुः अज्ञानेनावृतं ज्ञानं तेन मु
ह्यंति जंतवः पापादीनि तेन न कृतानि किंतु निजेनाज्ञानेन कृतानि
किंतु निजेनाज्ञानेन कृतानि शंकयेवास्ते विषम् १५

परमार्थप्रपा टीका

अत एवाह नादत्त इति विभुर्व्यापको गगनवत्सर्वत्र समः परमेश्वरः
कस्यचित्पापं सुकृतं वा नादत्ते न हरति परिपूर्णत्वात्सर्वस्य सकलकामत्वा
त् किंच अज्ञानेन ज्ञानमावृतं तेन हेतुना जंतवोऽज्ञाः जीवा मुह्यंति ततः
सदसद्वा कर्म कुर्वंतीत्यर्थः १५ ॥

वनमालीटीका

एवं प्रवृत्तस्य संन्यासिनः फलमाह नादत्त इति अयं पूर्णपरात्मतत्त्वज्ञानी
कस्यचिद्देहादेः पापं सुकृतं च नादत्ते न भुंक्ते कर्मादृष्टसुखदुःखादीनां ते
वं देहेंद्रियाणां करणादिकं बीजं प्रवहणायादृष्टं हि स्थानीयो भगवान्
विपाकात्तु जीव अभिमानिकः फलभोक्ता विद्यानिवृत्तावभिमाने च निवृत्ते

देहेंद्रियाद्यध्यात्मकर्मजन्यपापफलंदुःखंसुकृतफलंसुखंतेनादत्तेतेनेत्य
ध्यात्माभिमानकृतविकारस्यैवतस्यतत्रासंभवात् नहिकृतविकारेणायत्नातदुः
खादितादृपिविक्रियादिनात्यक्ताभिमानात्कृष्यादितोनष्टात्सम्यग्ज्ञा
कृतविकारस्यदुःखादिकंभवति ननुसर्वप्रेरकमनेनतद्गुणासर्वैश्वर्यसंपन्नतः
स्यस्वस्वरूपमिवसर्वेजीवाः कुतोनजानंतीत्यतआह अज्ञानेनेति अज्ञा
नेनयथार्थज्ञानविरोधिनाविद्याख्येनानादिनानित्यंजीवस्वरूपात्मकं
ज्ञानंभगवद्विषयकमावृतंतेनहेतुनाजंतवोमुह्यंतिसर्वैश्वर्यस्यसर्व
प्रेरकस्यानंदघनस्यस्वतोकर्तुः स्वरूपंवदेहेविनित्ययथार्थज्ञानाभावंप्राप्नु
वंतीत्यर्थः नित्यंभगवद्विषयकंस्वस्वरूपविषयकंचजीवेस्वरूपभूतंज्ञा
नमस्तिअविद्यातस्येश्वरविषयतायाःस्वविषयतायाश्च संबंधरूपार्थः
प्रतिबंधानेश्वरस्वस्वरूपयोर्यथार्थस्फूर्तिः श्रवणादिजन्यभगवद्विषय
कापरोक्षांतःकरणवृत्तिप्रागभावनाशएवजीवस्वरूपज्ञानज्ञानस्योत्क
तेयेनसहसंबंधः नित्यस्यापिज्ञानविशेषाद्देहेप्रसादस्यजीवेसनाश
एवसंबंधः तथाचयथाश्रवणमननिदिध्यासनजन्यापरोक्षरूपाभग
वत्कृतविशेषविषयिकांतः करणवृत्तिस्तयाभगवत्प्रसादस्यजीवेसंबंध
स्तथैवाविद्याशेषत्वंप्रसानेदाविर्भावश्च स्वयोग्यपाशेषभगवत्कृतविशेषा
परोक्षवद्धरेर्महाप्रसादस्तेनाशेषाविर्हृतिः पूर्णास्वानंदाविर्भावश्च मायि
नोहृतिश्चिद्रूपगगार्थैर्लियते सर्वगतनित्यापरिच्छिन्नोपिघटादिनाहृतिर्हार्क
एवसंबंधोजायतेनस्वतः तार्किकमतेसर्वगतस्यापिगोत्वादेःसास्नादिमत्से
वसंबोधकेसत्वादिमत्तियथातथानित्यस्यजीवस्वरूपज्ञानस्यश्रवणादिज
न्यहृष्यपरोक्षरूपायाश्चांतःकरणवृत्तेः प्रागभावस्यनाशेसत्येवतेयेपरेश्रु
जीवेचसंबंधोजायते एवंनित्यस्यापिज्ञानादिविशेषस्यहरिप्रसादस्योत्क
हृतिप्रागभावनाशेसत्येवजीवेसंबंधोजायतेइतिभावः २५ ॥

कृष्णवैजयन्ती टीका

एवंप्रकृतिसंसारहितःस्वस्वरूपगणावस्थितोयाजीवात्मासकस्यापिलोक
स्यकर्तृत्वादिकंनसृजतिकिंतुप्राकृतवासनैवप्रवर्ततेइत्यकेदानीकस्यचि

दपि पापपुण्ये [illegible]
तीत्याह नादत्त इति विभुः स्वरूपेणाणुपरिमाणकत्वेपि धर्मभूतज्ञानस्य वि
भुत्वाद्विभुः तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति न्यायात् अयं जीवात्मा कस्य
चिद्देहेन्द्रियादेः पापं दुष्कृतं च पुनः सुकृतं पुण्यं नादत्ते न गृह्णाति परमेश्वरप्रे
रिता देहादय एव पापं पुण्यं च कुर्वन्ति अहं तु न करोमीत्येवं मत्वा ते पापपुण्ये
न गृह्णातीत्यर्थः यद्वा विभुः कस्यचित् आत्मीयत्वेन स्नेहातिरेकतयाभिमत
स्य पुत्रदारादेः पापं दुःखं वा नादत्ते नापनुदति न दूरीकरोतीत्यर्थः कस्यचिद्विद्वे
ष्यत्वेनाभिमतस्यामित्रादेः सुकृतं सर्वं चैव नापनुदति न कस्याप्ययं पुत्रमित्रा
द्यमित्रादिसंबंधवानित्यर्थः नन्वेवं चेदात्मनस्तस्य मोहः कथं स्यादिति चेत
त्राह अज्ञानेनेति अज्ञानेनाविद्याख्येनानादिशुभाशुभरूपकर्मणा ज्ञाना
नन्दात्मकस्यात्मनो ज्ञानं स्वाभाविकं धर्मभूतमावृतमाच्छादितं भवति तेन
ज्ञानावरणहेतुभूतेन कर्मणा जन्तवः प्राकृतदेहात्माभिमानवन्तो महं
ति देवोहं मनुष्योहमित्याद्याकारकं मोहं प्राप्नुवन्ति तत्र तत्स्वरूपाद्याकारदेहा
भिमानजनिता वासनोत्पद्यते ततः कर्मारंभस्ततः पुनस्तद्देहयोगस्ततस्त
द्देहाभिमानस्ततः पुनर्वासना पुनस्तथैवेत्येवं स्वपरस्वरूपाज्ञानकृतविपरी
तवासनयैवास्मिन्संसारे जन्ममरणलक्षणे भ्रमतीति भावः १५ ॥

मधुसूदनी टीका

नन्वीश्वरः कारयिता जीवः कर्ता तथा च श्रुतिः एष ह्येव साधु कर्म कारयति
तं यमुन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इत्यादिः
स्मृतिश्च अज्ञो जन्तुरनीशोयमात्मनः सुखदुःखयोः ईश्वरप्रेरितो गच्छेत्स्व
र्गं वा श्वभ्रमेव वेति तथा च जीवेश्वरयोः कर्तृत्वकारयितृत्वाभ्यां भोक्तृत्वभोज
कयितृत्वाभ्यां च पापपुण्यलेपसंभवात् कथमुक्तं स्वभावस्तु प्रवर्तत इति तत्रा
ह परमार्थतः । विभुः परमेश्वरः कस्यचिज्जीवस्य पापं सुकृतं चैव नैवादत्ते पर
मार्थतो जीवस्य कर्तृत्वाभावात् परमेश्वरस्य च कारयितृत्वाभावात् कथं त
र्हि श्रुतिः स्मृतिः लोकव्यवहारश्च तत्राह अज्ञानेनावरणविक्षेपशक्ति
मता मायाख्येनानृतेन तमसावृतमाच्छादितं ज्ञानं जीवेश्वरजगद्भेदभ्रा

मायाधिष्ठानभूते नित्ये स्वप्रकाशे सच्चिदानंदरूपे महति तीये परमार्थसत्ये तेन स्व
रूपावरणेनाच्छादिते प्रमातृप्रमेयप्रमाणकर्तृकर्मकरणभोक्तृभोग्यभोगा
त्मना विषमसंसाररूपं मोहमनंतं स्मिंस्तद्वभासरूपं गच्छति जंतवो जनना
शीला संसारिणो वस्तुस्वरूपादर्शिनः अकर्तृभोक्तृपरमानंदाद्वितीयात्मस्व
रूपादर्शननिबंधनो यं जीवेश्वरजगद्भेदभ्रमः प्रतीयमानो वर्तते मूढानां
तस्यां बालावस्थायां मूढप्रत्ययानुवादित्वाद्वेदे श्रुतिस्मृती वास्तवाद्वैतबोधि
वाक्यविशेषभूते इति न दोषः १४ [illegible]
[illegible] ॥

सदानंदीटीका

ननु श्रुतौ स्मृतौ कर्ता प्रसिद्धो जीवपदवाच्य ईशः कारयिता सिद्धस्तद्धि कथमि
होच्यते १ मायाविद्याभिधा शक्तिः स्वभावाख्या प्रवर्तते यमिच्छति स उन्नेतुं
शापं तं कारयत्यजः २ यमिच्छति अधो नेतुं पापं तं कारयत्यसौ अज्ञो जंतु
रनीशोयमात्मनः सुखदुःखयोः ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ३
ति श्रुतिस्मृतिभ्यां च निर्णीतेनाथ नायतः ४ कर्तृत्वप्रेरकत्वाभ्यामात्म
नोनीशजीवयोः भोक्तृत्वभोजयितृत्वधर्माभ्यां लेपसंभवात् ५ मैवं वस्तु
तस्त्वात्मायं विभुत्वात्परमेश्वरः जीवस्यैकस्य विज्ञाप्यं नादेन्न स्वकृतं तथा
वस्तुतो नास्ति कर्तृत्वं जीवस्यासंगिनो विभोः कारयितृत्वमप्येवं नेश्वर
स्यास्ति वस्तुतः ७ अज्ञानेनान्यतेनैव दुर्घटविधानपटुशालिना मायाख्येना
ध्वनमसाक्षारितं चेतनात्मकं ८ जीवेश्वरजगद्भेदभ्रमाधिष्ठानमद्वये
स्वप्रकाशे परानंदे ज्ञानेनैव हृतेन वः ९ स्वरूपावरणेनैव विक्षेपं याति
सर्वधाः मातृमानप्रमेयादिमोहहेतुः विकल्पकं १० प्राप्नुवंति मयाजी
वा भ्रांतिज्ञानवशीकृताः अकर्तृभोक्तृपरमानंदात्माद्वितीयवकः जीवे
श्वरजगद्भेदभ्रमो मूढदृष्टिगोचरो भवेत् तस्मादवस्थायां मूढानामवभासानुवा
दिनी १२ वास्तवाद्वैतबोध्याय श्रुतिस्तदनुगा स्मृतिः अतश्चाविद्यकैर्ध
र्मैः कर्तृत्वादिभिरीश्वरः १३ जीवो वा लिप्यते नैव ग्राह्यो वेदस्याशयः ई
श्वराश्रयमाश्रित्य ब्रह्मात्मैक्यं विचार्यतां १४ अकर्त्रात्मस्वरूपं स्वनिश्चित्यं
तिविवाकिनः १५ १५ ॥

नीलकंठीटीका

गी॰
टी॰
पं

75

ननु एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष एवासा
धु कर्म कारयति तं यमधो निनीषत इति श्रुत्या परमेश्वरे कारयितृत्वं श्रूयते
ततः कथमुच्यते स्वभावस्तु प्रवर्तत इति तत्राह नादत्त इति कस्यचित्कर्तुः पापं
पुण्यं नादत्ते नापि सुकृतं कारयितृत्वाभावात् यतो विभुर्व्यापकः निष्क्रिय इ
ति यावत् सक्रियो हि जीवं प्रवर्तयति तदीयं पापं पुण्यं वा लभते अयं तु न त
था किंतु सूर्यवत्प्रकाशनपर्यवसन्नस्वप्रकाश्यानां कर्त्रादीनां कर्मगुणमेवा
प्यते इति भावः कारयितृत्वमप्यस्य सन्निधिमात्रेण सूर्यवत् यथा स्वतः प्रका
शते सविता प्रकाशयतीति नोदाहृतश्रुतिविरोधः कथं तर्हि ईश्वराराध
नार्थं कर्माणि कुर्वंति तदकरणाच्च बिभ्यतीत्याशंक्याह अज्ञानेनेति म
हाराजस्य सार्वभौमस्याहं सर्वेश्वरो निर्हृतोऽस्मीति ज्ञाने अज्ञानेन सोऽभिमे
नाहं तं चेत्तत्र विविधानि परवत्कारीनि महांति संकटभाराणि पश्यति अ
हो अहं दीनोऽस्मि दरिद्रः स्वोऽस्मीति च मन्यते तद्वदेतेन जनवः स्वस्याहं ब्रह्मास्मी
ति प्रमाणेन ब्रह्मभावमजानंत ईश्वरादात्मानं पृथक् मन्यमाना ईशात्म
नोः सेव्यसेवकभावं च पश्यंतो मुह्यंति तथा च श्रुतिः अथ योऽन्यां देवता
मुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानामिति एषा से वे
ति श्रुतिरविश्रांतजनव्यवहारविषयैवेति भावः १५ ॥

आनन्दीटीका

पुनरेव सामान्यात्मा हृदये सन्निवेशयितुमाह अज्ञानेनेति मिथ्याज्ञानेन ना
विद्यापर्यायेण तमसा नात्मत्वं देहादिष्वात्मबुद्ध्या परमात्मज्ञानमावृतं ते
न अज्ञानिनो जनवः बालवत् अन्यायेन बन्धनमनुभवन्तीत्यर्थः १५ ॥

तस्मान्मायाकृत एव बंधमोक्षविभ्रमोऽयम् ^ रामकंठीटीका मितिपादयितुमाह ॥
विभुर्यथा प्रतिपादितस्वरूप ईश्वरो न कस्यचिज्जन्तोः परमार्थतः पापं
पकरणाभूते कल्मषमादत्ते परिहरति येन सो जन्तुरुत्तरपरहस्ताकारमव
गलत्ताक्षेयः प्राप्नोति न च मोक्षकारणं सुकृतं कस्यचिददत्ते येना ८
तरेतर्वैत्याह अज्ञानेन पारमार्थिकपरमात्माभेदप्रथनमात्रस्वरूपेण

ज्ञानाभावेन मिथ्याज्ञानेन सन्तमसेनैव परार्थस्वरूपज्ञानं यथा प्रतिपा
दितत्वप्रथनात्मको बोध आहृतम् संप्रतितिरस्कृते तेन हेतुना सर्वप्रा
णिनो मुह्यंति शरीराद्यात्मप्रतिपत्तिग्रहणलक्षणा विपर्ययज्ञानमय
हष्टयो वन्ध्यमनुभवन्ति १५ ॥

लाभिकी नमयस्री टीका

किंच

विभुः परमात्मा कस्यचिज्जीवस्य परमार्थतः पापं पुण्यं वा नादत्ते निर्वासन
त्वात् अतस्तत्तत्स्वरूपमापन्नस्य योगिनो न पुण्यपापसंबन्धः ननु जीवस्ये
वचेदयं कर्तृत्वादिसंबन्धः तर्हि किं कारणाकस्तत्राह अज्ञानेनावर
णात्मकेन स्वरूपापह्नवेन ज्ञानं स्वस्वभावप्रत्यभिज्ञालक्षणं आह
तमाच्छादितं विस्मृतिपथमुपनीतमिति यावत् तेन कारणेन जंतवो
जीवा अविद्याभासा मुह्यंति देहाभिमानपूर्वकं कर्तृत्वादिकं स्वात्मन्यारोपयंती
त्यर्थः १५ [illegible] १५ ॥

पंचोलीटीका

परमार्थतो वस्तुतस्तत्त्वमाह नादत्त इति विभुरीश्वरः अविद्याका
मवशगलोके कर्मसु नियुंक्ते पुनः कस्यचित् भक्तस्य पापेन गृह्णाति किं
तु तस्य तद्विधानानामसंकीर्तनात् पापं भस्मसाद्भवति च पुनः भक्तप्र
युक्तं सुकृतं नादत्ते ईश्वरायनिवेदितेनैव अनंतं भवति अज्ञानेन अवि
वेकवृत्त्याहृतं तेन प्राणिनः मोहं गच्छंति आत्मनि कर्तृत्वं भोक्तृत्वमीश्व
रे पापपुण्ययोरादानं मन्यंते १५ ॥

रसावीरसमिद्धोयिनी ॥

अतश्च नादत्त इति विभुरीश्वरः कस्यचिद्गुर्वादिवधजनकसमरक
र्माचरतः पापं नादत्ते नांगीकरोति अनेन पापमनुष्ठितमिति मन्यते
स्वयमेव तदनुशासनात् नापि निषिद्धमहिंसाप्रायं भिक्षाचर्यादिकं
वर्णांतरोचितं कर्मानुतिष्ठतः सुकृतमादत्ते अयं पुण्यपापाचार इति ना
मन्यते स्वयमेव तन्निषेधनात् कथं तर्हि पुण्यपापावभासः इत्याह

76

अज्ञानेनेति अज्ञानेन गुरुमुखशास्त्रवाक्यादौ संदेहेन ज्ञानं निश्चयात्मक
मावृतं तेनजंतवोमुह्यादिकाविरणोभ्रश्यंतिमोहं बुद्धिभ्रमं यांति अय
मत्राभिप्रायः विहितनिषिद्धयोः कर्मणोर्विषयेउण्यपापेईश्वरे
णाकृते किंतुस्वीयेनैवानिश्चयेन शंकयेवास्मनेविषयमितिअनि
श्चितोभूत्वाकर्मकुर्विति १५॥

अथभाष्य

१५॥

भाषा अनुवाद

जिस हेतु भगवान न कछु करते और न किसी से कछु करवावते हैं वे तो विश्वकरके व्यापक तथा पूर्ण काम हैं इस से भक्त अभक्त किसीके पुण्यवा पाप के भागी नहीं हैं परन्तु परमेश्वरकी अचिंत्य जो माया सोई पूर्व कर्म के अनुसार ऊंचनीच कर्म मे लोगों को प्रवृत्ति देती औ अज्ञान से ज्ञान आवृत्त है तिस से सब मोहित होते हैं जो कहो कि पूर्ण काम को फेरि भक्तों पर अनुग्रह औ अभक्तों का निग्रह । क्यों करना है तो कहते हैं कि परमेश्वर का निग्रह रूप दण्ड अनुग्रह है अर्थात् दण्ड होनेसे पापी का पाप दूर हो जायगा ऐसे दण्डरूप अनुग्रह का न जानना जो अज्ञान सोई परमेश्वर विषयक ज्ञानको आवृत करता है तो फेरि जीव मोहित होय अपने अज्ञान से परमेश्वर मे विषम दृष्टि करते है १५

दोहा

लेत न किसीके पापकों प्रभु पुण्य न हि लेत आवृत हि ज्ञान अज्ञानसें वध्यो जीव तिह हेत १५॥

77

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः तेषा
मादित्यवज्ज्ञानं प्रकाशयति तत्परं १६

शांकरभाष्य

ज्ञानेनेति ज्ञानेन तु येन अज्ञानेनावृता मुह्यन्ति जन्तवः तदज्ञा
नं येषां जन्तूनां विवेकज्ञानेनात्मविषयेण नाशितमात्मनो भवति
तेषां जन्तूनामादित्यवत् यथादित्यः समस्तं रूपजातं अवभासयति त
द्वत् ज्ञानं ज्ञेयं च वस्तु सर्वं प्रकाशयति तत्परमार्थतत्त्वं १६ ॥

आनंदगिरिटीका

तर्हि सर्वेषामनाद्यज्ञानहतत्वात् ज्ञानवत्वात् मोक्षाभावाज्जन्तवः संसारम्
निहतिरिति तत्राह ज्ञानेनेति सर्वमिति पूर्णत्वमुच्यते ज्ञेयस्यैव वस्तु
नस्तत्परमिति विशेषणं तच्चावष्टे परमार्थतत्त्वमिति १६ ॥

स्वामिकृतटीका

ज्ञानेन स्वभक्तस्य तीत्याह ज्ञानेनेति आत्मनो भगवतो ज्ञानेन येषां
तद्देहस्यापलंभकमज्ञानं नाशितं तज्ज्ञानं [illegible] तेषामज्ञानं नाशयि
त्वा तत्त्वं परमेश्वरस्वरूपं प्रकाशयति यथा आदित्यस्तमो निरस्य
समस्तं वस्तु ज्ञानं प्रकाशयति तद्वत् १६ ॥

पिशाचभाष्य

ज्ञानेन तु येनाज्ञानेनावृता मुह्यन्ति जन्तवस्तदज्ञानं येषां जन्तूनां विवेकज्ञानेना
त्मविषयेण नाशितमात्मनो भवति तेषां जन्तूनामादित्यवत् यथादित्यः सम
स्तरूपादिज्ञानमवभासयति तद्वज्ज्ञानं ज्ञेयवस्तु सर्वं प्रकाशयति तत्परं १६ ॥

रामानुजभाष्य

सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरु
ते न हि ज्ञानेन सदृशं पवित्रमिति पूर्वोक्तं स्वकालेन गमेति ज्ञानेनेति
पर्ववर्तमानेषु सर्वात्मसु येषामात्मनामज्ञानं तद्गतानात्मयाथात्म्योपदेशाज्जनि
तेनात्मविषयेणाहरहरभ्यासातिशयेन निरतिशयपवित्रेण ज्ञानेन तज्ज्ञानावर
णमनादिकालप्रवृत्तानंतकर्मसंचयरूपं ज्ञानेन नाशितं तेषां तत्स्वाभाविकं
परं ज्ञानमपरिमितमसंकुचितमादित्यवत् सर्वं यथावस्थितं प्रकाशयति ते

५४

षामादित्यवत् ज्ञानमिति विनष्टाज्ञानानां बहुत्वाभिधानादात्मस्वरूपव
द्धत्वेऽप्यस्य पक्षमावगतमवस्थान्तरमुक्तं नवैदेवद्बद्धत्वमुपाधिकृते वि
नष्टाज्ञानानामुपाधिगंधभावात् तेषामादित्यवज्ज्ञानमिति व्यतिरेकनि
देशात् ज्ञानस्य स्वरूपानुबंधिधर्मत्वमुक्तं आदित्यदृष्टान्तेन च ज्ञातृज्ञानयोः
प्रभाप्रभावतोरिवावस्थानं च तत एव च संसारदशायां ज्ञानस्य कर्मणा सं
कोचः मोक्षदशायां विकाशश्चोपपद्यते १६ ॥

अभिनवगुप्तकृतटीका

अत एव ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः तेषामादित्यवज्ज्ञानं प्रका
शयति तत्परं ज्ञानेन तज्ज्ञाने नाशिते ज्ञानस्य स्वप्रकाशत्वे स्वतः सिद्धे यथा
दित्यस्य तमस्यपनष्टे विनिवर्तितायां हि शंकायां अमृतममलकार्यं स्वयमे
व करोति १६ ॥

परमार्थप्रपाटीका

ज्ञानेन तु नमहंतीत्याह ज्ञानेनेति तत्पूर्वमुक्तं ज्ञानानुक्रमं ज्ञानेन येषामा
त्मनः स्वस्य ज्ञानेन नाशितं तेजस्मानमावरणं तेषां ज्ञानं तत्परमे
श्वरं प्रकाशयति किंवत् आदित्यवत् यथादित्यस्य तेजः सकलं तमसि
रस्कृत्यादित्यं प्रकाशयति न तु तत् यद्वादित्यदृष्टान्तेन तदुक्तं भवति यथा
र्थकारएवमेव तमवलेव्याम्रयमेवकारयेतिनादित्यकृतं दिवसस्यादित्व
मंस्येति तदुक्तं चनकन्तुदृष्टिमनेकन्तुमर्षपध्यानिः प्रभंमन्यतेवातिमूढ़
इति इदमेवाज्ञानस्यावरणं प्रोक्तं रूपहरणमेवमात्मविषयकमज्ञानमा
त्मानमेवावृणोति परं त्वनुभूयमानचित्तं वित्स्वरूपत्वेनोच्छादयति ।
अन्येयमेवज्ञानो याथार्थ्यार्थः अतिरपि वा जगमनेयमेंहितास्य इशावा
स्यमिदं सर्वं यत्किंचन जगत्यां जगत् तेन त्यक्तेन भुंजीथा मा गृधः कस्य
स्विद्धनमिति भाष्ये जगत्यां पृथिव्यां इदं किंचन तत्व न्यायेन माने यत् कि
त्वर्थंवता परमेश्वरेण अकलवत्सर्वमाद्यतेन स्वरूपेण अकारने आच्छादनीयं तिरस्कार्यं
श्च विरतिरस्करणसामर्थ्यमीशोति पदेन सूचितं यथा दीपेन तमसि तिरस्क्रिय
ते नन्तनमसारीयरूपार्थः तत्तत्तेन जगदाभासेन त्यक्तेन ईश्वरेणापालेन
ता अवशिष्टं कस्यापत्यलक्षणाः सात्वं भुंजीथाः वित्तपात्रपतनविषयमहंमा

ताम्

गत्यः शुफल्ग्रभिक्रांतायामभिक्रांतयेत्यर्थः १६ ॥

वनमाली टीका

नन्वीश्वरज्ञानस्याज्ञानावृतत्वे योगादिकं साधनं व्यर्थं तत्राह ज्ञानेनेति
ज्ञानेन श्रवणमननिदिध्यासनात्मकेन श्रीहरिगुरुभक्तिसहितेन श्रीहर्यंवा
तरप्रसादसहकृतेन च यत्साधनेन तज्जन्येन स्वयोग्यभगवद्गुणाशेषविष
यकेणापरोक्षरूपेणात्मनो जीवस्वरूपस्याच्छादकमज्ञानं येषां नाशि
तं तेषां स्वरूपभूतं ज्ञानमनावृतं सत्परं ब्रह्म तत्प्रकाशयति विषयीक
रोति यथादित्यो लोकं प्रकाशयति तद्वत् तथा च प्रथमं श्रवणादिजन्य
परोक्षज्ञप्तिस्ततः करुणादृष्टिरूपं भगवदपरोक्षं ततो महाप्रसादस्ततो
जीवं प्रतीश्वरजीवा[illegible]ज्ञानेनाच्छादिकाविद्यानिवृत्तिस्तत आदित्यप्रकाश
वज्जीवेश्वरस्याज्ञानेशादिविषयः प्रकाश इति भावः तेषामित्यनेन जीवानां मो
ते बहुत्वं सिद्धं १६ ॥

ॐ समवैजयंती टीका

यथा ज्ञानिनो जंतवो मुह्यंति तथा ज्ञानिनस्तु न मुह्यंतीत्याह ज्ञानेनेति
ज्ञानेन सर्वं ज्ञानस्वत्वे नैव व्रजिनं संतरिष्यसि नहि ज्ञानेन सदृशं पवित्र
मिह विद्यते ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तेन तयेत्यक्रमहिमास
संप्रदायोद्भवाचार्यलब्धेनात्मविषयकेन दृढाभ्यासातिशयेन निरति
शयपवित्रेणायेषामाचार्यदेवानां लब्धात्मयाथात्म्यज्ञानानां गुरुभक्ति
प्र[illegible]तिबलेन निर्जितात्मेय ज्ञानैवनिकावरणरूपारीणां वश्यरूपषेव
निरस्तनिखिलानेन समदमादिसाधनानामात्मनो मनसो[illegible]रनादिका
लप्रवृत्तानंतशुभाशुभकर्मसंचयरूपं ज्ञानावरणरूपं तदज्ञानं नाशितं
नष्टं भवति तेषां मुमुक्षूणां भगवत्प्रिमाणामात्मप्रवणशीलानां हरि
गुरुप्रपन्नानां तत्स्वयमेभूतं स्वाभाविकमनाद्यविद्यासंकुचितमपरि
मितं परमत्कृष्टं ज्ञानं आदित्यवत्सूर्यवत्प्रकाशयति यथा सहस्रा
र्कः स्वकरनिकरेण तिमिरनिकरं निरस्य यथावस्थितं सर्ववस्तु प्रकाश
यति तथात्मज्ञानमपि याथात्म्येनात्मवस्त्वित्यर्थः तेषामिति बहुवचने
नलब्धात्मज्ञानानां विनष्टाज्ञानतिमिराणां बहूनामभिधानान्निरूपाधि

गी॰
टी॰ पं॰

79

कत्वेनात्मस्वरूपस्य वह्नित्वं दर्शितं आदित्यवदिति दृष्टांतेन प्रभाप्रभावतो
रिवज्ञानज्ञानवतोरवस्थानेव दर्शितं बद्धावस्थायां कर्मणा ज्ञानस्य सं
कोचो मोक्षावस्थायां तस्य विकाशश्चोपपद्यत इत्यर्थः केचित्तु सदेव सो
म्येदमग्र आसीदेकमेवाद्वितीयं आत्मा वा इदमेक एवाग्र आसीत् एको ह
वै नारायण आसीदित्यादिश्रुतिभ्यः स्वरूपत एकमेव ब्रह्माभेदाश्रयभूतं
अनाद्युपाधिना च भेदस्तत्त्वमस्यादिवाक्यजन्यज्ञानान्निवृत्तिरिति वदंति
तत्तुच्छं विकल्पासहत्वात् तथा हि न तावदुपाधिनाच्छिन्नो ब्रह्मैकदेशो जी
वात्मा ब्रह्मणोऽच्छेद्यत्वात् जीवस्य सादित्वापत्तेश्च नाप्यच्छिन्न एवाणुरूपो
पाधिसंयुक्तो ब्रह्मप्रदेशविशेषो जीवः ब्रह्मैकप्रदेशे उपाधिसंबंधे तथा पत्या
सर्वे दोषास्तस्य स्युः उपाधौ गच्छति सति उपाधिना ब्रह्मप्रदेशाकर्षणा
नर्हत्वेनानुगमाद्युपहितब्रह्मप्रदेशभेदेन क्षणे क्षणे बंधमोक्षौ च भवेता
म् आकर्षणापत्त्यभ्युपगमे वाच्छिन्नत्वात् कृत्स्नस्य ब्रह्मण आकर्षणा
त्वात् तदसंभवाभ्युपगमेऽप्युक्तदोषस्य तादवस्थ्यं अच्छिन्नब्रह्मप्रदेशे
षु सर्वोपाधिसंसर्गात् सर्वजीवानां ब्रह्मण एव प्रदेशत्वेनैकत्वप्रतिसन्
धानं स्यात् प्रदेशभेदादप्रतिसंधाने चैकस्यापि सोपाधौ गच्छति सा
ति संधानेन स्यात् नाप्युपाधिसंयुक्तं ब्रह्मस्वरूपमेव जीवः ब्रह्मस्वरूप
स्यैवोपाधिसंबंधेन जीवत्वापत्तेः तदतिरिक्तानुपहितब्रह्मासिद्धेः न चो
पाधिसंयुक्तं चेतनांतरमेव जीव इति चेतनांतरानभ्युपगमात् अभ्यु
पगमे च भेदस्यौपाधिकत्वसिद्धान्तभङ्गात् परपक्षपातित्वापत्तेश्च ना
प्युपाधिरेव जीवः बाह्यमतप्रवेशप्रसंगात् तस्माद्देहेंद्रियाद्यचेतनव
र्गेभ्यो विलक्षणो ज्ञानस्वरूपोऽणुपरिमाणको ज्ञानादिधर्माश्रयः स
त्वापरिच्छेदशून्यः स्वरूपतो ब्रह्मणः सकाशाद्भिन्नोऽपि ब्रह्मात्मकत्वात्
ब्रह्मणश्चैकस्थितिप्रवृत्तिकत्वात्परतंत्रसत्ताकत्वाच्चेत्यादिभ्यो हेतुभ्यो ब्र
ह्माभिन्न इति ब्रह्माभिन्नाभिन्न एव जीव इति भगवत्सिद्धांतः ॥ १९ ॥

नर्हि सर्वेषामनाद्यज्ञानावृतत्वात् मधुसूदनी टीका कथं संसारनिवृत्तिः स्यादत आह ॥
तदावरणविक्षेपशक्तिमदनाद्यनिर्वाच्यमनंतमनर्थव्रातमूलमा
त्मानमात्माश्रयविषयमविद्यामायाशब्दादिवाच्यं आत्मनो ज्ञानेनानुरूप

नुनरहतानंदबोधे

दिष्टवेदांतमहावाक्यजन्येन श्रवणमननिदिध्यासनपरिपाकनिर्मलां
तःकरणवृत्तिरूपेण निर्विकल्पकसाक्षात्कारेणाध्यासितत्वंपदार्थाभेद
रूपशुद्धसच्चिदानंदाद्वैतैकरसवस्तुमात्रविषयेण नाशिते वाधिते कालत्र
येप्यसदेवासन्नया ज्ञानमधिष्ठानचैतन्यमात्रतां प्रापिते शुक्त्यादिविषयज्ञाने
शुक्तिज्ञानेन येषां श्रवणमननादिसाधनसंपन्नानां भगवदनुगृहीतानां
मुमुक्षूणां तेषां तज्ज्ञानं कर्तृ आदित्यवद्युगपदेव स्वोदयमात्रेणैव तमो
निरवशेषं निवर्तयति न तत्किंचित्सहायमपेक्षते तथा ब्रह्मज्ञानमपि शु
द्धसत्त्वपरिणामत्वाद्व्यापकप्रकाशरूपं स्वोत्पत्तिमात्रेणैव सहकार्यंतरनि
रपेक्षं तथास कार्यं ज्ञाने निवर्तयति तत्परं सत्यज्ञानानंतानंदरूपमेवा
द्वितीयं परमात्मतत्त्वं प्रकाशयतीति प्रतिज्ञायाश्च हणमात्रेणैव कर्तृतामते
णाभिव्यनक्ति । अहो ज्ञानेनावृतं ज्ञानेन नाशितमित्यज्ञानस्यावरणत्वज्ञान
नाश्यत्वाभ्यां ज्ञानाभावरूपत्वेनावर्णिते न त्वभावः किं विरोधितेति न वाच्यं
नाभावो ज्ञानेन नाश्यते स्वाभावनाशरूपत्वात् स्यात्तस्मादहमज्ञो मम त्वं च न
जानामीत्यादिसाक्षिप्रत्यक्षसिद्धं भावरूपमेवाज्ञानमिति भगवतो मते वि
स्तरस्त्वद्वैतसिद्धौ द्रष्टव्यः येषामिति वहुवचनेनानियमो दर्शितः तथा च श्रुतिः
तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथा ऋषीणां तथा मनुष्याणां तद्धि
दमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्यादि यद्विषयं यदाश्रय
मज्ञानं तद्विषयतदाश्रयप्रमाणज्ञानात्तन्निवृत्तिरिति न्यायप्राप्तमनियमं दर्शय
ति तत्राज्ञानगतमावरणं द्विविधं एकं सतोप्यसत्त्वापादकं अन्यत्तु भातो
प्यभानापादकं तत्राद्यं परोक्षापरोक्षसाधारणप्रमाणज्ञानमात्रान्निवर्तते
अनुमितेर्वह्न्यादौ पर्वते वह्निर्नास्तीति भ्रमादर्शनात् तथा सत्यं ज्ञानमनंतं
ब्रह्मास्तीति वाक्यात्परोक्षनिश्चयेपि ब्रह्म नास्तीति भ्रमोत्तेतपव अस्त्येव ब्रह्म
किं तु मम न भातीत्येवं भ्रमजनकं द्वितीयमभानावरणं साक्षात्कारादेव
निवर्तते स च साक्षात्कारो वेदांतवाक्येनैव जन्यते निर्विकल्पकश्चायं द्वैतसि
द्धावनुसंधेयः १९ [illegible] ॥

सदानंदी टीका

नन्वेवं सर्वजीवानामर्थज्ञानायविद्यया आहतवाक्यं कथं वा तन्मुक्तिसा

दितिचेच्छृणु १ तदावरणविक्षेपशक्तिमद्द्वैतकारणं अविद्याख्यमनिर्वा
च्यमज्ञानेनाज्ञानमात्मनः २ गुरूपदिष्टवेदान्तवाक्यजन्येन भास्वता अखंडस
च्चिदानंदवस्त्वैकविषयेणाव ३ बाधितेऽमदधिष्ठानचिन्मात्रत्वेन बोधिते र
ज्ज्वामहिस्यमारीवरज्जुज्ञानेन बाधितं ४ येषां यथोक्तवेदांतश्रवणादिमतां
मतां केशवानुगृहीतानां मम लक्षणां विपश्चितां ५ तज्ज्ञानं सूर्यवत्तेषां पर
मद्वैतं चिद्रूपं प्रकाशयति चात्मानं प्रतिबिंबग्रहणावे ६ कर्मतामंतरेण
भिव्यनक्तीत्याशयो हृदेः ज्ञानं नाश्यतया ज्ञानेन तथैवावरकत्वतः ७ ।
भावरूपमनिर्वाच्यमस्तीति भगवन्मते न त्वभावः क्वचित्किंचिदाहृणोती
तिमे भवेत् ८ नित्यमेव निहतत्वाज्ज्ञानेनापि न नाश्यते येऽज्ञानाभाव
मज्ञानं तार्किकाः प्राकूरागृहात् ९ भगवन्मतबाह्यत्वाद्येष्वास्ते विना
ग्रहैः अतोऽज्ञोऽहं न मामन्यं जानामीति प्रतीतितः १० साक्षिप्रत्यक्षसिद्धं
तच्चावरूपं हरेर्मतं ११ त्रिगुणमनृतं सांख्यैः कल्पितं विद्धि तेऽकृतिशिवं
विचारोद्भूतबोधेन नष्टं निरवधिविष्णुरात्मा स्वात्मभासा च कोऽस्ति भ्रमजल
धरनाशे ब्रह्मसूर्यो द्वितीयः १२ १६ ॥

नीलकंठीटीका

ततः आत्मन आवरकमज्ञानं येषां ज्ञानेन ब्रह्मास्मीति प्रमाणजेन नाशि
तं तेषां तज्ज्ञानं कर्तृ आदित्यवत् आदित्यो यथा कृत्स्नं रूपं प्रकाशयति
तद्वत् परं परमार्थवस्तु प्रकाशयति अज्ञानमनर्थनिहत्यर्थं ज्ञानमेष्टव्य
मिति भावः १६ ॥

आनन्दीटीका

तदज्ञानमविद्यात्मकं तमः येषां ज्ञानेनात्मानात्मविचारेणात्मनो ना
शितं तेषां तत्परमार्थज्ञानमादित्य इव तत्स्वसिद्धं नित्यं च परं ब्रह्मभू
तं ब्रह्म प्रकाशयति १६ ॥

रामकंठीटीका

येषां पुनस्तु यथा प्रतिपादितमज्ञानं यथोक्तेनात्मनो ज्ञेयस्य तत्त्वस्य ज्ञा
नेन नाशितमपध्वंसितं तेषां परमेश्वरानुग्रहाय यथोक्तकर्मयोगसमा

सानुष्ठानाधिकृतानां योगिनां तज्ज्ञानं परं ब्रह्म कृष्णस्वरूपं परमात्मस्वरूप
तत्त्वस्य संवस्तु प्रकाशयति प्रथयति कथमादित्यवत् यथादित्यो भगवान्स
मयात्प्रभुदितः सन् दुर्निवारमपि सान्द्रमन्धकारं प्रभामात्रेण पर्यवस्यन्
दृश्यं वस्तु सर्वं निःसंशयं तथा प्रकटीकरोति तथैव ज्ञानमेतदीश्वरानुग्रहे
स्वरूपं निःशेषितं सत्तत्स्वरूपं तिरोधानकारणमज्ञानं तिरस्करोतीत्युपमा
नार्थः [illegible]
[illegible] १६ ॥

व्यतिरेके परमार्थलाभं इत्याह ॥

[illegible] टीका

तद्व्यतिरेके आत्मनो ज्ञानेन प्रत्यभिज्ञालक्षणेन येषां तदज्ञानं स्वरूपाप
ह्नवरूपं नाशितमपध्वंसितम् तेषामुपायांतरानपेक्षकं स्वप्रकाशं ज्ञान
मखण्डलक्षणं वस्तु प्रकाशयत्यात्मत्वेन प्रथयति ज्ञानस्य स्वप्रकाशत्वात्
दृष्टांतः आदित्यवदिति यथा निःसंशयम् आदित्यः प्रभामात्रेणान्धकारं
पर्यवस्यन् दृश्यं वस्तु प्रकटीकरोति तद्वत् [illegible]
[illegible] १६ ॥

पंचोलीटीका

ज्ञानेन तु तदज्ञानमिति ज्ञानेनेति तु पुनः येषां तदज्ञानं तु मोहकरं आत्मज्ञानं
आत्मनो ज्ञानेन गुरुप्रसादादात्मप्रसादाद्वा ज्ञानेन नाशितं तेषां ज्ञानमा
दित्यवत् तत्परं ब्रह्म प्रकाशयति १६ ॥

रणवीरसमिद्धोधिनी ॥

ज्ञानेनेति येषां वीरणामात्मनः स्वोचितकर्मविषयस्य यत्तस्य ज्ञाने
न स्वकृतफलजनकतायां दृढनिश्चयेन तत् अनिष्टफलजनकम
ज्ञानं संदेहरूपं भ्रांतिरूपं वा नाशितं स्यात् तेषां तज्ज्ञानं परं परमफ
लं तदवश्यानुष्ठेयं कर्म प्रकाशयति सूर्य इव भगवान् प्रकटीकरो
ति १६ ॥

मथभाष्य

ज्ञानेनेति प्रथमज्ञानं परोक्षं अपरोक्षज्ञानाव्यवहितसाधनमाह ॥ १८ ॥

8)

भाषा अनुवाद

और ज्ञान से जिन का अज्ञान नाश हो गया है ऐसे ज्ञानी पुरुषों
को पर जो भगवत स्वरूप सो प्रकाशमान है जैसे सूर्य के प्रकाश से
अन्धाकार हर हो वस्तु सब प्रकाशित होती हैं लोग केवल अपने
मोह से ईश्वर मे मोह कल्पना करते है १८

दोहा

ज्ञानहिसें जिनको भयो मनसें नाश अज्ञान होत विकासित
ज्ञानहि तिनको पुन ज्यों भान १८॥

82

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छन्त्य
पुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः १७ ॥

शांकरभाष्यं

यत्परं ज्ञानं प्रकाशितं तद्बुद्धय इति तस्मिन्गता बुद्धिर्येषां ते तद्बुद्धयः तदात्मा
नस्तदेव परं ब्रह्म आत्मा येषां ते तदात्मानः तन्निष्ठा इति तन्निष्ठा निष्ठा अभि
निवेशस्तात्पर्यं सर्वाणि कर्माणि संन्यस्य ब्रह्मण्येवावस्थानं येषां ते तन्निष्ठास्त
त्परायणाश्च तदेव परमयनं परा गतिर्येषां भवति ते तत्परायणाः केवलात्म
रतय इत्यर्थः ते गच्छन्त्येवंविधा अपुनरावृत्तिं अपुनर्देहसंबन्धं न इत्युक्तेति
ज्ञाननिर्धूतकल्मषाः यथोक्तेन ज्ञानेन निर्धूतो निर्गतो नाशितः कल्मषः पा
पादिसंसारकारणदोषो येषां ते ज्ञाननिर्धूतकल्मषाः यतय इत्यर्थः १७

आनंदगिरिकृतटीका

विशेषणविशिष्टस्यान्तरङ्गाणि विद्यापरिपाकसाधनानि इत्यपदिदिव
क्षन्नश्लोकस्यार्थं लिखितं दर्शयति यत्परमिति तस्मिन्परमार्थतत्त्वे परस्मिन्ब्र
ह्मणि वाक्यविषयमपोह्य गता समस्ता श्रवणमनननिदिध्यासनैरसकृदव
र्त्तितैर्बुद्धिः साक्षात्कारलक्षणा येषां ते तथेति प्रमेयविशेषणं विभजते त
स्मिन्निति तर्हि बोद्धा जीवो बोद्धव्यं ब्रह्मेति जीवब्रह्मभेदाभ्युपगमो नेत्याह
तदात्मान इति कल्पितेन बोद्धृबोद्धव्यत्वेन वस्तुतस्तत्र भेदोऽस्तीत्यंगीकृत्य व्याचष्टे
तदेवेति तत्र देहादावात्माभिमानमपनीय ब्रह्मण्येवाहमस्मीत्यवस्थाने त
त्र अनुष्ठीयमानकर्मप्रतिबंधान्न सिध्यतीत्याशंक्य विशेषणान्तरमा
दत्ते तन्निष्ठा इति तत्र निष्ठाशब्दार्थं दर्शयन् विवक्षितमर्थमाह निष्ठेत्यादिना
तथापि पुरुषार्थोपेक्षाप्रतिबंधात् कथं यथोक्ते ब्रह्मण्येवावस्थाने सेद्धुपा
रयति तत्राह तत्परायणाश्चेति यथोक्तानामधिकारिणां परमपुरुषार्थो
स्यात्मब्रह्मानतिरेकान्यत्रासक्तिरिति तात्पर्यार्थमाह केवलेति तत्र यथो
क्तविशेषणवतां वर्तमानदेहपातेऽपि देहान्तरपरिग्रहप्राप्ततया कुतो यथो
क्ते ब्रह्मण्यवस्थानमित्याशंक्यानन्तरमाह ते गच्छन्तीति सति संसारका
रणे दुरितादौ संसारस्यमरस्य दुर्वारत्वात्कथमपुनरावृत्तिसिद्धिरित्याशंक्याह
ज्ञानेति उक्तविशेषणानां सम्यग्ज्ञानदर्शितफलप्राप्तिर्न मात्रमाणतरेषु संभावि

गी॰
टी॰ पं॰

83

तमिति मत्वात्मनो विशिनष्टि यतय इति १७ ॥

स्वामिकृतटीका

एवंभूतेश्वरोपासकानां फलमाह तद्बुद्धय इति तस्मिन्नेव बुद्धिर्निश्चयात्मिका येषां तस्मिन्नेवात्मा मनो येषां तस्मिन्नेव निष्ठा तात्पर्यं येषां तदेव परमयनमाश्रयो येषां ते तदनुग्रहात्तत्प्रसादलब्धेनात्मज्ञानेन निर्धूतं निरस्तं कल्मषं येषां ते अपुनरावृत्तिं मुक्तिं यान्ति १७ ॥

पिशाचभाष्यं

आत्मतत्त्वं यत्त्वं ज्ञानं प्रकाशितं तद्बुद्धय इति तस्मिन्गता बुद्धिर्येषां ते तद्बुद्धयः तदेव परं ब्रह्मात्मा येषां ते तदात्मानः तन्निष्ठास्तस्मिन्निष्ठाभिनिवेशस्तात्पर्यं सर्वाणि कर्माणि संन्यस्य ब्रह्मण्येवावस्थानं येषां ते तन्निष्ठास्तत्परायणाश्च तदेव परमयनं परा गतिर्येषां भवति ते तत्परायणाः केवलात्मरता इत्यर्थः ते गच्छन्ति एवंविधाः अपुनरावृत्तिं पुनर्देहसंबंधं ज्ञाननिर्धूतकल्मषा यथोक्तज्ञानेन निर्धूतो नाशितः कल्मषः पापादिसंसारकारणदोषो येषां ते ज्ञाननिर्धूतकल्मषाः यतय इत्यर्थः १७ ॥

रामानुजभाष्यं

तद्बुद्धय इति तद्बुद्धयस्तथाविधात्मदर्शनव्यवसायाः तदात्मानस्तद्विषयमनसः तन्निष्ठास्तदभ्यासनिरताः तत्परायणास्तदेव परमयनं येषां ते एवमभ्यस्यमानेन ज्ञानेन निर्धूतकल्मषास्तथाविधमात्मानमपुनरावृत्तिं गच्छन्ति यदवस्थात्मनः पुनरावृत्तिर्न विद्यते स आत्मा अपुनरावृत्तिस्तेन स्वरूपेणावस्थितः तमात्मानं गच्छन्तीत्यर्थः १७ ॥

अभिनवगुप्तकृतटीका

तद्गतत्वं तद्बुद्धिमनस्त्वं सांख्यज्ञानव्यापाराणां घटत इत्याशयं प्रकटयितुमाह तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः स्वरंतोपि मद्रूपेण न तत्स्पर्शं तोपि स्वकर्माणि सक्ता अपि न सज्जंति पंके रविकरा इव १७ ॥

परमार्थप्रपाटीका

अथेश्वरोपासनया मोक्षाधिकारिणां निष्ठामाह तद्बुद्धय इति तस्मिन्नीश्वरे निश्चयात्मिका बुद्धिर्येषां ते तथा तद्विषये आत्मा प्रपन्नो येषां ते तदा

ष्ठा तस्मिन्नेव निष्ठा पर्यवसानं येषां ते तथा तदेव परायणमाश्रयो येषां ते
तथाविधाज्ञाननिर्धूतकल्मषाः संतः अपुनरावृत्तिं गच्छंति अपुनरावृत्तिं गच्छं-
ति १७

वनमाली टीका

भगवद्रूपे ब्रह्मज्ञानोत्पन्नावस्थावहितं साधनमाह तदिति तस्मिन् सदानंदगु-
णालये सकलतत्वदर्शिं दर्विंतनेनाखिलपुरुषार्थदे सर्वेश्वरे परमकारुणि-
के पुनः पुनर्धारावाहिकावेदांतजन्याबुद्धिर्येषां ते सएवात्मा परप्रेमास्पदो ये-
षां ते तस्मिन्नात्मा भगवान् अस्माकं स्वामी इष्टदेव इति मनो येषामिति वा तस्मि-
न्निष्ठा कायिकवाचिकमानसव्यापारपर्यवसानं येषां ते मद्दापयर्पितता-
चलत्वमित्यर्थः क्रियामात्रस्य तत्प्रीत्यर्थमेवानुष्ठानमिति भावः तत्पराय-
णाः सएव परमयनं प्राप्योस्माकमिति धीमंतः तादृशात्मापतेर्जातं तथभ-
गवद्रूपालंब्रज्ञानेन निर्धूतमनाद्यविद्यारूपं कल्मषं येषां ते पुनरावृत्तिमाविर्भू-
तस्वानंदादिरूपत्वगुणकाः संतः प्रार्णिदर्शनिर्मलत्वादिना भगवत्साम्यरू-
पां मुक्तिं प्राप्नुवंतीत्यर्थः गच्छंत्यनेनजीवानां स्वक्षेत्रमुपुरुपत्वेन चसिद्धं नहि
विभोर्गमनं संभवति मध्यमपरिमाणत्वे वानित्यत्वं स्यादित्यणुत्वमेव सिद्धय-
ति एषोणुरात्मा चेतसा वेदितव्य इत्यादिश्रुतेः सोस्माच्छरीराडूत्क्रम्यामुं लो-
कमभिगच्छति अमुष्मादिमं लोकमागच्छतीति गमनश्रुतेः नच बुद्धिगतं
गमनादिकमात्मन्युपचर्यत इति वाच्यं प्रद्योतनैष आत्मा निःक्रामतीति
तिः क्रमणास्यात्मनिष्ठत्वोक्तेः नच ध्यानसमसमाहितस्मृतत्वर्जयात्येवमेवं-
पे शरीरे ब्रात्मप्राज्ञेनात्मनान्वारूढ उत्सर्जयातीति श्रुतेः स्वाभाविकग-
त्याश्रयस्यकटहश्रांतोक्तेश्च नचाणोर्देहस्यैकदेशस्थितस्य युगपत्सर्वांगे
दुःखाद्यनुभवानुभवानुपपत्तिः गुणिनोणुत्वेपि दीपप्रभावद्वगुणेन व्या-
साभोगोपपत्तेः नच गुणिनं विहाय गुणस्यावस्थितिर्निष्फलेति वाच्यं धर्मि-
णां विना जातिसमवायादेरनुगुणादिरेकैकैकव्यक्तिरितिमीमांसकमते त्रा-
कृणापादेरवस्थानात् नच जात्यादिवज्ज्ञानस्यापि व्यापकत्वं स्यात्तु स्यादेव हि
यदिमानं स्यात् देहपवनमत्र्योपलब्धातावद्व्यापी कल्पते नच प्रभाद्रव्या-
नरं दीपेनेहत्त्वगावत्प्रत्यावस्थानापत्तेः शक्यविहायगं पस्य गमनाच्च
नचशच्छपरमाणावो गच्छंतीति वाच्यम् शब्दकसतपर्यादेः नापत्तेः नचशु

गी॰
टी॰ पं॰

न देहोत्पत्तिः पुनरुत्पत्तेरप्रामाणिकत्वात् स्वर्गं पश्यद्व्यपश्योत्पत्त्या ....गांध
ज्ञामप्रत्ययानुत्पत्तेः देहैकदेशपतितचंदनविन्दुनाकृतस्तदेहैशैस्सवदह
णोरपिकृतस्तदेहेभोगोपपत्तेः अलातचक्रवदुपपत्तेश्च ॥ १६ ॥

श्रीधरस्वामिकृता टीका

ननु येषां ज्ञानेनाज्ञानं नाशितं तेषां ज्ञानं प्रकाशयति ते कीदृशाः किंफलं च
प्राप्नुवंतीत्यपेक्षायामाह तद्बुद्धय इति तद्बुद्धयस्तस्मिन्नात्मदर्शने बुद्धयो व्यव
सायात्मिका येषां ते तथा आत्मपापात्मदर्शननिश्चयाः अत एव तदात्मानः
तस्मिन्नात्मदर्शनविषये आत्मा मनो येषां ते तथा आत्मदर्शनैकविषयमान
साः तन्निष्ठाः तस्मिन्नेव निष्ठाभ्यासो येषां ते तथा तद्दर्शनाभ्यासकुशलाः त
त्परायणास्तदेव परमयनं शरणं येषां ते तथा स्वस्वरूपदर्शनेनान्याभ्यासाकृ
तविषयदर्शनं .... नाङ्गीकृतमित्यर्थः ज्ञाननिर्धूतकल्मषाः ज्ञानेन स्वस्वरूपा
ज्ञानेनाभ्यासयुक्तेन निर्धूतानि दूरीकृतानि कल्मषाणि पापानि येषां ते तथाविध
प्रायेते अपुनरावृत्तिं पदवस्थांप्राप्यपुनरावृत्तिर्नैस्यात्तदपुनरावृत्तिः तेपुनरावृ
त्तिसंबंधरहितं शुद्धमात्मस्वरूपं गच्छंति प्राप्नुवंति ॥ १७ ॥

ज्ञानेन परमात्मतत्त्वप्रकाशे सति ॥ मधुसूदनी टीका

तस्मिन् ज्ञानप्रकाशिते परमात्मतत्त्वे सम्यग्दर्शनेदचनमेववा एवसर्वविषय
परित्यागेन श्रवणमननादिपरिपाकात्पर्यवसिता बुद्धिरंतःकरणवृत्तिः साक्षात्
कारलक्षणा येषां ते तद्बुद्धयः सर्वदा निर्वीजसमाधिभाज इत्यर्थः तत्र किं
बोद्धा बोद्धव्यं चाबोद्धव्यं तत्त्वमिति बोद्धृबोद्धव्यलक्षणो भेदोस्ति नेत्याह त
दात्मानः तदेव परं ब्रह्मात्मा येषां ते तथा बोद्धृबोद्धव्यभावो हि मायाविजृंभि
तो न वास्तवो भेदविरोधीति भावः ननु तदात्मान इति विशेषणानर्थक्यं अवि
दुषामपि केषांचिद्विदुषां अज्ञानामपि हि वस्तुगत्या तदात्मान इति कथं
न स्यादिति चेन्न इत्यात्मत्वमहतोतात्पर्यात् अज्ञाएवनात्मभूते देहादा
वात्माभिमानिन इति तदात्मान इति व्यपदिश्यंते विज्ञास्तु निवृत्तदेहाद्य
भिमाना इति विरोधिनिवृत्त्या तदात्मान इति व्यपदिश्यंत इति युक्तं विशेषणं
ननु कर्मानुष्ठानविक्षेपे सति कथं देहाद्यभिमाननिवृत्तिरिति तत्राह तन्नि
ष्ठाः तस्मिन्नेव ब्रह्मणि सर्वकर्मानुष्ठानविक्षेपविहीना स्थितिर्येषां ते तन्नि
ष्ठाः सर्वकर्मसंन्यासेन तदेकविचारपरा इत्यर्थः फलरागे सति कथं तत्सं

84

ति॰४

ती॰४

यनभूतकर्मत्यागा इति तत्राह तत्परायणाः तदेव परमयनं प्राप्तव्यं येषां
ते तत्परायणाः सर्वतो विरक्ता इत्यर्थः अतएव तद्बुद्धय इत्यनेन साक्षात्कार उक्तः
तदात्मान इत्यनेनात्माभिमानरूपविपरीतभावनानिवृत्तिफलको निदि
ध्यासनपरिपाकः तन्निष्ठा इत्यनेन सर्वकर्मसंन्यासपूर्वकः प्रमाणप्रमे
यगतासंभावनानिवृत्तिफलको वेदान्तविचारः श्रवणमननपरिपाकरूपः
तत्परायणा इत्यनेन वैराग्यप्रकर्ष इत्युत्तरोत्तरस्य पूर्वपूर्वहेतुत्वं द्रष्टव्यं एता
दृशविशेषणा यतयो गच्छन्त्यपुनरावृत्तिं पुनर्देहसंबंधाभावरूपां मुक्तिमा
प्नुवंति सकृत्ज्ञानामपि पुनर्देहसंबंधः कुतो न स्यादिति तत्राह ज्ञान
निर्धूतकल्मषाः ज्ञानेन निर्धूतं समूलमुन्मूलितं पुनर्देहसंबंधकारणं
कल्मषं पुण्यपापात्मकं कर्म येषां ते तथा ज्ञानेनाज्ञाननिवृत्तौ तत्
कार्यकर्मनाशेन तन्मूलकं पुनर्देहग्रहणं कथं भवेदिति भावः १७

[illegible]

[illegible] ॥ सदानंदी टीका

ज्ञानप्रकाशिते तस्मिंस्तत्त्वे सच्चित्सुखात्मनि बाह्यवस्तुपरित्यागाद्बुद्धिर्ये
षां सुनिश्चिता १ तदेवात्मा परं तत्त्वं येषामद्वैतचेतसां तस्मिन्नेव चिदानंदे
स्थितिर्येषां स्थिरा सदा २ प्राप्तव्यं तत्परं येषां विरक्तानां परस्परं साक्षात्
कारे निदिध्याने श्रवणादिनिरंतरे ३ वैराग्यादिप्रकर्षस्य पूर्वपूर्वस्य कार्य
ता उत्तरोत्तरहेतुत्वं विशेषणचतुष्टये ४ एतैर्विशेषणोपेता मोक्षं गच्छ
न्त्यनामयं ज्ञानेनोन्मूलितं येषां कल्मषं बंधकारणं ५ सकार्याज्ञानबाधे
न ब्रह्मात्मैकधियां सतां कथं तन्मूलको बंधो भवेद्देहपरिग्रहः ६ १७

नीलकंठी टीका

तद्बुद्धय इति यत्परं ब्रह्म प्रशान्तं तत्रैव बुद्धिः अस्ति ब्रह्मेति निश्चयो येषां माप
रोक्षतः श्रुत्यर्थविदस्ते तद्बुद्धयः तदेव आत्मा प्रत्यक्तत्त्वं येषां श्रवणमननात्म
कविचारेण प्रमाणप्रमेयगतासंभावनाविनीता ते तदात्मानः तत्रैव नि
ष्ठा विजातीयवृत्त्यन्तरितसजातीयवृत्तिप्रवाहो येषां ते ह्यात्मनिष्ठा आत्म
धीरूपविपरीतभावनारहिता इति ते तन्निष्ठाः तदेव परं अयनं अज्ञानरूपापाधि
निरासेन प्राप्यं येषां आविर्भूतानंदप्रकाशानां ते तत्परायणाः अपुनरावृत्तिं मोक्षं

च्छंति यतः ज्ञानेन निर्धूतं कल्मषं मलाज्ञानं संसारबीजभूतं येषां ते ज्ञान
निर्धूतकल्मषाः ७ ॥

आनन्दीटीका

तस्यात्मज्ञानस्याभ्यासार्थमाह तस्मिन्ब्रह्मणि बुद्धिः इदमेव परप्र
काशकं परमोपेयं इत्यध्यवसायो येषां तस्मिन्नेव निष्ठा निर्वाहो येषां
ततः परं संन्यासोपेयस्याभावात् तदेव परमयनं गतिर्येषां ते
ज्ञाननिर्धूतकल्मषा अपुनरावृत्तिं गच्छन्ति ७ ॥

यात्मनो व्यापकत्वमायवाति कादर्शानतयः पपप्याकर्मणामप्रभा
गेननयार्थं ननकर्मफलोपभोगसमर्थानि नानाविधानि शरीराणि
गृह्णन्ति:

रामकंठीटीका

बुद्धिर्नानाभूतबोध्यवस्तुसाधनभूते कारणं ग्रायास्मात्तया समस्तःक
रणावर्ग उपलक्षितो बोद्धव्यः आत्मशब्देन च बोद्धा पुरुष उच्यते इति ।
तत्र यथोक्ते ज्ञाने पर्यवसिता बुद्धिर्येषां ते तद्बुद्धयः तथा तत्रैव ज्ञाने
आत्मा येषां ते तदात्मानो यथोक्तज्ञाननिष्ठा हेमती तय इति सकलली
कव्यवहारनिबन्धनं ब्रह्मात्मलक्षणं हृदयमहं तत्ज्ञानमयं येषां ते तथा
विधाः तथा निष्ठाशब्देन परमोपेयवस्तु मीमांस्यते परायणशब्देन च
तत्प्राप्त्युपायो विवक्षितो येन तत्परायणं इति तज्ज्ञाने यथोक्ते निष्ठा ये
षां ते तन्निष्ठाः तदेव परायणं येषां ते तत्परायणाः इत्युपेयोपायलक्ष
णं हृदयं योगिव्यवहारविषयं यथोक्तज्ञानात्मकमेव पक्षांतरे एवंविधा
स्तत्वज्ञाननिबन्धनसकलसंसारापवर्गविषयपदार्थसार्थाः अत एवैवं
विधेन ज्ञानेन निर्धौतं निःशेषतः प्रक्षालितमज्ञानरूपं कल्मषं पापं येषां
ते तथाविधा योगिनो पुनरावृत्तिं गच्छंति तद्भूयः संभवमोक्षमामुव
न्तीत्यर्थः

७ ॥

तदेवं स्तनपरमात्माभ्यासफलमा ह —

न्यासिकी वसशर्मीटीका

तद्बुद्धयस्तमात्मानमेव समये तस्मिन्परमात्मन्येव बुद्धिरन्तःकरणवृत्ति

रूपा बोधशक्तिर्येषां ते तत्समाधौ तदात्मानः स एव सत्य आत्मा स्वभावो
येषां ते तथा तन्निष्ठाः समाध्युपरमसमये तस्मिन्नेव निष्ठा परमानन्दसमका
रसंस्काररूपा निश्चयो येषां ते तथा तत्परायणाः व्युत्थानकाले परामर्शा
त्यागेनात्मनिरतास्तत्र विहिताः एवमभ्यासक्रमेण व्युत्थानेऽपि समाधेः
वैपः संपत्स्यति तदुक्तं समाधिसंस्कारवति व्युत्थाने भूयो भूयः विवेका
मर्शान्नित्योदितसमाधिलाभः इति ततईश्वरप्रसादलब्धेनाद्वैतज्ञानेन
निर्धूतं ध्वस्तं कल्मषं पुण्यपापरूपं कर्म येषां ते एवंविधा योगिनोऽपुनरावृ
त्तिं मुक्तिं प्राप्नुवंति तथा च श्रुतिः एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्ति
षु स्थानत्रयातीतस्य पुनर्जन्म न विद्यते इति ॥१७॥

पंचोलीटीका

परमार्थज्ञाननिष्ठानां फलमाह तद्बुद्धय इति तद्बुद्धयस्तस्मिन्नप
रे ब्रह्मणि बुद्धिर्येषां ते तद्बुद्धयः तदात्मानः तदेव परं ब्रह्म आत्मा येषां
तन्निष्ठाना तत्पर्यन्त स्मिन्नेव ब्रह्मणि सर्वकर्माणि संन्यस्यावस्थाने
येषां ते तत्परायणाः तदेव परं ब्रह्म अयने परागतिर्येषां ते तत्परायणाः
णाः केवलात्मरता ज्ञाननिर्धूतकल्मषाः यथोक्तेन ज्ञानेन निर्धूतो
नाशितः पापादिसंसारकारणं दोषो येषां ते अपुनरावृत्तिं गच्छंति

रणवीरसमिद्बोधिनी ॥

तद्बुद्धय इति तत्रैव प्रारभ्यमाणे कर्मणि बुद्धिर्निश्चयात्मिका आत्मा
अन्तःकरणधर्मकं मनश्च निष्ठा ज्ञानेंद्रियव्यापारश्च तत्परत्वं कर्मे
न्द्रियव्यापारश्च येषामस्ति ते ज्ञानेन निश्चयेन निर्धूतं कल्मषमावृ
रणाकारणभूतः संशयो येषां ते तादृशा वीरा अपुनरावृत्तिमस्त्रादी
नामपुनर्व्यापारणं गच्छंति सकृदेवास्त्राणि प्रयुज्य साध्यं साधयंती
ति भावः अथ चापुनरावृत्तिं पुनर्जन्माभावलक्षणां मोक्षं प्राप्नुवंतीति
साफल्यमस्य कथितं ॥१७॥

८

मथभाष्य

तद्दृदयइति परमेश्वरस्वरूपाणांसर्वत्रसाम्यदर्शनांवापरोक्ष
ज्ञानसाधनमित्याशयवानाह १० ॥

86

भाषा अनुवाद

ऐसे जो परमेश्वर तिन के उपासकों को प्राप्त जो फल होता है सो कहते हैं कि भगवत की भक्ति से अवश्य ही संसार सागर को उतर जायं गे ऐसी जिन के निश्चयरूप बुद्धि है और तैसे ही भगवद्भक्ति मे सम्पन्न औ तत्पर है और परमेश्वर ही जिन के परम अवलंब हैं सो ई जन ईश्वर के प्रसाद से निःपाप होय मुक्तिपद पाय आवागमन से रहित होते हैं सोई कहा कि ईश्वर मे बुद्धि औ ईश्वर मे आत्मा औ ईश्वर मे निष्ठा तथा ईश्वर मे परायण पुरुष ज्ञान से निर्धूत कल्मष अपुनरागमन पद मोक्ष प्राप्त होते है १७॥

दोहा

तामे बुद्धि मन ताहि मे औ नेष्ठ परायण ताहि प्राप्त हि होत सो मुक्ति को पाप नाश ज्ञान सें जाहि १७॥

87

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव
श्वपाके च पंडिताः समदर्शिनः १८

शांकरभाष्यं

येषां ज्ञानेन नाशितमात्मनो ऽज्ञानं ते पंडिताः कथं तत्त्वं पश्यंतीत्युच्य
ते विद्येति विद्याविनयसंपन्ने विद्या च विनयश्च विद्याविनयौ विद्यात्मनो बोधो
विनयश्च उपशमः ताभ्यां विद्याविनयाभ्यां संपन्नो विद्याविनयसंपन्नो विद्वान्
विनीतश्च यो ब्राह्मणस्तस्मिन् ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पं
डिताः समदर्शिनो विद्याविनयसंपन्ने उत्तमसंस्कारवति ब्राह्मणे सात्विके मध्य
मायां च राजस्यां गवि संस्कारहीनायामत्यन्तमेव केवलतामसे हस्त्यादौ च स
त्वादिगुणैस्तज्जैश्च संस्कारैस्तथा राजसैस्तथा तामसैश्च संस्कारैरत्यंतमेवा-
स्पृष्टं सममेकमविक्रियं ब्रह्म द्रष्टुं शीलं येषां ते पंडिताः समदर्शिनः १८ ॥

आनंदगिरिकृतटीका

यदुक्तं ज्ञानाहतिसाधनं तत्त्वज्ञानं तदेव प्रश्नद्वारेण विवृणोति येषामित्यादिना
विद्या वेदार्थविज्ञानमित्यंगीकृत्य विनयं व्याचष्टे विनय इति उपशमो निरहंका
रत्वमनौद्धत्यं परार्थमेवमन्वाख्याकार्यं दर्शयति विद्वानिति गवीत्याद्यनूद्य वा
क्यार्थं कथयति विद्येति हस्त्यादौ पंडिताः समदर्शिन इत्युत्तरत्र संबंधः तत्र तत्र
प्राणिभेदेषु तत्तद्गुणोत्थनिमित्तसंस्कारैश्च सत्स्पृष्टत्वमसंभवान्न ब्रह्मणः
समत्वमित्याशंक्याह सत्वादीति तज्जैश्चेत्यत्र तच्छब्देन सत्वमेव गृह्यते सा
त्विकसंस्कारैरिव राजसैः संस्कारैरपि सर्वथैवासंस्पृष्टं ब्रह्मेत्याह तथेति राजसैरिव
तामसैरपि संस्कारैर्ब्रह्मात्यंतमेवास्पृष्टमित्याह तथा तामसैरिति ब्रह्मणो-
ऽद्वितीयत्वं कूटस्थत्वमसंगत्वं चाकोऽर्थे हेतुरिति सत्वासमग्राह्यार्थमाह सम-
मिति समदर्शित्वमेव पांडित्यं तद्यावद्द्रष्टुं ब्रह्मेति १८ ॥

स्वामिकृतटीका

कीदृशास्ते तत्त्वज्ञानिनो ये पुनरावृत्तिं गच्छंतीत्यपेक्षायामाह विद्याविन
य इति विषमेष्वपि समं ब्रह्मैव द्रष्टुं शीलं येषां ते पंडिताः ज्ञानिन इत्यर्थः तत्र
विद्याविनयाभ्यां युक्ते ब्राह्मणे श्वा शुनो यः पचति तस्मिं श्वपाके चेति कर्मणा वैषम्यं ग
वि हस्तिनि शुनि चेति जातितो वैषम्यं दर्शितम् १८ ॥

पैशाचभाष्यं

गीं टीं ५

88

येषां ज्ञानेन नाशितमात्मनो ज्ञानं ते पंडिताः कथं ते तत्त्वं पश्यंतीत्युच्यते वि
द्याविनयसंपन्ने उत्तमसंस्कारवति ब्राह्मणे सात्विके मध्यमायां राजस्यां गवि संस्
कारहीनायामत्यंतमेव केवलतामसे हस्त्यादौ सत्त्वादिगुणैस्तज्जैश्च संस्कारैस्त
था राजसैस्तथा तामसैश्च संस्कारैरत्यंतमेवास्पृष्टं सममेवाविक्रियं
ब्रह्म द्रष्टुं शीलं येषां ते पंडिताः समदर्शिनः १८ ॥

रामानुजभाष्यं

विद्याविनयसंपन्न इति विद्याविनयसंपन्नब्राह्मणगोहस्तिश्वश्वपाकादिष्व
त्यंतविषमाकारतया प्रतीयमानेषु पंडिता आत्मयाथात्म्यविदो ज्ञानैकाकार
तया सर्वत्र समदर्शिनः विषमाकारस्तु प्रकृतेर्नात्मनः आत्मा तु सर्वत्र ज्ञानै
काकारतया सम इति पश्यंतीत्यर्थः १८ ॥

अभिनवगुप्तकृतटीका

यत एवं स्वभावस्य प्रवर्तते इत्यतो युक्तात्मनां नामित्थं स्थितिरित्याह वि
द्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समद
र्शिनः १८

परमार्थप्रपा टीका

अथ तदाचारपर्यवसितं समदर्शित्वमाह विद्येति पंडिता ज्ञानिनो ब्रह्म
णादिषु समदर्शिनो भवंति सर्वत्रात्मदर्शिनो वा स्वाकारेण गणयंतीत्यर्थः

वनमाली टीका

सर्वत्रांतर्यामितया स्थितस्य भगवतः साम्यज्ञानं विषमदेहादिस्थितानां
साम्यज्ञानं च ज्ञानभक्तिप्रसादद्वारा मुक्तिहेतुरित्याह विद्येति विद्या वेदार्थ
ज्ञानं ब्रह्मज्ञानं वा विनयो निरहंकारत्वमनौद्धत्यं ताभ्यां संपन्ने ब्रह्मविदि
विनीते च ब्राह्मणे सात्त्विके सर्वोत्तमे तथा गवि राजस्यां मध्यमा
यां तथा हस्तिनि शुनि च श्वपाके वात्यंततामसे सर्वाधमे सत्त्वादिगुणैस्त
ज्जैः संस्कारैरस्पृष्टमेव सममंतर्यामिणं तत्त्वं जीवतत्त्वं च द्रष्टुं शीलं येषां
ते समदर्शिनः सर्वत्र जीवे प्रत्येकं च समत्वदर्शने रागद्वेषादिराहित्ये
न श्वपाकादिकमपि निघ्नंतः क्रमेण मुक्ता भवंतीति भावः १८ ॥

उसमवैजयंती टीका

पुनः ज्ञानेन च स्तौति द्वाभ्यामाह विद्येति विद्यात्मज्ञानं शास्त्रज्ञानं वा विन
यो विशेषेण नयो नीतिस्तेन संपन्नो उत्कृष्टस्मिन् ब्राह्मणे गवि
देहे श्वपाके अंत्यजे वति कर्मणो वैतौ विषमौ गवि हस्तिनि शुनि चैव तेषु

ब॰

जात्येव विषमाः प्रकृतिपरिणामदेहादिसंसर्गेण तु विषमाकारप्रतीयमानेषु
तेषु पंडिताः आत्मयाथात्म्यज्ञानवन्तः समदर्शिनः समं द्रष्टुं शीलं येषां ते तथा
एते सर्वे देहादयः प्रकृतेरेव परिणामो न त्वात्मनः एत आत्मा ज्ञानस्वरूपः स
मानाकारो भवति न तु विषमाकार इत्येवं पश्यंतीत्यर्थः ॥१८॥

देहपातादूर्ध्वं विदेहकैवल्यरूपं ज्ञानफलमुक्तामधुसूदनीटीका प्रारब्धकर्मवशात्सत्यपि देहे जीवन्मुक्तिरूपं
फलमाह विद्यावेदार्थपरिज्ञानं ब्रह्मविद्या वा वि[नयो] निरहंकारत्वमनौद्धत्यमिति यावत् नयो॰
ताभ्यां सम्पन्ने ब्रह्मविदि विनीते ब्राह्मणे सात्विके सर्वोत्तमे तथा गवि संस्का
रहीनायां राजस्यां मध्यमायां तथा हस्तिनि शुनि श्वपाके चात्यंततामस
से सर्वेष्वपि सत्वादिगुणैस्तज्जैश्च संस्कारैरस्पृष्टमेकं समं ब्रह्म द्रष्टुं शीलं ये
षां ते समदर्शिनः पंडिता ज्ञानिनः यथा गंगातोये तडागे सुरायां मूत्रे वा प्र
तिबिंबितस्यादित्यस्य न तद्गुणदोषसंबंधस्तथा ब्रह्मणोपि आभासद्वारा प्र वि॰
तिबिंबितस्य नोपाधिगततद्गुणदोषसंबंध इति एवंस्थिताः सर्वत्र सम
दृष्ट्यैव रागद्वेषराहित्येन परमानंदस्फूर्त्या जीवन्मुक्तिमनुभवंतीत्यर्थः १८
ननु सात्विकराजसतामसेषु स्वभावविषमेषु प्राणिषु समत्वदर्शनं धर्म
शास्त्रनिषिद्धं तथा च तस्यान्नमभोज्यमित्युपक्रम्य गौतमः स्मरति स
मासमाभ्यां विषमसमे पूजात इति समासमाभ्यामिति चतुर्थी द्विवचनं
विषमसम इति द्वंद्वैकवद्भावेन सप्तम्येकवचनं चतुर्वेदपारगाणामत्य
तसदाचाराणां यादृशो वस्त्रालंकारान्नादिदानपुरःसरं पूजाविशेषः
क्रियते तत्समायैवाल्पस्यैकवेदस्यापारगायासदाचाराय विषमे तस्यैता
यान्नृते पूजाप्रकारे कृते तथाल्पवेदानां हीनाचाराणां यादृशो हीनसाध
नः पूजाप्रकारः क्रियते तादृशायैवासमाय पूर्वोक्तचतुर्वेदपारगसदाचारब्रा
ह्मणायोपेतयाहीनाय तादृशहीनपूजाधिके समत्वपूजासमे पूजाप्रकारे
कृते उत्तमस्य हीनतया हीनस्योत्तमतया पूजातोऽस्य पूजयितुरन्नमभोज्यं स॰ हेतो॰
भवतीत्यर्थः पूजयिता प्रतिपत्तिविशेषमकुर्वन् धनाद्धर्माच्च हीयत इ
ति च दोषांतरं यद्यपि पतितानां निरयहारिणामपाकाभावादन्नाभावाच्चा
भोज्यान्नत्वं च यतो हीनत्वं च स्वत एव विद्यते तथापि धर्महानिर्दोषो भवत्ये
व अभोज्यान्नत्वं चाशुचित्वेन पापोत्पत्तिफलत्वात् तथापि तेषां चतस्र
वणमिति तद्धानिरपि द्रष्टृणां भवत्येवेति कथं समदर्शिनः पंडिता जी
वन्मुक्ता इति प्राप्तेयं परिहरति ॥

सदानंदी टीका

उक्ताज्ज्ञानफलं मोक्षं देहपातादनंतरं जीवन्मुक्तिफलं प्राह देहे सत्यपि तद्विदां १ सात्विके ब्राह्मणश्रेष्ठे विनीते तत्त्वदर्शिनि मतिसंस्काररहिता याः राजसामध्यमाकृतौ अत्यंततामसे सर्वापमेहस्पारिकत्रये सत्वादिक गुणोत्तरैः संस्कारैरत्यसंगिकं ३ रत्नभूमौ लसमं ब्रह्म येषां ते ज्ञानिनोबुधाः सूर्यो गांगे जले कौपे सुरायां प्रतिबिंबितः तद्गतौ दोषसंबंधैरसंस्पृष्टो य थाभवेत् तथा ब्रह्मविदाभासद्वारेणाप्रतिबिंबितं ५ नोपाधिगुणदोषाभ्यां संबंध्यातिविद्वनं इत्येवं मन्यमानास्ते सर्वत्र समदर्शिनः ६ नीरागाः स्वस्वस्वरूपस्था जीवन्मुक्तिं भजंति वै ७ १८ ॥

नीलकंठी टीका

एतेषां जगतिदृष्टिमाह विद्येति उत्तमब्राह्मणो चेडालादौ वा समं ब्रह्मैव स्वरूपास्फुरणाद्रूपेणावभासमाने दृष्टुं शीलं येषां ते समदर्शिनः यथोक्तं अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकं आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति चराचरं जगद्ब्रह्मदृष्ट्यैव पश्यंतीत्यर्थः १८ ॥

आनंदी टीका

विद्याविनयसंपन्ने ब्राह्मणादिविषये शरीरस्थिताः समदर्शिनः सममेकम विकारं ब्रह्म द्रष्टुं शीलमेषां तादृशाः संतीत्यन्वयः विगतरागद्वेषाभिमा नाः ब्राह्मणशरीराश्रयेणाकिमपि सुकृतं नादेयं श्वपाकशरीराश्रयेणा किमपि दुष्कृतं न त्याज्यमित्यर्थः अत्रायमर्थसंग्रहः योगीयद्यपि महाविदे हात्व्ययात्संयमहत्त्वात् तत्त्वात् सुकृतं तथा त्याज्यमित्यर्थः अत्रायमर्थसंग्र हः योगीयद्यपि महाविदेहाख्यया संयमहत्त्वात् तत्त्वात् सुकृतदुष्कृत फलोपभोगार्थं मनुष्येषु पशुषु वा जातानि तानि समममध्यमाधम शरीरा णि सृजति तस्य तत्तत्स्वशरीरस्थस्य तत्पुण्यपापपुण्यपापलेपो नास्ति य थासूर्यस्य पुण्यापुण्य भूमिसंपर्कात् तथा चात्र विद्याविनयसंपन्नो ब्रा ह्मणतया गौरुत्तमाः अन्ये तु क्रियादयो मध्यमाः श्वपाकोधमः पशुषु हस्ती मध्यमः श्वाधमः १८ ॥

रामकंठी टीका

विलक्षणानां चित्तवृत्तिं प्रतिपाद

यितुमाह — विद्याशास्त्रं विनयस्तदर्थानुष्ठानं विषयो नियमविशेषस्ताभ्यां संपन्नः

तं विदेहधारणामुक्त्वा महाविदेहां दर्शयति परिदृता धारणा धारणाभिलाषः अकाशावरणक्षयेण जन्मविदेहाख्या तत्तयः प्रादुर्भूता मादिसिद्धयः अमनो देश राशिवद्बहूनि युगपन्त्यपरा योगवरैर्ज्ञानेषु सर्वाम् हीरेन भुंजीत विषयान्केचित् द्भिर्दुग्रं तपश्चरेत् संहरेच्च नंस्तानि सूर्यस्तेजोगणानिवे त्यादि पृथक्पृथक् पोद्वान फलं निद्या न्मनो यापक्तं तेन्यावरा नैकादिद्रीनतथोधन्या दृष्टं भुक्तोपभोगेन दृष्टार्थं तत्तत्कर्म लोपभोगसमर्थो विनानाविनिर्मीयशरीराणि सृजतीत्यर्थः

ब्रह्मणोऽनाहश्चानंतो योगिनां सकललोक

मेवं द्रोणो ब्राह्मणस्तस्मिंस्तथा गवादिषु तिर्यक्षु भयाहारमैथुनमात्रप
र्यवसितसर्वेहस्तिषु तथा श्वपाके मनुष्यभावेपि तिर्यक्प्राये पंडिता यथो
क्ततत्त्वज्ञानप्रबुद्धाः समदर्शिनः समं सर्वात्मानमेकमशेषविशेषशून्यं स्व
स्वभावं विज्ञात्वेदृशं प्रतिपन्नं शीलं येषां ते न यथाविधाः किमनेनोक्तं भ
वति येमनुजृंभितदृश्यज्ञानवत्त्वस्तस्मायापहतदृष्टिभिर्नानात्वेन परि
दृश्यमानं समस्तभावजातं ब्रह्मैकरूपतयानित्यमालोकयंति न चैवं सं
नवं यथा तेन ब्राह्मणादौ विहितं समाचारं श्वपचादिषु प्रयुंजते श्वपचादिषु
विहितं ब्राह्मणादिष्विति विकर्मणि स्थिताः पारमेश्वरी जगद्व्यवस्था लु
प्यापयति ते हि यथास्थितमेव जगद्भावविलासं ब्रह्मात्मकं पश्यंति न तु
ब्रुयान समाचरंतीति [illegible] १८ ॥

एवं देहपाताद् ऊर्ध्वं विदेहकैवल्यं ... नासिकी [illegible] टीका ज्ञानफलमुक्त्वा प्रारब्धकर्मवशात्तस्यापि देहे
जीवन्मुक्तिरूपं तत्फ
लमाह —

पंडिता यथोक्ततत्त्वज्ञानाः स्वप्रबुद्धाः विद्याविनयसंपन्ने ब्राह्मणे विद्या
शास्त्रं विनयस्तदर्थानुष्ठानं निवृत्तस्ताभ्यां संपन्ने ब्राह्मणे सात्त्विके सर्वोत्त
मे तथा गवि राजसे पावनत्वादि धर्मभाजायाम् हस्तिनि अर्थादि स्था
ने शुनि अपवित्रत्वादिदुष्ट्याश्रये श्वपाके पापित्वादि प्रतिपन्नविषये एतेषु ता
मसेषु च स्वाचारसंस्कारैरसंस्पृष्टाः समदर्शिनः समं निर्विशेषं ब्रह्म द्रष्टुं
शीलं येषां ते इति समं पश्यंति न तत्त्वव्यवहरंति नतु ... विद्वांसः सर्वदेहेषु विशे
षो नास्ति कुत्रचित् अतस्तत्त्वयं सर्वभावयन्नेव जितेंद्रिय इति यथा गंगाजलो
पेतद्वागे स्वर्णायां घटेषु प्रतिबिंबित स्यादित्यस्य न तद्गुणदोषसंबंधः एवं तु स
न्यायात्तः सर्वत्र समदृष्टैव परमानंदस्फूर्त्या जीवन्मुक्तिमनुभवंतीत्यर्थः
इत्यद्वैतज्ञानस्यैयं पारोक्ष्या [illegible]
[illegible]
[illegible] आह १८ ॥

पंचोलीटीका

कथं तत्त्वं पश्यंतीत्यपेक्षायां तत्प्रकारमाह विद्येति पंडिता वि
वेकिनः विद्यावति सविनीते ब्राह्मणे सात्त्विके राजस्यां गवि विश्वस्यंते तामस

गी
पं॰टी॰

१०

तेह्यस्मादोसमदर्शिनः समंसर्वेष्वपिनाशनसंस्कारविक्रियादिना
रहितंपरंब्रह्मैवपश्यन्ति १८ ॥

रसवीरसमिद्धोधिनी ॥

विद्याविनयेति पंडिताशुद्धव्यवहारनिपुणाः विद्याविनयसंप
न्ने विद्याभ्यासविनयस्तदर्थानुष्ठानविषयोनियमविशेषस्ताभ्यां
युक्तैः संपन्ने विशिष्टे ब्राह्मणे गवादौ च समदर्शिनः ब्राह्मणत्वादि
कंविहायाततायित्वमंगीकृत्यवध्यतायांसमानंनिमित्तंपश्यंति
तच्छीलाइति तथाचस्मृतिः आततायिनमायांतंहन्यादेवाविचा
रयन्इति नाततायिवधेदोषइत्यादि च भगवताचयेऽवकवंयस्त
थैवाचरतिइति अत्रचगवादिरूपेणप्रच्छन्नामायाविनोसुरापवदं
तव्यानद्भुनगावस्तेषामाततायित्वासंभवादित्ययंभगवतोभिप्रायः
तथोक्तिस्तु निःसंप्रायंशुद्धेप्रवर्तनार्था १८ ॥

अथभाष्य

विद्येति तदेवस्तौति १८ ॥

भाषा अनुवाद

तो वे तत्वज्ञानी जो मुक्ति लाभ करते कैसे होते हैं सोई कहते हैं कि विषम वस्तुमे समज्ञान अर्थात् सकल वस्तु मे ब्रह्मरूप देखते हैं जैसे कि विद्या औ विनय से युक्त ब्राह्मण औ गऊ हाथी कुत्ता तथा चाण्डाल इन सब मे पण्डित कहे ज्ञानी समदर्शी होते हैं अर्थात् सब मे आत्मा रूप ईश्वर को एकरूप देखते है १८ ॥

दोहा

विद्याविनययुतविप्रमे गऊमे हस्तिमाहि और श्वानचंडाल
में पंडित सामदर्शाहि १८ ॥

91

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः निर्दोषं
हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः १९ ॥

शांकरभाष्य

नन्वभोज्यान्नास्ते दोषवन्तः समासमाभ्यां विषमसमे पूजात इति स्मृतेर्न
ते दोषवन्तः कथं इहेति इहैव जीवद्भिरेव तैः समदर्शिभिः पंडितैर्जितो वशी
कृतः सर्गो जन्म येषां साम्ये सर्वभूतेषु ब्रह्मणि समभावे स्थितं निश्चलीभूतं
मनोऽन्तःकरणं निर्दोषं यद्यपि दोषवत्सु श्वपाकादिषु मूढैस्तद्दोषैर्दोषवदिव
विभाव्यते तथापि तद्दोषैरसंस्पृष्टमिति ~~[illegible]~~
~~[illegible]~~ निर्दोषं हि दोषव
र्जितं हि यस्मान्नापि स्वगुणभेदभिन्नं निर्गुणत्वाच्चैतन्यस्य वक्ष्यति च भग
वानिच्छादीनां क्षेत्रधर्मत्वमनादित्वान्निर्गुणत्वादिति च नाप्यन्त्या विशे
षा आत्मनो भेदकाः सन्ति प्रतिशरीरं तेषां सत्त्वे प्रमाणानुपपत्तेरतः समं
ब्रह्मैकं च तस्माद्ब्रह्मण्येव ते स्थिताः तस्मान्न दोषगन्धमात्रमपि तान्स्पृ
शति देहादिसंघातात्मदर्शनाभिमानाभावात् तेषां देहादिसंघातात्मदर्श
नाभिमानवद्विषयं तु तत्सूत्रं समासमाभ्यां विषमसमे पूजात इति पूजा
विषयत्वविशेषणात् दृश्यते हि ब्रह्मवित् षडङ्गवित् चतुर्वेदवित् इति पू
जादानादौ गुणविशेषसंबंधः कारणं ब्रह्म तु सर्वगुणदोषसंबन्धवर्जितमि
त्यतो ब्रह्मणि ते स्थिता इति युक्तं १९ ॥

आनंदगिरिकृतटीका

सात्त्विकेषु राजसेषु तामसेषु चासमेषु समत्वदर्शनमनुचितमिति शं
कते नन्विति सर्वत्र समदर्शिनः तच्छब्देन परामृश्यन्ते तेषां दोषवत्त्वादा
भोज्यान्नत्वमित्यत्र प्रमाणमाह समासमाभ्यामिति समानामध्ययनादि
भिः समानधर्मकाणां वस्त्रालंकारादिपूजया विषमे प्रतिपत्तिविशेषे ।
क्रियमाणे सत्यसमानां चासमानधर्मकाणां कस्यचिदेकवेदत्वमपरा
स्य द्विवेदत्वमित्यादिधर्मवतां प्राकृततया पूजया समे प्रतिपत्तिविशेषे पूज
यिता पुरुषविशेषं ज्ञात्वा प्रतिपत्तिमकुर्वन् धनाद्धर्माच्च हीयते तेन सात्त्विके
राजसतामसयोश्च समबुद्धिं कुर्वन् प्रत्यवैतीत्यर्थः उत्तरत्वेनोत्तरश्लोकम

गी
टी॰ पं

92

वतारयति न ते दोषवन्त इति स्वस्त्ववहंभेन सर्वसत्वेषु समत्वदर्शिनां
दोषवत्त्वमुक्तं कथं नाप्नोति प्रतिज्ञामात्रेण सिध्यतीति शंकते कथमिति
स्वर्गतिमर्थेव दिव्यान् निर्दोषत्वं समत्वदर्शिनो विवरयति इहैवेति सर्वे
षां चेतनानां साम्ये प्रवणमनसो ब्रह्मलोकगमनमन्तरेण अस्मिन्नेव दे
हे परिभूतजन्मनामशेषदोषराहित्ये हेतुमाह निर्दोषं हीति वर्तमानो दे
हः सम्यक्परिदृश्यते नानेव समदर्शिनो विशिनष्टि येषामिति ननु ब्रह्म
णो निर्दोषत्वमसिद्धं दोषवत्स्वश्वपाकादिषु तद्दोषैर्दोषवत्त्वोपलंभसंभ
वादित्याह यद्यपीति यस्मात् तन्निर्दोषं तस्मात्तस्मिन् ब्रह्मणि स्थितैर्निर्दो
षैः सर्गो जित इति संबन्धः ब्रह्मणो गुणभूयस्त्वादल्पीयान् दोषोपि स्यादि
त्याशंक्याह नापीति चेतनस्य गुणविशेषैर्विशिष्टत्वमनिष्टं निर्गुणत्वश्र
वणादित्युक्तं तद्विरोधिनो परिशेषादात्मधर्मत्वस्य केचिन्निच्छन्तता
दित्याशंक्याह वक्ष्यति चेति आत्मनो निर्गुणत्ववाक्यशेषे प्रमाणयति अ
नादित्वादिति वकारो वक्ष्यतीत्यनेन संबन्धार्थः गुणदोषवशादात्मनो भे
दाभावेपि भेदोन्त्यविशेषेभ्यो भविष्यतीति प्रसंगादाशंक्य दूषयति नाप
पीति प्रतिशरीरमात्मभेदसिद्धौ तद्धेतुत्वेन तेषां सत्वे तेषां च सत्वे प्रतिश
रीरमात्मनो भेदसिद्धिरिति परस्पराश्रयत्वमभिप्रेत्य हेतुमाह प्रतिशरीर
मिति आत्मनो भेदकाभावे फलितमाह अत इति समत्वमेव व्याकरोति
एकं चेति ब्रह्मणो निर्विशेषत्वेनैकत्वाज्जीवानां च भेदकाभावेनैकत्वस्यो
क्तत्वादेकलक्षणत्वादेकत्वं जीवब्रह्मणोरेष्टव्यमित्याह तस्मादिति जीव
ब्रह्मणोरेकत्वे जीवानां ब्रह्मवन्निर्दोषत्वं सिध्यतीत्याह तस्माच्चेति तच्छब्दा
र्थमेव स्फोरयति देहादीति यदि सर्वसत्वेषु समत्वदर्शी नमस्कर्तुमिष्टं तर्हि
कथं गौतमस्त्रमित्याशंक्याह देहादिसंघातेति सत्वस्य यथोक्ताभिमानव
द्विषयत्वे गमकमाह पूजेति यदि च तद्वैरतामेव समतां पूजया वैषम्यं यदि
वा च तद्वैरतां षडङ्गविदं ब्रह्मविदं च पूजया समां तदा तेषामत्र पूजावि
षयाणां केषांचिन्मनो विकारसंभवे कर्ता मन्यवैतीत्यविद्वद्विषयत्वं सत्रा
स्य प्रतिभातीत्यर्थः तत्रैव चानुभवमनुकूलत्वेनोदाहरति दृश्यते हीति दे

हादिसंघाताभिमानवतां गुणदोषसंबन्धसंभवात्तद्विषयं सूत्रमित
क्रमिदानीं ब्रह्मात्मदर्शनाभिमानवतां गुणदोषसंबन्धात्तद्विषयं सू
त्रमित्यभिप्रेत्याह ब्रह्मविदिति १९॥

स्वामिकृतटीका

ननु विषमेषु समदर्शनं निषिद्धं कुर्वन्तः कथं ते पंडिताः यथाह गौत
मः समासमाभ्यां विषमसमे पूजातः इति अस्यार्थः समाय पूजायां
विषमप्रकारेण कृते विषमाय च समप्रकारेण कृते सति पूजक इह लोकात्प
रलोकाच्च हीयत इति तत्राह इहैवेति इहैव जीवद्भिरेव तैः सृज्यत इति
सर्गः संसारो जितो निरस्तः कैर्येषां मनः साम्ये समत्वे स्थितं तत्र हेतु
र्हि यस्मात् ब्रह्म समं निर्दोषं च तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिता ब्र
ह्मभावं प्राप्ता इत्यर्थः गौतमोक्तस्तु दोषो ब्रह्मभावप्राप्तेः पूर्वमेव पू
जातः इति पूजकावस्थाश्रवणात् १९॥

पैशाचभाष्य

ननु भोज्यान्नास्ते दोषवन्तं समासमाभ्यां विषमसमे पूजातः इति स्मृतेः न ते
दोषवन्तः कथं इहैवेति इहैव जीवद्भिः समदर्शिभिः पंडितैर्जितो वशीकृतः
सर्गो जन्म येषां साम्ये सर्वभूतेषु ब्रह्मणः समभावे स्थितं मनो ऽतः कारणं
निर्दोषं यद्यपि दोषवत्सु श्वपाकादिषु मूढैः सदोषवदिव विभाव्यते त
थापि तद्दोषैरस्पृष्टमिति निर्दोषं दोषवर्जितं हि यस्मान्नापि स्वगुणभेदात्
भिन्नं निर्गुणत्वाच्चेतनत्वस्य वस्तुतो भगवानिच्छादीनां क्षेत्रधर्मत्वमना
दित्वान्निर्गुणत्वादिति च नाप्यन्त्यविशेषादात्मनो भेदकाः सन्ति प्रतिशरीरं
तेषामसत्वे प्रमाणानुपपत्तेः अतः समं च ब्रह्मैकं तस्माद्ब्रह्मण्येव ते स्थिताः
तस्मान्न दोषगंधमात्रमपि तान्स्पृशति देहादिसंघातात्मदर्शनाभिमा
नाभावान्नैषां देहादिसंघातात्मदर्शनाभिमानवद्विषयं तन्न तु तत्समासमा
भ्यां विषमसमे पूजातः इति पूजाविषयत्वेन विशेषणादृश्यते हि ब्रह्मवित्
षडंगवित् वेदवेदविदिति पूजादानादौ गुणविशेषसंबंधः कारणं ब्रह्म
तु सर्वगुणदोषवर्जितमित्यतो ब्रह्मणि ते स्थिताः इति युक्तं कर्मविषयं तत्समा
समाभ्यामित्यादि इदं तु सर्वसंन्यासविषयं ब्रह्मणि ते सर्वकर्माणि मनसा संन्यस्य

त्यारभ्याध्यायपरिसमाप्तेः १८

रामानुजभाष्यं

इहैवेति इहैव साधनानुष्ठानदशायामेव तैः सर्गो जितः संसारो जितः येषामुक्तरीत्या सर्वेष्वात्मसु साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म प्रकृतिसंसर्गदोषवियुक्ततया सममात्मवस्तु हि ब्रह्म आत्मसु साम्ये स्थिता ब्रह्मणि स्थिता एव ते ब्रह्मणि स्थितिरेव हि संसारजयः आत्मसु ज्ञानैकाकारतया साम्यमनुसंदधाना मुक्ता एवेत्यर्थः १९॥

अभिनवगुप्तकृतटीका

अयं श्लोकः अस्यां टीकायां षष्ठाध्याये टिप्पः

तेषां च तेषां योगिनां ब्राह्मणोऽनीदृशे बहिरस्य सुखकारिणा हेतुरूपेण चान्ना विद्याविनीत्यादि गविनपावनीयमित्यादि दान्तिना यादिधीः श्रुतिर नापवित्रापकारितादिनिमित्तः श्वपाके च न पापापवित्रादिधीः यतः अन पवसमे पश्यन्तीति तत्त्वदर्शन्तीति यदुक्तं विद्यासौ सर्वदेहेषु विशेषो नालिकत्वविन अत एव तन्मयं सर्वं भावयन् भवजिज्जनः अत्रापि भाव यति तानसौ वा यं धारोक्ता १९॥

परमार्थप्रपाटीका

अथ तेषां फलमाह इहैवेति येषां पुरुषाणां साम्ये समत्वे मनः स्थितं स्थिरीभूतं तैः समदर्शिभिः इहैव देहे जीवद्भिः संसारो जितः हि यस्मात्कारणाद्ब्रह्म समं अविषमं तथा निर्दोषं वैषम्यदोषसाधनीभूतं तत्तद्देहाद्युपाधिभिरस्पृष्टं निर्बाधं वा तस्मात्ते ब्रह्मणि स्थिताः समो मशकेन समो नागेनेति श्रुतेः १९॥

वनमालीटीका

ते जीवन्मुक्ता भवन्तीत्याह इहेति येषामुक्तसाम्ये मनः स्थितं तैरिहैव जन्मनि सर्गो जन्मादिरूपः संसारो जितः ननु विषमस्य वस्तुनः समदर्शनमात्रेण कथं मुक्तिस्तत्राह निर्दोषमिति हि यतः परं ब्रह्म निर्दोषमात्मसंज्ञीवात्मस्वपि तत्तत्स्वात्मसमतः समदर्शिनः सर्वत्र समब्रह्मदर्शिनो जीवस्वरूपस्यानानेदनिर्विकारत्वादिना साम्यदर्शित्वेन देहपाशरहितत्वात्तेन ब्रह्मणि स्थिताः अपरोक्षीभूतेन ब्रह्मरूपेणैव स्थिताः तेषां तादृशपादृशामेव हित

कालेएवपरब्रह्मप्राप्तिर्भवतीतिभावः १८॥

अथवैजयन्तीटीका

किंच इहैवेति येषांज्ञानाभ्यासनिरतानां मुमुक्षूणां मनः आत्मप्रवणं तदर्श
नोपायप्रक्रमे साम्ये ज्ञानैकाकारतया सर्वेषामात्मवस्तूनां स्वरूपे साम्ये तस्
मिन् साम्ये आत्मस्वरूपे स्थिते प्राकृतविषयाव्याकुलतया स्थिरीभूतं भवति
तैः साधनाभ्यासपरैर्मुमुक्षुभिरिहैवास्मिन्नेव जन्मन्येव वा साधनद
शायामेव वा सर्गः संसारो जितस्त्यक्तस्तत्र स्थितापि स्वकर्मएवेत्यर्थः कस्मा
देवमित्यपेक्षायामाह हि यस्मादात्मवस्तु ब्रह्मलक्षणं कूटस्थात्मकं तादृशं हि देहादि
विलक्षणाद्धानोपेक्षणादिकामलत्वात् यद्वा यथा पृथिवीत्वजलत्वादिविशेष
धर्मेण पृथिव्यादयो भिन्नाश्च पृथिवीत्वसामान्यधर्मेणाभिन्नाः तथा सामान्यधर्मे
णाभिन्नाः तथा जीवब्रह्मणोरल्पज्ञत्वसर्वज्ञत्वादिविशेषधर्मेण स्वरूपतः उभौ
भिन्नावपि चेतनत्वादिसामान्यधर्मेणाभिन्नावित्यवेरीत्या जीवस्यापि ब्रह्मकथ
नेयमत्रमेव एवमपि कृतो यतः समं ज्ञानैकाकारतया सर्वात्मनां समानं रूपं ।
अतएव निर्दोषं प्रकृतिसंसर्गरूपदोषवर्जितं भवति तस्मात् ब्रह्मणि आत्म
साम्ये ते स्थिताः स्थितवन्तो मुक्ता एवेत्यर्थः आत्मसाम्यस्थितिरेव संसारजयार्थ

मधुसूदनीटीका

तैः समदर्शिभिः पंडितैरिहैव जीवनदशायामेव जितोऽतिक्रान्तः सर्गः सृज्यत
इति व्युत्पत्त्या द्वैतप्रपंचः देहपातादूर्ध्वमतिक्रमितव्य इति किमु वक्तव्यं कैः ।
येषां साम्ये सर्वभूतेषु विषमेष्वपि वर्तमानस्य ब्रह्मणः समभावे स्थितं नि
श्चलं मनः हि यस्मान्निर्दोषं समं सर्वविकारशून्यं कूटस्थं नित्यमेकं च ब्रह्म
तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिताः अयं भावः दुष्टत्वेन हि हेयं भवति ।
अदुष्टस्यापि दुष्टसंबंधाद्वा यथा गंगोदकस्य मद्यगतपातात् तत एव वा
यथा मृदादेः तत्र दोषवत्स्वरूपाकारादिस्थितं तत्र दोषवैदुष्ट्यातिब्रह्मणि तु
विभाव्यमानमपि सर्वदोषाः संसृष्टमेव ब्रह्मव्योमवदसंगत्वात् असंगो
ह्ययं पुरुषः सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः एक
स्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्य इति श्रुतेः नापि कामा
दिधर्मवत्तया स्वतः [illegible] एव कलुषितं कामादेरंतःकरणधर्मत्वस्य श्रुतिस्मृति

सिद्धस्मृतिनातस्मा निर्दोषं ब्रह्म तद्रूपायतयो जीवन्मुक्ताः अभोज्यान्नादिदो
षदुष्टो भवतीत्याशङ्क्य स्मृतिश्चाविद्वद्गृहस्थविषयैव तस्मादन्नमभोज्यमित्युपक्र
मान्तं ज्ञात इति मध्ये निर्देशाद्वा तत्पर्यवसीयत इत्युपसंहारादेवेति द्रष्टव्यं ॥१८॥
[illegible] ॥

मरामेरी टीका

ननु सात्त्विकमनुष्येषु स्वभावविषमेषु च समत्वदर्शनं शास्त्रविनिषिद्धं यमेत
सो १ स्मरतीत्यमभोज्यान्न इत्युपक्रम्य गौतमः समासमाभ्यां विषमसमे
पूजातः इत्यसौ २ उत्कृष्टानां यथा पूजा प्रोक्ता वेदविशिष्टतो न तत्समायैव
वान्यस्मैतेनेन पूजाविपर्यो कृते ३ हीनाचारवतामल्पविदां पूजा यथोदिता
तत्समानाय चान्यस्मै समासे पूजाविपर्यो कृते ४ हीनत्वेन वरिष्ठस्य हीनस्या
न्नमभावतः पूजातः कारणात्तस्य पूजाकर्तुरनर्हिदः ५ भवत्यन्नमभोज्य
हिंस्यतेरित्यर्थ इरितः एवं दोषप्रसिद्धे ते कथं स्युः समदर्शिनः ६ पण्डिता
इति श्लोकाभ्यामन्तरं प्राह केशवः नैजीवन्निरतिज्ञानः पण्डितैः समदर्शिभिः
सर्गो द्वैतप्रपञ्चो यैर्मतेषु विषमेष्वपि ब्रह्मणो वर्तमानस्य साम्ये येषां स्थिरं म
नः यस्माद्ब्रह्म कूटस्थं नित्यमेकरसं समं तस्मात्ते विषये तानि तत्र ब्रह्मणीव
विपश्चितः ७ धामे दोषवत्स्वेषु श्वपाकादिषु यद्यपि तद्दोषैर्दोषवत्त्व
दैः परब्रह्म विभाव्यते ८ तथापि दोषासंस्पृष्टमेव ब्रह्म स्वभावतः तद्रू
पाः पण्डिता जीवन्मुक्ता दोषैर्विवर्जिताः ११ स्मृतिस्त्वनष्टगृहस्थस्य दोष
माहात्म्याकृतेः न तद्ब्रह्मविदो दोषं वक्तुमर्हति केचन १२ १९ ॥

नीलकंठी टीका

ननु समासमाभ्यां विषमसमे पूजातः इति तत्स्मृत शीलाय ब्राह्मणाय दद्याय
विषमं पूजाप्रयफलवतः तथा च तत्स्मृत शीलाय ब्राह्मणाय दद्याय समं
पूजाप्रफलवत श्वभोज्यान्नत्वं गौतम मनस्मर्यते तत्कथं ब्राह्मणचण्डालयोः
समदर्शित्वं युक्तमित्याशङ्क्याह इहैवेति येषां मनः सर्वभूतेषु साम्ये ब्र
ह्मभावे स्थितं निश्चलं तैरिहैव जीवद्भिरेव सर्गो जन्म जितो वशीकृतः हि य
स्मात् निर्दोषं समं सर्वत्राविषमं ब्रह्म नास्ति यथा हि याम यथोर्देवतात्वतीव्र

योः स्वर्गादिक साम्यं पश्यति पूजकस्त्वाकारादिकं तारतम्यं पश्यतीति
हेतू पूजास्तुतिप्रीतिकृततारतम्यविषया साम्यदृष्टिस्तत्तद्विषये
तिभावः यस्मादेवं ते साम्यं पश्यंति तस्मात् ब्रह्मणि अखंडैकरसे तेऽद्वा
रः स्थिता एकीभावेन समालिंगताः १९ ॥

आनंदटीका

केचिदिमं श्लोकं षष्ठेऽध्याये पठंति [illegible]करेणात्वस्मिन्नध्यायेऽत्रैव विवृतम्
संगच्छते चात्रैव तथा हि येषां महायोगिनां श्लोकार्थ्यामहाविदेहाख्य
धारणया महत्त्वविभावविनयसंपन्नब्राह्मणादिदेहेष्वनिजकर्मणां भोग
वत्त्वपरार्थस्थितानां साम्यं तद्गुणदोषालेपाभावेन मनः स्थितं तैर्योगि
भिरिहास्मिन्नेव जन्मनि सर्गं चतुर्दशविधः सर्वभूतसर्गो जितः सूर्य
द्वारे संयमाद्भुवनज्ञानमिति योगसूत्रार्थावेक्षया महायोगसिद्ध्या प्रकाश
वरणक्षयात्संयमेन तत्र तत्र भुवने तेन तेन भूतेंद्रियादिसंघातात्मना दे
हेन कर्मणां भोगेन क्षपणात् जितौ जितौ तथा भूमिमाह हेतयथाक्र
मम् दोषान्व्यापित्या मोहमाक्रांता भूत्वनिर्जितेति स्मरणात् सर्वाप
वभूमीफलं च परमो भूमिः केवल्यप्राप्तिरूपोऽर्थः ब्रह्मोपपत्तिमाह हि यस्मा
न्निर्दोषं निर्लेपं समं निर्विकारं ब्रह्मास्ति तस्मात्ते महायोगिनः प्रधानत
त्वयावजितभूमयो ब्रह्मणि स्थिताः सर्वासां भूमीनां जयादतः परं जे
तव्याभावात्स्वरूपं प्रामाद्यर्थः सर्वं चैतत् अंतर्धानं स्मृतिः कांतिर्दृष्टि
श्रोत्रज्ञता तथा निजं शरीरमुत्सृज्य परकायप्रवेशनं अर्थानां छंदतः
सृष्टिर्योगसिद्धेस्तु लक्षणं इति याज्ञवल्क्यस्मृतौ विवृतं अपराक्षे
णाविस्फीर्यते अंतर्धानमदृष्टदेहत्वं तथाणिमाद्यष्टगुणप्राप्त्यादेव
संभवंति तथा चात्र योगसूत्रम् कायरूपसंयमाद्रूपशक्तिस्तंभेच
क्षुःप्रकाशासंयोगेंतर्धानमिति स्मृतिर्जन्मांतरानुभूतार्थविषया
तेन चात्र संस्कारसाक्षात्करणात्पूर्वजातिपरिज्ञानमिति कांतिःकम
नीयत्वं वशित्वं च ततोणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघा
तश्चेति दृष्टिर्दूरात्तत्तद्गतव्यवहितविप्रकृष्टार्थविषया श्रोत्रज्ञता
श्रोत्रेंद्रियसाक्षात्कारः अनेन चात्महतिरिंद्र[illegible]अहंकारपंचतन्मात्रे
णू

कादशेंद्रियपंचभूतानां साक्षात्कारित्वमुक्तम् ज्ञानमेतत्रैव प्रवृत्त्यालो
कन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानमित्यस्यार्थः ज्योतिष्मती प्रवृत्ति
रुक्ता मनसः तस्या य आलोकस्तद्योगेन सूक्ष्मं वाव्यवहितं वा विप्रकृष्टं
वार्थं विन्यस्य तं तमधिगच्छतीत्यादि निजे स्वकीये शरीरे सर्वकर्मारब्धम्
न्यस्य परकायं प्रविश्य तद्देहगतं तया तद्विषयोपभोक्तृत्वम् सूत्रं चात्र
भुवनज्ञानं सूर्ये संयमात् बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च
चित्तस्य परशरीरावेश इति भूतानां स्वेच्छया छेदनं सृष्टिः भूतानां
पृथिव्यादीनां स्वेच्छयानां परार्थानां छेदनः स्वातंत्र्येणोत्पादनमिति
योगसूत्रे च बहिरकल्पिता वृत्तिर्महाविदेहा इति स्थूलस्वरूपसूक्ष्मान्वया
र्थवत्त्वसंयमाद्भूतजय इति तथा च प्रत्यभिज्ञाविमर्शिन्यामभिनवगुप्ता
चार्यपादैः दृष्टं तेन च बहुशो योगिनः स्वदेहस्यैव देहस्थितान् एव स्ववशीकृ
तस्मात्समार्गे योगमदेहान्तरेष्वपि वस्तु विज्ञानक्रियायोगिन इत्यादि प्र
वृत्तेन योगाभ्यासकृता यथायोगं शिष्याणां वृद्धो मधः सन्निवेशयि
तुं लिपाचामः तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः समाधिभाव
नार्थः क्लेशतनूकरणार्थश्च तत्राध्यात्मिकादिदुःखसहिष्णुत्वं तपः
वात्पत्तिभिन्ननिरपेक्षं शारीरं मानसिकं च दुःखमाध्यात्मिकम् मनुष्य
पश्वादिभूतान्यपेक्षमन्यत्त्वमाधिभौतिकं दैवग्रहकेशीतातपादि
निमित्तमपेक्षमन्यत्त्वमाधिदैविकं तदेतत्त्रिविधमपि दुःखं विशांतभा
वेन नियमं कृत्वा सहमानस्य धर्माधर्मयोः संचयस्तत्क्षयकरणात्तपः उच्य
ते ततो धर्मसंचयाद्योगप्रवृत्तिहेतुः श्रद्धातिशयो भवति अधर्मक्षया
च्चाधिव्याधिस्त्यानसंशयप्रमादालस्यादीनामंतरायाणामुपशमः त
तो नाकुलं चित्तं समाधीयते ननु दुःखेभ्यः तपोभ्यः चित्तविक्षेप एव भ
वत्यतो न योगार्थिना तपः कर्तव्यं धर्माधर्मयोः संचयस्तयोश्च जपप्र
त्याहारादिभिः एव भवतः तपःसाधनत्वेन प्रमाणानामसिद्धेरिति नैतद
स्ति यावदुत्साहकारकादिभिरभूतः स कथं जपप्रत्याहारादिकं कर्तुं श
क्नोत्यतः तेन तपः कर्तव्यम् यथा वस्त्रस्य स्थूलो मलः स्थूलोपायेन नि
वर्त्यते सूक्ष्मः सूक्ष्मोपायेनेति तथात्मनोऽपि स्थूलो मलः तावत्स्थूले

नोपायेन निवर्त्यते स्वल्पस्तूपायान्तरः सोपायेन तत्प्रत्याहारादिना नि
वर्त्यते इति प्रशान्तमंत्रस्येश्वरवाचिनोभ्यासः स्वाध्यायः तदुक्तं सिद्धिदेत
रपीश्वरवाचीमंत्रोस्तीति तत्स्वाध्यायार्थं प्रशान्तग्रहणं परमात्मैका
त्रिष्ठेन भवितव्यमिति तत्प्रणवार्थमीश्वरग्रहणं योगशास्त्राभ्यासो वा
स्वाध्याय इति परमेश्वरे तत्स्य भक्त्यतिशयात्सर्वं येनानुचिंतनपर्या
लोचनमीश्वरप्रणिधानं स्वनिजप्रवृत्त्यादिभिराराधनं वा सर्वक्रिया
णां परमगुरावर्पणं वा तद्वाचकस्य प्रणवस्य जपस्तदर्थभावनं चेति
सेयं तपःस्वाध्यायलक्षणा क्रिया योगहेतुत्वाद्योग इत्युच्यते स च
क्रियायोगः संसेव्यमानः समाधिं भावयति क्लेशांश्च तनूकरोति य
थाच क्रियायोगः क्लेशतनूकरणहेतुस्तथा योगाङ्गान्यपीमानि तस्मात्तान्यप्य
तियत्नेनानुष्ठीयानि कानि पुनस्तानि योगाङ्गानि किं यन्ति वेत्युच्य
ते यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽ
ष्टावङ्गानि निर्वर्तकानीत्यर्थः समाधितः कोन्यो योगस्य समाधिरङ्ग
मिति चेत्समाधिरेवास्य प्रकर्षप्राप्तो योगस्तस्य पूर्वः समाधिरङ्गमनु
त्पन्नस्या च समस्याष्टाङ्गवदस्य वा सर्वोपि समाधिप्रकर्षः पूर्वसमा
धिजन्यत्वेन योग उत्तरप्रकर्षजनकत्वेनाङ्गमिति यदि समाधितः
पृथक्समाधिर्भवति तत्वकमेवाङ्गं प्रागसमर्थतोष्टावङ्गानीति न वाच्य
पूर्वपूर्वासिद्धावुत्तरोत्तरासिद्धिः नहि यमासिद्धौ नियमाः सिध्यंति
नियमासिद्धौ चासनं न सिध्यति आसनासिद्धौ च प्राणायामो न सि
ध्यति प्राणायामासिद्धौ च प्रत्याहारो न सिध्यति प्रत्याहारासिद्धौ च
धारणा न सिध्यति धारणासिद्धौ च ध्यानं न सिध्यति ध्यानासिद्धौ च
समाधिर्न सिध्यति ततोष्टानामपि योगाङ्गत्वमिति तत्र देशकाला
वस्थाभिरनियताः पुरुषस्य शुद्धिवृद्धिहेतवो यमाः शुद्धिर्धर्मस्ता
योर्वृद्धिर्धर्मोपचयः अथवा शुद्धिश्चित्तवैमल्यं वृद्धिर्योगोत्कर्षः त
द्धेतवो देशादिभिरनियताः सर्वस्मिन्देशेनुष्ठीयन्ते सर्वस्मिन्काले सर्व
स्यामवस्थायां ते यमाः अहिंसादयः न त्वहिंसादयोपि केचिद्देशा
दिनियमेनानुष्ठीयंते यथा तीर्थे हिंसां न करिष्यामि पर्वदिवसे वा

गी॰
टी॰ पं॰

96

यद्वावस्थायां वा प्राणिवधं न करिष्यामि इति न देशाद्यपेक्षिते हिंसादी
नामपि नियमत्वात् अतएव शूद्रस्यादेः परमार्थेनायमान सन्ति यमेरु
पेतोयतिरिच्यते यमाभावे कथं शूद्रस्यादेर्नियमनिष्पत्तिरिति चेन्न प्र
वर्तकथमनिष्पादकनियमनिष्पत्तेर्विरोधान्निवर्तको हि यतिधर्मस्त
हेतवो नियमा अष्टनियमस्य न निष्पद्यन्ते इति देशकालावस्थापेक्षिताः
पुण्यहेतवः क्रियाविशेषा नियमाः तत्र देशापेक्षितो देवतायतनादौ काला
पेक्षितः सन्ध्योपासने जपक्रिया तत्र अवस्थामात्रमपेक्षते पुण्यातिशयं प्र
देशाद्यपेक्षितस्य सप्तत्वं तेन शिवसन्निधानाविर्भावादिश्रवणात् एवमन्येऽपि
क्रियाविशेषा देशाद्यपेक्षितत्वेन नियमा इति पातञ्जलाभिप्रायमात्तनिवृ
त्तिलक्षणा यमाः प्रवृत्तिनियमा इति यमनियमलक्षणं गृहक्रम ता
यावेतत्क्रम अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहा यमाः शौचसंतोष
तपःस्वाध्यायेश्वरप्रणिधानानि नियमा इति योगकर्मविरोधिनः
क्लेशाद्यपायः तेषां ज्ञानजयादुपायः सूच्यते करणानि अङ्गशरीरावय
वाः पादादयस्तेषां वत्स्थसंयमाः प्राणायामादिसिद्ध्यर्थं स्वस्तिकासनं
स्थिरं स्वस्ते नोपवेशनमित्यर्थः तस्यपद्मकस्वस्तिकाद्यनेकप्रकारं को
ष्ठस्यवायोः श्वासप्रश्वासलक्षणस्यगतिविच्छेदः प्राणायामः प्रच्छर्दना
निर्वातेनिर्जनेनिश्शब्देवप्रदेशे यथासुखमासने वद्धा रेचकपूरककुं
भकप्रकारः कर्तव्यः सवश्च शनैः शनैर्जेतव्यो वनगजेन्द्रवत् यथा वन
गजेन्द्रः प्रयोगेन शनैः शनैर्जीयमानो महान्तमुपकारं करोति हठा
दिप्रयोगेन तु हीनस्य विनाशमेव करोति तथा वायुः प्रयोगेन शनैः
शनैर्जीयमानो दोषमयं रागादिमलं चनिर्नाशयन् योगं प्रापयति अप्र
योगेनातिक्रम्य वा यं हीनस्य वातगुल्माद्यनर्थमेव करोतीति समाधि
प्रत्यनीकार्थेभ्यः सम्यगासेवनशीलावावर्तनं प्रत्याहारः प्रत्याहृतेचेतसि
इन्द्रियाणामपिविषयान्निवृत्तानि भवन्ति कस्मात्तन्मूलत्वादिन्द्रियाणां प्रवृत्तेः
प्रत्याहाराभियुक्तस्येन्द्रियजयः समाधिलाभश्च भवति नान्यथेति दे
शावन्यन्नितस्यधारणा कोऽयं देशः कस्मिंदेशे चित्तस्य बन्ध इति शरीराव
यवाः पादादिर्वाह्योवास्तु यम मंडलादिर्देशः इत्येके वयं तु ब्रूमः परमा

स्मैवात्रदेशोभिप्रेतस्तदारायनतात्मोतार्थिनः पादादिषुधारणातोदि
विस्वलोकादिप्राप्तिः फलंश्रूयते विघ्नस्यमनसः प्रयत्नेनधारणांनिश्च
लीकरणंवध्यत्वथ्यते धारणेतिसा तत्रप्रत्ययैकताननताध्यानं तस्मिन्धा
रणादेशेध्येयावलंबनस्य प्रत्ययस्यसदृशः प्रवाहः प्रत्ययांतरेणापरा
मृष्टःध्यानम् तत्रैकताननतास्तत्रैः विघ्नस्यतनचतुरैः विघ्नस्यैकतान
तेतिगम्यते मनसस्यसदृशप्रवाहकर्तृत्वमेवैकताननेति तदेवार्थमा
त्रनिर्भासस्वरूपशून्यमिवसमाधिरिति ध्यानमेवध्येयाकारमात्रनिर्भा
सप्रत्ययात्मकेनस्वरूपेणशून्यमिव यदाभ्यासेसमर्गात्स्फटिकवत्
रंध्येयमहंध्यायामीतिभेदेनशून्यंभवति तदासमाधिरित्युच्यते य
द्धाध्यानोत्कर्षोनिवातनिश्चलप्रदीपावस्थानमिवैकत्रैववृत्तेनसावस्थानंअ
समाधिरभिधीयते सचप्रज्ञालोकविघ्नः समाधुत्कर्षतारतम्यादिप्र
ज्ञालोकतारतम्यंभवति तथापातंजलसूत्राणि तत्रीयेपादे त्रयमेक
त्रसंयमः तदेतद्धारणाध्यानसमाधित्रयमेकविषयंयोगसाधनंयम
स्तुच्यते तज्जयात्प्रज्ञालोकः तस्यसंयमस्यजयात्समाधिप्रज्ञयाभवः
ज्ञालोकः यथायथासंयमःस्थिरपदोभवति तथातथासमाधिप्रज्ञा
विशदीभवति तस्यभूमिषुविनियोगः तस्यसंयमस्याजितभूमेर्यानंत
राभूमिस्तत्रविनियोगः तस्यजिताधारभूमिरनंतरांभूमिमुल्लंघ्यप्रान्त
भूमिषुसंयमंलभते तदभावेकुतःप्रज्ञालोकः जितोत्तरभूमिकस्यच
नाधारभूमिषुपरचित्तज्ञानादिषुसंयमोयुक्तः त्रयमंतरंगंपूर्वेभ्यः पूर्वे
भ्यःसंयमादिभ्यः पंचभ्यःधारणात्रयमंतरंगं तदपिबहिरंगंनिर्बीजस्य
तदभावेभावात् लक्षितोहिप्रथमेपादे निर्बीजसमाधिर्यथा समाधि
प्रज्ञाप्रतिलंभेयोगिनः प्रज्ञाकृतसंस्कारेणनवनवोजायते तस्यापिनि
रोधेसर्वनिरोधान्निर्बीजसमाधिरितिसंस्कारसाक्षात्करणात्पूर्वजाति
ज्ञानं द्वयेखल्वमीसंस्काराः वासनारूपाः स्मृतिक्लेशहेतवः धर्मा
धर्मरूपाकर्मविपाकहेतवः तेषुसंयमः संस्कारसाक्षात्क्रियायैसमर्थः
तदिर्थंसंस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् परत्राप्येवमेवसंस्कार
साक्षात्करणात्परजातिसंवेदनं वन्धकारणशैथिल्यात्प्रचारसंवेदनाच्चचित्त

गी॰
टी॰वे॰

97

स्यपरशरीरावेशः लोलीभूतस्य मनसोऽप्रतिष्ठस्य शरीरे कर्माशयवशाद्बन्धः
तस्य कर्मणो बंधकारणस्य शैथिल्यं समाधिबलाद्भवति प्रचारसंवेदनं च चि
त्तस्य समाधिजमेव कर्मबंधक्षयात्स्वचित्तसंचारसंवेदनाच्च योगी चित्तं स्वश
रीरान्निष्कृष्य शरीरांतरेषु निक्षिपति निक्षिप्तं चित्तं चेंद्रियाण्यनुपतंति यथा
मधुकरराजं मक्षिका उत्पतंतमनुपतंति निविशमानमनु विविशंते तथेंद्रि
याणि परशरीरावेशे चित्तमनुविशंतीति उदानजयाज्जलपंककंटका
दिष्वसंग उत्क्रांतिश्च समानजयाज्ज्वलनम् श्रोत्राकाशयोः संबंध
संयमाद्दिव्यं श्रोत्रम् कायाकाशयोः संबंधसंयमाल्लघुतूलसमापत्तेश्चा
काशगमनं बहिरकल्पिता वृत्तिर्महाविदेहा शरीराद्बहिः मनसो वृत्तिला
भो विदेहा नाम वृत्तिर्धारणा सा यदि शरीरप्रतिष्ठितस्य मनसो बहिर्वृत्ति
मात्रेण भवति सा कल्पितेत्युच्यते यदा तु शरीरनिरपेक्षा बहिर्भूतस्यैव मन
सो बहिर्वृत्तिः सा अकल्पिता तत्र कल्पितया साधयंत्यकल्पितां महा
विदेहामिति यया परशरीराण्याविशंति योगिनः ततश्च धारणातः प्र
काशात्मनो बुद्धिसत्त्वस्य यदावरणं क्लेशकर्मविपाकत्रयं रजस्तमोमूलं
तस्य क्षयो भवति स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः भूता
नां स्थूलादिषु पंचसु रूपेषु संयमात्तस्य तस्य स्वरूपदर्शने जयश्च प्रादुर्भव
ति तज्जयाद्वत्सानुसारिण्य इव गावोऽस्य संकल्पानुविधायिन्यो भूतप्र
कृतयो भवंति ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च
अणिमादयः प्रसिद्धाः रूपलावण्यबलवज्रसंहननानि कायसंपत् प
कदाबद्धशरीरग्रहणं चेत्येके तद्धर्मानभिघातः पृथिवीमूर्त्या न रुण
द्धि योगिनः शरीरादिक्रियाम् शिलामप्यनुविशंति नापः क्लेदयंति
नाग्निर्दहति न वायुरीरयति परिणामी वहति च अनावरणात्मके
प्याकाशे भवत्यावृतकायः सिद्धानामप्यदृश्यो भवति ग्रहणस्वरूपा
स्मितान्वयार्थवत्त्वसंयमादिंद्रियजयः ततो मनोजवित्वं विकरणभा
वः प्रधानजयश्च कायस्यानुत्तमा गति लाभो मनोजवित्वं विकरणं वि
नैव प्राप्तिः तत्स्वभावः विकरणभावः विदेहानामिंद्रियाणामभिप्रे
तदेशकालविषयापेक्षो वृत्तिलाभः सर्वप्रकृतिविकारवशित्वं प्रधा

नजयः इत्येताभिस्तः सिद्धयो मधुप्रतीका उच्यंते एताश्चकरणानुर
पपंचकजयादयोगिगम्यंते स्फुतं चैतद्विस्तरमार्कंडेये संवादेपयो
गिकिंविलिख्यते इत्थं योगीयताहारः प्राणायामपरायणः जिताश
नैः शनैर्भूमिमारुहेत यथा गृहं प्राह्यादिभ्यो निहत्तानि ग्रहदत्तानियता
त्मभिः प्रत्याह्रियंते योगेन प्रत्याहारस्ततः स्मृतः योगयुक्तः सदायो
गीलध्वाहारोजितेंद्रियः सूक्ष्मासु धारणाः सप्तमूर्धायामूर्धि धारयेत् ।
धरित्रीं धारयेद्योगी योगेथ सौक्ष्म्यं प्रपद्यते आत्मानं मन्यते नह्यतत्कृत्स्नं प्र
जहाति सः तथैवाप्सुरसं सूक्ष्मं तद्रूपं च तेजसि स्पर्शं वायौ तथात
द्वद्विभ्रतस्तस्य धारणाम् व्योम्नः सूक्ष्मप्रवृत्तिं स शब्दं तद्वज्जहाति सः म
नसा सर्वभूतानां मनसाविशते यदि मानसीं धारणां विभ्रन्मनः सौक्ष्म्यं
जहाति सः तद्वद्बुद्धिमशेषाणां सत्वानामेतु योगवित् परित्यजति संप्रा
प्य बुद्धिसौक्ष्म्यमनुत्तमम् एतासां धारणानां तु सप्तानां सौक्ष्म्यमात्म
वान् दृष्ट्वा दृष्ट्वा ततः सिद्धिं त्यक्त्वा त्यक्त्वा परां भजेत् एतान्येव च संधायय
सप्तसूक्ष्माणि पार्थिव भूतादीनां वशीभावः सम्भावत्तस्य जायते इति । २१
विसृष्टप्राणोच प्राणायामेन सर्वतः प्रत्याहारेण चेंद्रियैः वशीकृतैस्त
तः कुर्यात्स्थितं चेतः शुभाश्रये तद्रूपप्रत्ययैकसन्ततिः मान्यनिःस्पृ
हा तद्ध्यानं प्रथमैरंगैः षड्भिर्निष्पाद्यते नृप अयमर्थः ब्रह्मरूपप्रत्ययात्
मिकासंततिः प्रवाहः सा विषयान्तरास्पृष्टा सती ध्यानमित्युच्यते तथा
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् मनसा ध्याननिष्पाद्यं समाध
धिः सोभिधीयते इति ब्रह्मणः कल्पनाहीनं ध्येयध्यानध्यातृभेदशून्य
मिति मुक्ताविव स्वयंप्रकाशो ब्रह्मीभावः शरीरपातोत्तरकालावमुक्ते
र्तिस्ततो वावराङ्गमपत्ते ॥ १९ ॥

अयं श्लोकः अस्यां टीकायां षष्ठाध्याये दिष्टः

रामकंठी टीका

उपक्रमम् ॥ १९ ॥

लासिकी वमराणी टीका

मैर्वन्दनीयचरणोः समदर्शिभिः जीवन्मुक्तैर्विदेहैर्जीवदशायामेवम

र्गः संसारो जन्मापरपर्यायैर्जितो निर्जितः देहपातादूर्ध्वमतिक्रमि तव्य इति किंतु वृक्षत्वम् कैर्येषां साम्ये ब्रह्मणः समभावे मनो मननात्मकमंतःकरणं स्थितं निश्चलीभूतं तत्र हेतुः हि यस्मात् ब्रह्म सर्वत्र समं निर्दोषं उपाधिदोषरहितं च तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिता ब्रह्मभावं प्राप्ता इत्यर्थः गौतमोक्तस्तदोषो ब्रह्मप्राप्तेः सर्वमेव पूर्जत इति सृजकावस्थाश्रवणात् यतो हमो श्रहीयते इत्युपसंहाराः [illegible] तामाह १९ ॥

पंचोलीटीका

ननु अभोज्यान्नास्ते दोषवंतः समासमाभ्यां विषमसमे पूजिता इति स्मृतेरित्याशंक्याह इहैवेति येषां पंडितानां मनः सर्वेषु भूतेषु ब्रह्मणः समभावेन निश्चलीभूतं तैः इहैव अस्मिन्नेव शरीरे सर्गो जन्मजितः वशीकृतः हि यस्मात्समयकं निर्दोषं श्वपाकादिवत्तो मानमपि न दोषरहितं तस्मात्समं ब्रह्म पश्यंतः ब्रह्मणि स्थिताः संसारदोषास्तान्न स्पृशंतीत्यर्थः १९ ॥

रणवीरसमिद्धोधिनी ॥

इहैवेति येषां साम्य उक्तलक्षणे समदर्शित्वे मनः स्थितं तैः पुंभिरिहैव भूमावेव अस्मिन्नेव पुरे सर्गः ब्रह्मदर्पादियोभूतग्रामो जितः ईदृश उत्कृष्टभावि जयस्याव पर्यभावित्व प्रतिपादनार्था हि यतः ब्रह्म धनुर्वेदोक्तो युद्धादिव्यापारः समं साम्येनाचरितं निर्दोषं दोषोत्पादकं न भवतीति तस्मात्ते समदर्शिनो ब्रह्मणि धनुर्वेदप्रतिपाद्ये युद्धे स्थिता इति १९ ॥

मधभाष्य

इहैवेति संन्यासयोगज्ञानानि मिलित्वा अपि पंचमस्याध्यायस्योपोषेण पुनर्योगस्याधिक्यं स्पष्टयति १९ ॥

भाषा अनुवाद

यह सुनि जो सन्देह होय कि विषम मे सम दृष्टि होना ही निषिद्ध है फेरि सव मे सम दृष्टि मनुष्य पण्डित कै से औ गौतम ने कहा है कि विषम मे सम पूजन औ सम मे विषम पूजन करने वाले लोक पर लोक से भ्रष्ट होते हैं इस सङ्का को निवारण करते कहते हैं कि जिन का मन समभाव मे स्थित है उनोने इहांई स्वर्ग जय कर लिया है क्यों कि सर्वत्र समान रूप निर्दोष ब्रह्म परिपूर्ण होरहा है ऐसा जो जानते ते ब्रह्म मे स्थित कहे ब्रह्मरूप निर्दोष हैं और गौतम की बात ज्ञान अवस्था के पहले की है १९

दोहा

इहांहिं जीत्यो भव तिन्हे समता स्थित मन जास ब्रह्म समान
सुनिर्दोष विनसो ताते ब्रह्म वास ॥१९॥

99

नप्रहृष्येत्प्रियंप्राप्य नोद्विजेत्प्राप्यचाप्रियं
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणिस्थितः २०

शांकरभाष्यं

कर्म्मिविषयंच समासमाभ्यामित्यादि इदन्तु सर्वकर्मसंन्यासि
विषयंप्रस्तुतं सर्वकर्माणिमनसेत्यारभ्याध्यायपरिसमाप्तेः यस्मान्नि
र्दोषं समं ब्रह्मात्मा तस्मात्नेति नप्रहृष्येत् नहर्षंकुर्यात्प्रियमिष्टंप्राप्य
लब्ध्वानोद्विजेत् प्राप्यैवचाप्रियमनिष्टं लब्ध्वादेहमात्रात्मदर्शिनोहि प्रियाप्रि
यप्राप्ती हर्षविषादौकुर्वातेन केवलात्मदर्शिनः तस्यप्रियाप्रियप्राप्त्यसंभ
वात् किंचसर्वभूतेष्वेकः समोनिर्दोष आत्मेतिस्थिरानिर्विचिकित्साबुद्धि
र्यस्यसस्थिरबुद्धिरसंमूढः संमोहवर्जितश्चस्यात्यथोक्तब्रह्मवित् ब्रह्मणि
स्थितोऽकर्मकृत् सर्वकर्मसंन्यासीत्यर्थः २०॥

आनंदगिरिकृतटीका

एतच्चनेदंसूत्रंब्रह्मविद्विषयमित्याह कर्म्मीति तत्रैवसूत्रावाधिभवसंभवा
दित्यर्थः ननुयत्रसमत्वदर्शनं तत्रैवविदंसूत्रं नतत्कर्मिणाकर्मिणोवेतिवि
भागोस्ति तत्राहइदंत्विति समत्वदर्शनस्य संन्यासिविषयत्वेन प्रस्तुतत्वे
हेतुमाह सर्वकर्माणीति अध्यायपरिसमाप्तेः सर्वकर्माणीत्यारभ्य त
त्रतत्रसर्वकर्मसंन्यासाभिधानात्तद्विषयमिदं समत्वदर्शनं गम्यते तत्रच
निरहंकारेनिरवकाशंसूत्रमित्यर्थः ननुइष्टानिष्टप्राप्तिभ्यांहर्षाविषादौ
विद्वानपिकुर्वन्निर्दोषेब्रह्मणिकथंस्थितिंलभेतेत्याशंक्याकांतिते इष्टय
नुजनकस्तोकस्यापयति यस्मादिति आत्मतत्त्वनिष्ठावतो विदुषोहर्षवि
षादनिमित्ताभावान्नतावुचितावित्याह स्थिरबुद्धिरिति नचहर्षविषादनि
मित्तत्वंप्रियाप्रिययोः सिद्धमितिकथंतत्यागस्याहर्षोद्वेगौन कर्त्तव्याविति
निषेध्यते तत्राहदेहेति विदुषोपिप्रियाप्रियप्राप्तिसामर्थ्यादेवहर्षविषा
दौ कुर्वाताविन्याशंक्याह नकेवलेति अद्वितीयदर्शनशीलस्य व्यतिरिक्तप्रि
याप्रियप्राप्त्ययोगान्न तन्निमित्तौ हर्षविषादावित्यर्थः इतोपिविदुषोहर्षा

गी॰
टी॰ ५
100

विषादावसंभावितावित्याह किंचेति निर्दोषंब्रह्मणिआश्रितो दृढमति
यतिः संमोहेन हर्षादिहेतुनारहितो यथोक्ते सर्वदोषरहिते ब्रह्मण्यहम
स्मीति विद्यावानशेषदोषशून्ये तस्मिन्नेव ब्रह्मणि स्थितस्तदनुरोधात् क
र्मण्यपमृष्यमाणोनैव हर्षविषादभागी भवितुमलमित्यर्थः २० ॥

स्वामिकृतटीका

ब्रह्मज्ञानस्य फलदशामाह नप्रहृष्येदिति यो ब्रह्मविद्ब्रह्मण्येवस्थितः
सप्रियंप्राप्यनप्रहृष्यति अप्रियंप्राप्यचनोद्विजेत् नचविषीदतीत्यर्थः ।
यतः स्थिरबुद्धिः स्थिरानिश्चलाबुद्धिर्यस्यतत्कुतः यतः असंमूढः निवृत्तमोहः

(margin: नप्रहृष्येदहर्षविवाक्यात्)

पैशाचभाष्यं

यस्मादेवंसमंब्रह्मात्मातस्मात् नप्रहृष्येत् हर्षंनकुर्यात् प्रियमिति इष्टं
प्राप्य नोद्विजेत्प्राप्यचाप्रियमनिष्टंलब्ध्वादेहमात्रात्मदर्शिनो हि प्रियाप्रि
यत्वप्राप्तीहर्षविषादौ कुर्वाते नकेवलात्मदर्शिनस्तस्यप्रियाप्रियप्राप्त्य
संभवात् किंचसर्वभूतेष्वेकः समो निर्दोषआत्मेति स्थिरानिर्विचिकित्सा
बुद्धिर्यस्य सः स्थिरबुद्धिरसंमूढः संमोहवर्जितश्च स्याद्यथोक्तब्रह्मविद्ब्रह्मणिस्थि
तः अकर्मकृत्सर्वकर्मसंन्यासीत्यर्थः २० ॥

रामानुजभाष्यं

येनप्रकारेणावस्थितस्य कर्मयोगिनः समदर्शनरूपोज्ञानविपाको भवति
तंप्रकारमुपदिशति नप्रहृष्येदिति यादृशदेहस्थस्य यदवस्थस्य प्राचीनकर्म
वासनया प्रियंयस्याप्रियंतदुभयंप्राप्य हर्षोद्वेगौ नकुर्यात् कथंस्थिरा
त्मनि बुद्धिर्यस्य सस्थिरबुद्धिः असंमूढः अस्थिरेणशरीरेणस्थिरमात्मान
मेकीकृत्यसंमोहनअसमः नचब्रह्मवित् ब्रह्मणिस्थितः उपदेशेनब्र
ह्मवित्वास्मिन्ब्रह्मण्यभ्यासयुक्तः एतदुक्तंभवति तत्त्वविदामुपदेशादात्
माथात्म्यविन्नैवयतमानो देहाभिमानंपरित्यज्यस्थिरसुखात्मावलोकनप्रि
यानुभावेव्यवस्थितः अस्थिरेप्राकृतप्रियाप्रियेप्राप्यहर्षोद्वेगौनकुर्यादिति

अभिनवगुप्तकृतटीका

तस्यैवैतत्संभावनेत्याह २० नप्रहृष्येदिति प्रियंप्राप्य नोद्विजेत्प्राप्यचाप्रियं

इति यतस्य समदर्शिनि शत्रुमित्रादिविभागोपि व्यवहारमात्रपर्यवसा

स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः २० ॥

परमार्थप्रपा टीका

अथ ब्रह्मणि स्थिरीभूतस्य परीक्षामाह नप्रहृष्येदिति स एव ब्रह्मवित् स च ब्रह्मणि स्थितः यः प्रियं प्राप्य न प्रहृष्येत् तथा अप्रियं प्राप्य न उद्विजेत् उद्वेगं न प्राप्नुयात् अत एव स्थिरबुद्धिरसंमूढः प्रियत्वाप्रियत्वरहितः

२०

वनमाली टीका

अतः परमध्यायशेषेण योगसंन्यासज्ञानानि मेलयित्वा प्रपंचयति तत्रादौ संन्यासं प्रपंचयति नप्रहृष्येदिति आत्मभिन्नं प्रियं प्राप्य न प्रहृष्येत् अप्रियं च प्राप्य नोद्विजेत् तु परमानंदस्वरूपे ब्रह्मणि निमग्नचित्तत्वात् सातात्मतत्वस्यात्मव्यतिरिक्तप्रियाप्रियप्राप्त्ययोगात्तत्तन्निमित्तौ हर्षविषादाविति अर्थः कीदृशः स्थिरबुद्धिः स्थिरा निश्चला संन्यासपूर्वकवेदांतविचारपरिपाकेनासंशयत्वेन सम्यङ्निश्चयरूपा ब्रह्मणि बुद्धिर्यस्य सः अवणमनननिदिध्यासनादिफलप्राप्तेः प्रागिति यावत् असंमूढः निदिध्यासनेन विजातीयप्रत्ययानंतरितसजातीयप्रत्ययप्रवाहरूपेण विपरीतभावनाख्यसंमोहरहितः ततः प्रतिबंधापगमाज्जातेन सत्वोत्तरप्रमाणात् ब्रह्मवित् अनेन ज्ञानलयपरमेश्वरसाक्षात्कारवान् मयाप्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगादिति प्रसादस्य ज्ञानहेतुत्वं वक्ष्यति ततो महाप्रसादयुक्तः आविर्भूतहृदयानंदादिगुणके ब्रह्मणि स्वस्वरूपे स्थितः परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रुतेः जीवन्मुक्तस्य देहस्वाभाविकं ममत्वगणसमदर्शिनादिमहदर्शादिकं त्याज्यमिति भावः २० ॥

ध०

कृष्णवैजयन्ती टीका

आत्मसमदर्शनरूपे ज्ञानपरिपाके स्थितस्य कर्मयोगिनो लक्षणमाह नप्रहृष्येदिति प्राकृतेतिनिरपेदेवमनुष्यादिरूपे वर्तमाने देहे स्थितं मनवपूर्वकर्मवशात् प्रियं प्राकृतं पुत्रमित्रादिरूपं वस्त्रालंकारमिष्टभोजनादिरूपं वा स्वात्मकत्वेन प्राप्य न प्रहृष्येत् हर्षं न प्राप्नुयात् तथा अप्रियं च शत्रु

गी॰
टी॰ पं

प्रियं बालव्याघ्रादिरूपं स्वप्रतिकूलं प्राप्य नोद्विजेत उद्वेगं न प्राप्नुयात् कथमेवं यतः स्थिरबुद्धिः स्वात्मनि स्थिरा यथार्थनिश्चये नाचपला बुद्धिर्यस्य सा यात्मिकाय स्य सतत्र्याथा स्थिरबुद्धिना त्वात्मना स्त्र्यादिकमेष प्रभूतं प्रियमप्रियं च प्राप्यापि हर्षोद्वेगौ न कुर्यादित्यर्थः एवमपि कथं यतोऽसंमूढः मोहरहितः प्राकृतेनात्मि न देहे न सह नित्यमात्मानमेकीकृत्य मोहेन लब्ध इत्यर्थः नन्वेवं कथं यतो ब्रह्मविदा त्मयाथात्म्यस्वरूपज्ञः यतो ब्रह्मणि स्थितस्तस्मिन्नेव ब्रह्मणि आत्मसाम्यरूपे स्थितः सततं संप्रदायसदाचार्योपदेशाद्ब्रह्मविद्भवति ततस्तदुपदिष्टे स्वात्म्ययाथात्म्यस्वरूपे ब्रह्मण्येवावस्थित इत्यर्थः २०॥

१०

यस्मान्निर्दोषं समं ब्रह्म तस्मात्तद्रूपमात्मानं साक्षात्कुर्वन्

मधुसूदनी टीका

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृह इत्यत्र व्याख्यातं पूर्वार्धं जीवन्मुक्तानां स्वाभाविकं चरितमेव मुमुक्षुभिः प्रयत्नपूर्वकमनुष्ठेयमिति वदितुं लिङ्प्रत्ययौ अद्वितीयात्मदर्शनशीलस्य व्यतिरिक्तप्रियाप्रियप्राप्त्ययोगात्तन्निमित्तौ हर्षविषादौ न स्त इत्यर्थः अद्वितीयात्मदर्शनमेव विवृणोति स्थिरबुद्धिः स्थिरा निश्चला संशयशून्यत्वेन निर्विचिकित्सा निश्चिता ब्रह्मणि बुद्धिर्यस्य स तथा लब्धश्रवणमननफल इति यावत् एतादृशस्य सर्वासंभावनाशून्यत्वेऽपि विपरीतभावनाप्रतिबन्धात्साक्षात्कारो नोदेतीति निदिध्यासनमाह असंमूढः निदिध्यासनस्य विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहस्य परिपाकेन विपरीतभावनाख्यसंमोहरहितः ततः सर्वप्रतिबन्धापगमाद्ब्रह्मविद् ब्रह्मसाक्षात्कारवान् ततश्च समाधिपरिपाकेन निर्दोषे समे ब्रह्मण्येव स्थितो नान्यत्रेति ब्रह्मणि स्थितो जीवन्मुक्तः स्थितप्रज्ञ इत्यर्थः एतादृशस्य देहे तद्दर्शनाभावात् प्रहर्षोद्वेगौ न भवत इत्युचितमेव साधकेन तु देहे तद्दर्शने विद्यमानेऽपि विषयदोषदर्शनादिना प्रहर्षविषादौ त्याज्यावित्यभिप्रायः २०

[illegible] ॥

महानंदी टीका

स्वाभाविके हि वर्त्तिते जीवन्मुक्तशरीरिणां समत्वमिरनुष्ठेयमितिव
क्ति हर्षविलिङ्गा १ अद्वैतदर्शिनो भिन्नप्रियादिप्राप्त्ययोगात् नाप्यहर्षः
विषादौ तन्निमित्तकौ भवतः क्वचित् २ स्थिरा वेदान्तवाक्योत्था बुद्धिर्ब्रह्म
णि यस्य सः असंमोहस्थूलो ब्रह्मावबोधवान् ३ ब्रह्म
णि एव स्थितो नित्यं समाधिपरिपाकतः ४ २० ॥

नीलकंठी टीका

न प्रहृष्येदिति यस्मात् निर्दोषं समं ब्रह्म तस्मात् प्रियं पुत्रादिं प्राप्य न
प्रहृष्येत् अप्रियं शत्रुं दुःखं वा प्राप्य नोद्विजेत् बुद्धिस्थितिरभेदेनानुष्ठेये
ति ज्ञापयितुमुभयत्र लिङ्प्रयोगः स्थिरबुद्धिः प्रत्यागद्वैतश्रुतियुक्ति
भ्यां स्थिरीकृतप्रज्ञः असंमूढो ध्यानजमालाकारेण निर्गतमोहः अ
त एव ब्रह्मवित् ब्रह्मभावस्य लब्धा ब्रह्मभावं गत इत्यर्थः ब्रह्मणि एवम
त्यगाहये व्युत्थानावस्थायामपि स्थितः सर्वं ब्रह्मैवेति पश्यन्नित्यर्थः २०

आनन्दी टीका

ब्रह्मस्थितानां लक्षणरूपं

इति — प्रोक्तचतुष्टया ब्रह्मणि स्थितः ब्रह्मवित् अभिज्ञातात्मस्वरूपः असंमू
ढो विगतमिथ्याज्ञानः स्थिरा कर्मोपभोगलयीकृतत्यागबुद्धिर्यस्य
प्रियं ब्राह्मणादिदेहं प्राप्य न प्रहृष्येत् अप्रियं श्वपाकादिदेहं वा प्राप्य नो
द्विजेत् अथवा मात्रास्पर्शास्तु कौन्तेय इत्यादिषु मात्रास्पर्शसहनस्य ला
भी यस्मात्तु गमे स्पष्ट प्रवाधिः २० ॥

रामकंठी टीका

यो ब्रह्मविदागमतो यथोक्तब्रह्मतत्त्ववेदी स्थिरतत्त्वबुद्धिः प्रबलैरपि
विकल्पैरप्रकम्प्यमतिरत एवासंमूढो हि योपादेयवस्तुनोरसक्ति
ग्यबुद्धिः संक्रान्तिं ब्रह्मण्यधिगते ब्रह्मणि परमात्मनि स्थितः सततमा
परिशीलनाद्विश्रान्तः स प्रियाप्रिये प्राप्य हर्षोद्वेगौ विषमदर्शि
त्वप्रिष्ठतो संसारिणो भजते ततो ब्राह्मणगवादिषु पंडिता

गी॰
टी॰ पं॰

समदर्शिनः इत्युक्तम् ईदृशी च ब्रह्मणि स्थितिः सर्वथा बाह्यविषय
परिहारेणैव भवतीति केवलज्ञानवादिनां मतः सा तु वीतक्रोधपद्यान
संभवति कथंचिदा संभवन्नपि सत्फलः इति [illegible]
[illegible]

अथ ब्रह्मभावं प्राप्तस्य लक्षणमाह — ...टीका

यो ह्यागमतो गुरूपदेशतो वा ब्रह्मविद् ब्रह्मतत्त्ववेदी स्थिरबुद्धिः स्थि
रा विकल्पैरविकल्पा बुद्धिर्ब्रह्मबुद्धिर्यस्य सः असंमूढः चेतनः स ब्र
ह्मणि स्थितः सततपरिशीलनाद्ब्रह्मण्येव विश्रान्तः एवंविधो ब्रह्म
वित् प्रियं प्राप्य न हृष्यति अप्रियं प्राप्य न विषीदति स्वभावस्य जडीभूत
स्यापि प्रियाप्रियप्राप्त्या हर्षविषादराहित्यम् तद्ब्राह्मणस्यैव कस्मात् संभू
त इति [illegible] २०॥

पैचोली टीका

ब्रह्मप्राप्तस्य लक्षणमाह ब्रह्मणि स्थितः सर्वकर्मसंन्यासी स्थि
रबुद्धिः स्थिरा बुद्धिर्यस्य सः असंमूढः मोहवर्जितः प्रियं प्राप्य न
प्रहृष्येत् च पुनः अप्रियं प्राप्य नोद्विजेत् २०॥

रमावीरमतिबोधिनी॥

न प्रहृष्येदिति ब्रह्मविद् ब्रह्मवेदनतत्त्वज्ञो ब्रह्मणि तत्परतया पायेषु दे
स्थितः सन् प्रियं प्रीतिपात्रं पुत्रमित्रादिकं प्राप्य न प्रहृष्येत् प्राद्वे
विनो न भवेत् अप्रियं द्वेष्यं च प्राप्य न प्रहृष्येत् प्राद्वे
अप्रियं द्वेष्यं च प्राप्य नोद्विजेत् उद्वेगं भयसंचलनं च न यायात् यतः
स्थिरबुद्धिः दृढनिश्चयो तत एवासंमूढो ऽनलसः क्रियावान्नित्यर्थः
२०॥

मधभाष्य

२०॥

भाषा अनुवाद

अब ब्रह्म भाव प्राप्त पुरुष का लक्षण कहते हैं कि। ब्रह्मज्ञानी होके जो ब्रह्म मे स्थित हैं वे कोई प्रिय वस्तु पाय के हर्षित नहीं होते हैं और अप्रिय प्राप्त होने से भी विषाद नहीं करते हैं क्यों कि वे लोग स्थिर बुद्धि औ मोह रहित हैं २० ॥

दोहा

हर्ष न द्वि प्रिय पायके सोचन अप्रिय पाय स्थिरप्रज्ञा विन मोहमत ब्रह्मवेत्ता ब्रह्मनाय २० ॥

103

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखं
सब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते २१

शांकरभाष्यं

किंचब्रह्मणिस्थितः बाह्येति बाह्यस्पर्शेषु बाह्याश्चतेस्पर्शाश्च बाह्यस्पर्शाः स्पृश्यन्तइतिस्पर्शाः शब्दादयोविषयास्तेषु बाह्यस्पर्शेषु असक्त आत्मान्तःकरणं यस्यसोयमसक्तात्माविषयेषु प्रीतिवर्जितः सविन्दतिलभते आत्मनियत्सुखंतद्विंदतीत्येतत् सब्रह्मयोगयुक्तात्मा ब्रह्मणियोगः समाधिर्ब्रह्मयोगस्तेन ब्रह्मयोगेनयुक्तः समाहितस्तस्मिन् व्यापृत आत्मान्तःकरणंयस्यसब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते प्राप्नोतितस्माद्बाह्यविषयप्रीतेः क्षणिकाया इन्द्रियाणि निवर्तयेदात्मन्यक्षयसुखार्थीत्यर्थः :२१

आनंदगिरिकृतटीका

शब्दादिविषयप्रीतिप्रतिबन्धान्न कस्यचिदपि ब्रह्मणि स्थितिः सिध्येदित्याशंक्याह किंचेति नकेवलं पूर्वोक्तरीत्याब्रह्मणिस्थितो हर्षविषादरहितः । किन्तुविषयान्तरेणापीत्यर्थः यावद्यावद्विषयेषु रागरूपमावरणं निवर्तते तावत्तावदात्मस्वरूपसुखमभिव्यक्तं भवतीत्याह बाह्येति नकेवलमसक्तात्मा शमवशादेवसुखंविंदते किन्तुब्रह्मसमाधिना समाहितान्तःकरणः सुखमनन्तंव्याप्नोतीत्याह सब्रह्मेति तत्रपूर्वार्धंव्याचष्टे बाह्येति समाधानतायोनेसमग्रज्ञानद्वारा निरतिशयसुखप्राप्तिमनन्तरार्धंव्याख्यातेन कथयति ब्रह्मणीत्यादिना शब्दादिविषयविमुखस्यानन्तसुखाभिसंभवात्तदर्थिना प्रयत्नेन विषयवैमुख्यं कर्तव्यमिति शिष्यशिक्षार्थमाह तस्मादिति २१ ॥ इति

स्वामिकृतटीका

मोहनिवृत्त्याब्रह्मस्थैर्यहेतुमाह बाह्यस्पर्शेष्विति इंद्रियैःस्पृश्यंतेइतिस्पर्शा विषयाः बाह्येंद्रियविषयेषु असक्तात्मा अनासक्तचित्तः आत्मन्यंतःकरणेयदुपशमात्मकं सुखंतद्विंदतिलभते सचोपशमसुखंलब्ध्वाब्रह्मणियोगेनसमाधिनायुक्तः ... अक्षयंसुखमश्नुतेप्राप्नोति ... २१ ॥
विषयभोगानामपिनिवृत्तेःकथंमोक्षहेतुःस्यादित्याह

गी॰
टी॰पं॰

104

शांकरभाष्यं

किंच ब्रह्मणि स्थितः ब्रह्मेति बाह्यस्पर्शेषु बाह्याश्च ते स्पर्शाश्च स्पृश्यन्त इति स्पर्शाः शब्दादयो विषयास्तेषु बाह्यस्पर्शेषु असक्तात्मा अन्तःकरणं यस्य सोऽयमसक्तात्मा विषयेषु प्रीतिवर्जितः सन् विंदति लभते आत्मनि यत्सुखं तद्विंदतीत्येतत् स ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगः समाधिर्ब्रह्म[illegible]योगस्तेन युक्तमंतःकरणं यस्य स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते प्राप्नो[illegible]ति तस्मात् बाह्यविषयेषु प्रीतेः क्षणिकाया इंद्रियाणि निवर्तयेत् २१॥

रामानुजभाष्यं

१४:

बाह्यस्पर्शेष्विति एवमुक्तेन प्रकारेण बाह्यस्पर्शेष्वात्मव्यतिरिक्तविषयानुभवेष्वसक्तमना अन्तरात्मन्येव यः सुखं विंदति लभते स प्रकृत्याभ्यासं विहाय ब्रह्मयोगयुक्तात्मा ब्रह्माभ्यासयुक्तमना ब्रह्मानुभवरूपमक्षयं सुखं प्राप्नोति २१॥

अभिनवगुप्तकृतटीका

स्पष्टार्थम्

बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि य[illegible] स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते २१ [illegible] बाह्यस्पर्शे[illegible] निवर्तयेत् [illegible] २१

परमार्थप्रपा टीका

अथ बहिरिंद्रियहेतुमाह बाह्येति बहिरिंद्रियैः स्पृश्यन्त इति स्पर्शाः बाह्येंद्रियविषयास्तेषु असक्त आत्मा मनो यस्य स[illegible]तथाभूतः आत्मस्थितः करणोऽपशमात्मकं यत्सुखं विंदति प्राप्नोतीति तेन ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगेन समाधिना युक्तस्तदैकाग्र्यमात्मा यस्य सः अक्षयं निरतिशयं सुखमश्नुते प्राप्नोति २१।

वनमाली टीका

ननु बाह्यविषयस्यानेकजन्मानुभूतत्वेन प्रबलतानतरां सक्तचित्तस्य कथमलौकिके ब्रह्मणि चित्तस्थितिं तत्राह बाह्येति इंद्रियैः स्पृश्यन्त इति स्पर्शाः शब्दादयः ते चैते बाह्याः अनात्मधर्मत्वात् तेष्वसक्तात्माऽनासक्तचित्तः ।

आत्मनि स्वस्मिन्निद्रियान्तःकरणादिविक्षेपाभावात् समाधौ ... वभि
व्यक्तत्वात् कालिकं यत्सुखं विंदति ब्रह्मयोगः ब्रह्मणा योगो ब्रह्मसंबंधस्तेन
न युक्त आत्मा स्वरूपं यस्य ब्रह्मणि योगस्तेन या धारावद्विच्छिन्नापगतोऽन्तः
करणवृत्तिस्तया युक्त आत्मा चित्तं यस्य स करणादीन्द्रियादिविक्षेपाभावद्
दृश्यायां करणवृत्तिकरणविस्फुरति तदेवाक्षयं नित्यं तावदनवरतमेनि
ष्कते से नैव स्वरूपं मते न तानेन स्वयोग्यतया पूर्णानंदमनुभवतीत्यर्थः
तस्मादात्मीयानंदस्वरूपानुभवार्थी मनो बाह्यविषयप्रीतेः क्षणिकायाम
हानरकान्तवंमित्याः सकारणादीन्द्रियाणि निवर्तयेत्तावतैव ब्रह्मणि स्थि
तिर्भवतीति भावः २१॥

ऊसमवैजयन्तीटीका

एवंभूतस्य किं स्यादित्यपेक्षायामाह बाह्यस्पर्शेष्विति उक्तप्रकारे
णायं बाह्यस्पर्शेषु प्राकृतविषयानुभवेषु असक्तात्मा निर्लिप्तमनाः
आत्मनि अंतरात्मन्येव यत्सुखं स्वस्वरूपानुभवरूपं विंदति लभते स ब्रह्म
योगयुक्तात्मा ब्रह्मणि परमेश्वरे योगः समाधिस्तस्मिन्युक्तः प्रकृत्या
भ्यासेन युक्तात्मा मनो यस्य सततया महत्या भ्यासेन युक्तात्मा ब्रह्मस
माधियुक्तमनाः सन्नक्षयमविनाशि महदनुभवरूपं सुखं तदेशुतेलभते

२१

+नेत्रबाह्यविषयप्रीतेरनेकजन्माद्य

मधुसूदनीटीका

+इंद्रियैः स्पृश्यन्त इति स्पर्शाः शब्दादयः ते च बाह्या अनात्मधर्मत्वात् तेषु
असक्तात्मा अनासक्तचित्तस्तस्माद्ब्रह्मतया विरक्तः सन् आत्मन्यन्तःकरण
एव बाह्यविषयनिरपेक्षं यदुपशमात्मकं सुखं तद्विंदति लभते निर्मलसत्व
हत्वा तदुक्तं भारते यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षय
सुखस्यैते नार्हतः षोडशीं कलामिति अथवा आत्मन्यात्मनि त्वंपदार्थे यत्
स्वं स्वरूपभूतं सुखमावृतमयमानं बाह्यविषयासक्तिप्रतिबंधाद्वलभ्यमानेन
दैवतरमावालभते न केवलं त्वंपदार्थसुखमेव लभते किंतु तत्पदार्थैक्या
नुभवेनपूर्वं सुखमपीत्याह सतस्मात्पूर्वः ब्रह्मणि परमात्मनि योगः स
माधिः तेन युक्तं तस्मिन् व्यापृतः आत्मा अन्तःकरणं यस्य स ब्रह्मयोगयुक्ता
त्मा अथवा ब्रह्मणि तत्पदार्थे योगेन वाक्यार्थानुभवरूपेण समाधिनायु
क्तः ऐक्यं प्राप्त आत्मा त्वंपदार्थः स्वरूपं यस्य स तथा सुखमक्षयमनंतेन स्वस्व

भूतत्वेनातिप्रबलत्वात्तदासक्तचित्तस्य कथमलौ
किके ब्रह्मणि दृष्टसर्वंत्व
त्वर्हिते स्थितिस्यात्तच्च ब्र
ह्मणि परमानंदत्वात्तत्र स्थि
तिस्यादिति वाच्यं तदानंद
स्यानुभूतचरत्वेन चित्त
स्थितिहेतुत्वाभावात् तदुक्तं
वार्तिके आत्मानंदः प्रा
तःसाक्षात्मानेनाविषयीकृ
तः दृष्टानंदाभिलाषं सन्नमंद
करोत्यफलमिति तत्राह +

गी॰
टी॰पं॰

105

एवम्भूतमस्पृतेव्याप्नोतिस्वात्मभवरूपएवसर्वदाभवतीत्यर्थः । नि
त्येपिवस्तुनिस्वविद्यानिहत्यभिप्रायेणाथात्वर्थयोगऔपचारिकः । न
स्यात्मस्वरूपस्वात्मानुभवार्थीमन्नबाह्यविषयप्रीतेः । ह्लादि
कायामहानरकंतुवेपित्याः सकामप्रार्द्धिंद्रियाणिनिवर्तयेत्वा
वतैवब्रह्मणिस्थितिर्भवतीत्यभिप्रायः ॥२॥

॥

सदानन्दी टीका

अनात्मव्यासक्त्याभोगप्रीतिंवलवतीकथं त्यक्त्वाब्रह्मतत्पवस्थानं
संभवेदितिचेदाह । १ बाह्याः स्पर्शयोभोगाजन्यमीविनश्वराः
तेष्वनासक्तचित्तः सन्विरक्तःशुद्धमानसः २ योनिरूपैसर्वबा
ह्यभोगान्कालोविहायसत् लभतेसत्ववृत्त्यासोत्तरंतेतमहत्सुखे
पच्चकामसर्वलोकेयवुद्धिर्ब्रह्मसात्सुखे तस्मात्स्वयसुखमेते
नार्हतः षोडशीकला ४ यद्वायत्वेपरार्थेचसप्तोभागतमपी
हितं प्रतिवंधात्तलभ्यंतत्तदभावाच्चलभ्यते ५ ब्रह्मत्वेपका
ग्रसंयतंवित्तंयस्यचतत्कृतं तत्परार्थेवायोगः समाधि
नेचैकता ६ गतस्त्वमोपिलव्धोर्थोयस्यसोत्तनेतमव्ययं स
स्वरूपसुखेसम्यग्व्याप्नोत्यात्मस्वरूपतः ७ नित्येपिवस्तुनि
प्रीतिर्नाग्राभिप्रायतस्तथा औपचारिकधात्वर्थयोगोत्तीह
नवस्तुनः ८ बाह्यभोगकृविंतस्कामसर्वानर्थाकरीत्रये
नित्यानंदैकतांप्रासंयतूव्याप्येयश्चादरात् यत्प्रादपश्यमकंद
रसानुभूतिप्रामाविलासमत्तस्वात्मानुभवेनत्तमाः पौरंदरीश्रिय
मयोवराणामधीरान्निष्टंतियत्रमहरिः प्रारणंममास्तु ९ २

नीलकंठी टीका

नन्वनित्यानुभूतात्मसुखेष्वप्यात्रमिदंबाह्यं सुखंत्यक्त्वा

मतो न प्रहृष्येदित्यसंगतमत आह बाह्येति बहिर्भवाः बाह्याः स्प
र्शा विषयैरिंद्रियसंबंधास्तेषु असक्तात्मा अनासक्तचित्तः सन् आत्म
नि प्रत्यगात्मन्यात्मवेदसमाधिकालेपि नायत्सुखं विंदति लभते सतदेव
सुखं विधेयापेतं मुख्यैकसत्तत्सुखं यो ब्रह्मयोगे ब्रह्मणि योगः समा
धिस्तद्युक्तो यो जित आत्मा बुद्धिर्येन सः ब्रह्मयोगयुक्तात्मा ब्रह्मविदि
त्यर्थः ब्रह्मविद्ब्रह्मैव भवतीतिश्रुतेः ब्रह्मयोगयुक्तात्मानं देवसुखं
विंदतीति वक्तव्ये ब्रह्मविदेव तत्सुखमिति तस्य सुखाभिन्नत्वविवक्ष
याऽऽदसमुक्तं नन्वभयत्रापकमेव सुखं चेत्कः समसमाधिस्थयोर्विशेष
इत्याशंक्याह सुखमिति अक्षयं सुखं मोक्षः तं अश्नुते व्याप्नोति द्वैता
दर्शनस्य तुल्यत्वाऽभयत्रैकमेव सुखं तथापि योगी मूलाविद्यायानष्ट
त्वादत्यंतसुखमश्नुते न समः अविद्यानुच्छेदात् तथा च मोक्षसुखस्य
सुखं व्यस्याप्यनुभूतत्वान तदर्थं वाक्यं सुखं सत्यजमित्यर्थः २१ ॥

आनंदीटीका

यत्सुखं सुखशब्दवाच्यं मनसोनुकूलवेदनीयमस्ति तत्सुखं बाह्या
बाह्येंद्रियग्राह्यास्पर्शाः शब्दादयो विषयास्तेष्वसक्त आत्मा यस्य
सः योगसिद्ध्यर्थं यमनियमसेवी स्वयमेव विंदते सः ब्रह्मणि
योगेन संयमाभ्यासेन चित्तवृत्तिनिरोधेन युक्तो योजित आत्मा येन सः
अव्ययमक्षयं सुखं मोक्षमश्नुते २१ [illegible]

रामकंठीटीका

[शास्त्रविहितविषयनिष्ठैव ब्रह्मणि स्थिति] [निर्विघ्नत्वेति मुमुक्षूपपन्नमेव निर्वा]
[र्यितमाह] आत्मनि परस्मिन्नत्वे स्वभावसिद्धं यत्सुखं नित्यानंदलक्षणं यमस्त
ह्यास्पर्शेष्विंद्रियार्थेषु शब्दादिष्वविरक्तेषु सक्तात्मा सम्यग्ज्ञानवशा
दात्मैवानिष्टत्वे सत्यनिमग्नांतःकरणो योगी विंदत्युपलभते संयोगा
युक्तात्मा योगिकर्मसमाधौ युक्तात्मा ज्ञाननिष्ठतया नित्यनिमग्नांतःक
रणः सुखमक्षयं सन्नाव्ययमविच्छिन्नं कृत्वा ब्रह्मपरमकरणमश्नुते [illegible]

गी॰
टी॰ पं॰
स्याद्योकस्याधिकृतमित्य तआह ॥

[illegible] २१ ॥

नन्वीदृश्यां ब्रह्मभावाव नामिकी [illegible] टीका

योयोगीवाह्यस्पर्शेषु इन्द्रियार्थेषु विषयेष्वसक्तात्मा आत्मैकवि
षक्तयानिमग्नांतःकरणः आत्मनिप्रत्यगात्मनियदनिर्वाच्यं सुखं
मानंदं विंदत्युपलभ्यते सएवयोगयुक्तात्मायोगे कर्मसमाधौ युक्ता
त्मावहितांतःकरणः सुखमक्षेणानाभ्यामनातरन्तमेनात्क्षयमव्ययं
ब्रह्मपरमकारणमश्नुते स्वात्मतयाव्याप्नोति अथवाक्षयं सुखमिति
ब्रह्मविशेषणम् [illegible]
[illegible] ॥

पंचोलीटीका

मोहनिहत्याबुद्धिस्थैर्यमाह वाह्यस्पर्शेषुविषयेष्वसक्तात्मा प्री
तिमनाः आत्मनिब्रह्मणियत्सुखंपरमानंदलक्षणं विंदतिलभते
सब्रह्मयोगयुक्तात्मापरंब्रह्मणिसमाधियुक्तस्तैकंप्राप्तआत्माय
स्यसः सर्वतोव्याहृतचित्तः अक्षयंसुखमश्नुते प्राप्नोति २१ ॥

रत्नबीरसमिद्धोधिनी ॥

बाह्यस्पर्शेष्विति बाह्याः श्रुत्रमित्रादयस्तेषुस्पर्शाः रागाद्यात्मकाः
संबंधास्तेषु नसक्तआत्मामनोयस्यसकर्मयोगीतत्सुखं विंदति
आत्मनि परमात्मनियत्सुखंविद्यते इतिशेषः ब्रह्मसायुज्यप्राप्ते
र्ब्रह्मसुखाभिन्नेसुखंतस्याव्यभिचारीतिभावः यत्तदेवहि ब्रह्मं
वहमितिन्यायाद्रूपयितंपुनरपिविवृणोतिसब्रह्मेति सच ब्रह्म
णि यत्तु वेदप्रतिपाद्येयुद्धेयोयोगः मद्भक्तिस्तेनयुक्तः समाहितआ
त्मामनोयस्यसतादृशः अक्षयंप्राक्तनसुखंब्रह्मसायुज्यलक्षण
मश्नुते व्याप्नोति यद्वा आत्मनिस्वात्मनि शुद्धादिव्यापारलक्षणं प्र
यत्नेकृतेसति सप्तवीर्यलक्षणः कर्मयोगी यत्सुखं विंदते लभते

कीदृशो बाह्यस्पर्शेष्वबाह्येषु शब्दादिविषयेषु स्पर्शा इंद्रि
यसन्निकर्षणोत्पन्नाद्रागादयस्तेष्वसक्तः आत्मा मनो यस्ये
ति सत्यपींद्रियार्थसन्निकर्षे प्रोक्तलक्षणैरागाद्यैः प्रहत्यंत
रायभूतैरगृहीतांतःकरण इत्यर्थः तदेव नित्यं सुखं ब्रह्मयो
गयुक्तात्मा ब्रह्मणा परमात्मना सह यो योगो योजनमेकीभा
वस्तत्र युक्तः समाहित आत्मांतःकरणं यस्य सोऽष्टांगयोगारू
ढोऽश्नुते व्याप्नोति ब्रह्मयोगी यत्सुखमश्नुते तदेव कर्मयोगी
ति वक्तव्ये तयोक्तिः कर्मयोगिनो ब्रह्मयोगिनः सकाशाद्वैशि
ष्ट्यप्रतिपादनार्था वैशिष्ट्यं चात्र कर्मयोगस्य सकरत्वेन संभवा
दैहिकामुष्मिकोभयभोगसंभवाच्चेति ध्येयं २१॥

अथभाष्य

बाह्यस्पर्शेष्विति कामरहित आत्मनि यत्सुखं विंदति स एव
ब्रह्मयोगयुक्तात्मा चेत देवाक्षयं सुखं विंदति ब्रह्मविषयो
योगो ब्रह्मयोगः ध्यानादियुक्तस्येवात्मसुखमक्षयं अन्य
थानेत्यर्थः संन्यासार्थं कामभोगानिंदयति २१॥

107

भाषा अनुवाद

मोह निवृत्त मात्र होने से बुद्धि स्थिर होती इस का हेतु कहते हैं कि बाह्य इन्द्रियों के विषय मे अनाशक्त चित्त पुरुष अपने अन्तःकरण मे विक्षेप रहित शांति युक्त जो सात्विक सुख सो अनुभव करते और वही पुरुष शांति सुख प्राप्त होके ब्रह्मयोगयुक्त आत्मा करके समाधिके द्वारा परमात्मा के साथ एकता प्राप्तिरूप जो अक्षय सुख सो भी लाभ करते हैं २१

दोहा

बाह्यविषयनसक्तमन प्रामआत्मसुखजोय सोब्रह्मयोग
युक्तमन अक्षयसुखतिहहोय २१ ॥

108

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः २२

शाङ्करभाष्यं

इतश्च निवर्तयेत् ये हीति ये हि यस्मात् संस्पर्शजा विषयेन्द्रियसंस्पर्शेभ्यो
जाता भोगा भुक्तयो दुःखयोनय एव तेऽविद्याकृतत्वात् दृश्यन्ते ह्याध्यात्
मिकादीनि दुःखानि तन्निमित्तान्येव यथेहलोके तथा परलोकेऽपीति गम्य
ते एवशब्दान्न संसारे सुखस्य गंधमात्रमप्यस्तीति बुद्ध्वा विषयमृगतृष्णिका
यो इंद्रियाणि निवर्तयेन्न केवलं दुःखयोनय आद्यन्तवन्तश्च आदिर्विषये
न्द्रियसंयोगो भोगानामन्तश्च तद्वियोग एवात आद्यन्तवन्तोऽनित्या मध्यक्षणभा
वित्वादित्यर्थः कौंतेय न तेषु रमते बुधो भोगेषु विवेकी अवगतपरमार्थतत्त्वो
ऽत्यन्तमूढानामेव हि विषयेषु रतिर्दृश्यते यथा पशुप्रभृतीनां २२

आनन्दगिरिकृतटीका

तत्रैव हेत्वन्तरपरत्वेनोत्तरश्लोकमवतारयति इतश्चेति विषयेभ्यः सकाशा
दिन्द्रियाणीति शेषः वैराग्यार्थमेव वैषयिकानि सुखानि दूषयति ये हीति
ननु विषयेंद्रियसंप्रयोगसंभूतेषु भोगेषु जन्तूनामभिरतिदर्शनात्कुतस्ते
षां दुःखयोनित्वमित्याशंक्याविवेकिनां तेषां संगेऽपि न विवेकिनामित्याह
आद्यन्तवन्त इति यस्मादाधिव्याधिजरामरणादिसहितेभ्यः समागमनादि
क्षणाद्यन्तभाविभ्यश्च विषयेंद्रियसंबंधेभ्यो भोगाः सुखलवानुभवा जायन्ते
तस्मात्ते दुःखहेतवो भवन्तीति योजना अविद्याकार्यत्वाद्दुःखानां कुतो भोग
जन्यत्वमित्याशंक्य भोगानामविद्याप्रयुक्तत्वात्तन्निबन्धनत्वं दुःखानां युक्त
मित्यभिप्रेत्याह अविद्येति भोगानां दुःखयोनित्वे मानमनुभवमुपन्यस्यति
दृश्यन्ते हीति ऐहिकानां भोगानां दुःखनिमित्तत्वेऽपि नामुष्मिकाणां न
तथात्वमनुभवाभावादित्याशंक्यावधारणसामर्थ्यसिद्धमर्थमाह यथेति
एवकारस्य तात्पर्यमुक्त्वा तात्पर्यार्थमाह नेत्यादिना इतश्च विषयेभ्यः सका

घ्राणादीन्द्रियाणि निवर्तयितव्यानीत्याह नकेवलमिति आद्यन्तवत्त्वेन मध्यक्षणवर्तित्वेन क्षणभङ्गुरत्वाद् उपलक्षणीयत्वे भोगानां सिध्यति अपि हि तेषां क्षणभङ्गुरत्वे क्षणिकविषयाकारमनोवृत्तित्वं रागादिमत्वात्: सन्नाह अत इति बुद्धिपूर्वकारिणां विवेकवतां भोगेषु द्वेषोपलब्धेश्च । तेषामाभासत्वे प्रमाणभातीत्याह न तेष्विति प्रतीकोपादानमात्रमिदं दुर्व्याख्यानमिति न पुनरुक्तिः ननु केषांचिद् भोगेष्वभिरुचिरुपलभ्यते तत्राह अपन्नेति २२ ॥

ननु प्रियविषयभोगानामपि निह

स्वामिकृतटीका

न्तेः कथं मोक्षः पुरुषार्थः स्या तत्राह- येहीति संस्पृश्यन्त इति संस्पर्शा विषयास्तेभ्यो जाता ये भोगाः सुखानि ते वर्तमानकालेऽपि स्पर्धासूयादिव्याप्तत्वात् दुःखस्यैव योनयः कारणभूताः तथा आदिमन्तोऽन्तवन्तश्चातो विवेकी तेषु न रमते २२

पिशाचभाष्यं ६ पं

ये हि संस्पर्शजा भोगा ये हि यस्मात् संस्पर्शजाः विषयेन्द्रियसंस्पर्शेभ्यो जाता भोगा भुक्तयः दुःखयोनय एव ते अविद्याकृतत्वात् दृश्यन्ते ह्याध्यात्मिकानि दुःखानि तन्निमित्तान्येव यथेहलोके तथा परलोकेऽपीति गम्यते एवशब्दात् संसारे सुखस्य गन्धमात्रमप्यस्तीति बुद्ध्वा विषयमृगतृष्णिकायां इन्द्रियाणि निवर्तयेत् न केवलं दुःखयोनयः आद्यन्तवन्तश्च आदिर्विषयेन्द्रियसंयोगो भोगानामन्तश्च तद्वियोगभावः अत आद्यन्तवन्तः अनित्या मध्यक्षणभावित्वादित्यर्थः कौन्तेय न तेषु रमते बुधो विवेकी अवगतपरमार्थतत्त्वः अत्यन्तमूढानामेव विषयेषु रतिर्दृश्यते यथा पशुप्रभृतीनां २२

रामानुजभाष्यं

प्रकृतस्य बाह्यस्पर्शस्य स्वरूपज्ञतामाह येहीति विषयेन्द्रियस्पर्शजा ये भोगाः दुःखयोनयस्ते दुःखोदर्का आद्यन्तवन्तः अल्पकालवर्तिन उपलभ्यन्ते न तेषु आत्मविद्रमते । २२

अभिनवगुप्तकृतटीका

बाह्यस्पर्शो विषयात्मनि सक्तिर्यस्य नास्ति स तत्त्वं मन्यत इत्याह

बुधः सएवं भावयति वाह्यविषयभोगाः सर्वे दुःखकारणरूपाः
तथाविधाश्चानित्याः २२

परमार्थप्रपाटीका

अथैतदेव स्पष्टयन्नुपदेशं नारदादिनाह येहीति सम्यक्स्पृशंतीति
संस्पर्शा विषयास्तेभ्यो जाता ये भोगा विषयसुखभोगास्ते दुःखयोनयए
वः दुःखकारणभूताः परिणतिविरसत्वात् यद्वा दुःखं योनिः कारणं ये
षांते अर्जनेपि दुःखरूपत्वादतएव आद्यंतवंतउत्पत्तिनाशधर्मकत्वात्तदुः
खरूपाएव अतस्तेषु बुधो ज्ञाता न रमते विषसंपृक्तान्नवत्त्यजति तदुक्तं
लोकपक्षविषया यावत्स्वजने दुःखगर्भमपि मन्यते सर्वं आमिषं वडिशगभ
मध्यहो मोहतो रमति यद्वदंदरज इति २२

वनमालीटीका

बाह्यविषयप्रीतिनिवृत्तावात्मान्वयसुखानुभवस्तस्मिन्सति महानंदा
नुभवेन तदानंदे प्रीतिनिवृत्तिरित्याशयो नान्याश्रयात् कथं स्वरूपानंदानुभ
व इत्याशंक्य विषयदोषदर्शनाभ्यासादेव तत्प्रीतिर्भवतीत्याशयेनाह
येहीति हि यतः ये संस्पर्शजा विषयेंद्रियसंबंधजा भोगाः तत्सुखानु
भवाः स्रग्वनितारागद्वेषादिव्याप्तत्वात् दुःखयोनय एव ते सर्वेपि ब्रह्म
लोकपर्यंतं दुःखहेतव एव यावतः कुरुते जंतुः संबंधान्मनसः प्रि
यान् तावंतोस्य निखन्यंते हृदये शोकशंकव इति श्रीवैसवोक्तेः यतआ
शाश्रपि न स्थिराः किंत्वाद्यंतवंतः आदिर्विषयेंद्रियसंयोगोंतश्च तद्वियो
गस्तौ विद्यंते येषां ते अतस्तेषु बुधो विवेकी न रमते परिणामतापसंस्
कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति श्रीपतंजलि
नाप्युक्तं तस्मात्सारस्वर्गयोस्तीति बुद्धा ततः सर्वाणींद्रियाणि निवर्तये
दितिभावः २२

उहमवैजयन्तीटीका

ननु बाह्यस्पर्शेष्वसक्तिः स्यात् तत्सर्वं विहाय मनस्तेषु नासक्तिं क
थं कुर्यादित्याशंक्याते दुःखादिदर्शनात् विवेकिनो मनो न रमते इत्या
ह येहीति हे कौंतेय यतएव स्थितास्त्वाः पुत्रहीनस्य प्रापकाः येपि संस्पर्शजाः

विषयेंद्रियसंयोगाजन्या भोगाः स्वाभावानिभवंतितेसर्वेपिदुःखयोन
यएवदुःखहेतवएवस्युः नतुसर्वेस्वत्वनायस्योपिसंस्पर्शजान्भोगान्दुः
खंमित्यदितेदुःखयोनयस्वादिस्वान्नात्ययः सर्वेजनानात्मनेतिमा कथंदुः
खंमित्येतिचेत्तत्राह आद्यन्तवंतः अन्त्यकालवर्तिनः तेषांभोगानांस्व
रूपतेपिस्वल्पकालवर्तित्वात्दुःखयोनित्वमेवसत्त्वनादिषुयोबुधः
नित्यानित्यवस्तुनिर्णयकुशलः आत्मयाथात्म्यस्वरूपज्ञः सतेषुभोगेषु
नरमते आसक्तिंनकरोतियेनवनात्मस्वदेहादिष्वात्माभिमानवंतस्त
एवतेषुरमंतइत्यर्थः २२ ॥+ नतुबाह्यविषयप्रीतिनिहृत्तावात्मन्यत्वयस्तुबोधम
वतिसिंधुसति तत्प्रसादादेवबाह्य न राश्रयवशात्रेकमपि सिद्धे दिन्यांशका

अथ सरस्वती टीका

विषयप्रीतिनिहृत्तिरितीतो विषयदोषदर्शनाभ्यासेनेवा

+हियस्मात्येसंस्पर्शजाविषयेंद्रियसंस्पर्शजाभोगाः क्षुद्रसुखलवानु
भवाः इहवापरत्रवारागद्वेषादिव्याप्तत्वेनदुःखयोनयएवते तेसर्वेपि
ब्रह्मलोकपर्यंतंदुःखहेतवएव तदुक्तंविष्णुपुराणे यावतःकुरुतेजंतुःसं
बंधान्मनसःप्रियान् तावंतोस्यनिखन्यंतेहृदयेशोकशंकवइति प
तादृशाअपिनस्थिराः किंत्वाद्यंतवंतः आदिर्विषयेंद्रियसंयोगोंतस्त
द्वियोगस्तद्वंतोविपतेयेषांतेपूर्वापरयोरसत्त्वात्मध्येस्वप्नवदाविर्भूताः
क्षणिकामिथ्याभूता तदुक्तंगौडपादाचार्यैः आदावंतेचयन्नास्तिवर्त
मानेपितत्तथेति यस्मादेवंतस्मात्तेषुबुधोविवेकीनरमतेप्रतिकूलवे
दनीयत्वात्प्रीतिमनुभवति तदुक्तंभगवतापतंजलिना परिणामता
पसंस्कारदुःखैर्गुणवृत्तिविरोधाच्चदुःखमेवसर्वंविवेकिनइति सर्वम
पिविषयसुखंदृष्टमानुश्रविकंवादुःखमेवप्रतिकूलवेदनीयत्वा
द्विवेकिनः परिज्ञातक्लेशादिस्वरूपस्यनत्वविवेकिनः अक्षिपात्रक
ल्पोहिविद्वानत्यल्पदुःखलेशेनाप्युद्विजते यथोर्णातंतुरतिसुकुमा
रोप्यक्षिपात्रेन्यस्तःस्पर्शेनदुःखयतिनेतरेषुगात्रेषु तद्वद्विवेकिनएव
क्षा नविद्वांस्तदुःखेनस्पृश्यवद्दुःखदुःखैःखमविभोगसाधनेकालत्रयेपि
नेत्रपरिणामतापसंस्कारदुःखैरिति भूतवर्तमानभविष्यत्का
लेपिदुःखानुविद्धत्वात्पापिकंदुःखंतद्विषयसुखस्योक्तं शाह

।निहृत्तिभवतीतिपरि
हारमाह+

^ विशेषसुखस्योक्तं

तिविरोधाच्चृत्त्येनेन स्वरूपतो दुःखत्वं तत्र परिणामदुःखता पश्च संस्कार ।
ख्यत एव दुःखानि नैनेत्यर्थः इत्थंभूतलक्षणे तृतीया तथाहि रागानुवि
द्ध एव सर्वोपि सुखानुभवः नहि तत्र न रज्यति तेन सुखी चेति संभवति
राग एव ... र्द्धमुद्भूताः सन् विषयप्राप्त्या सुखरूपेण परिणमते तस्य च
प्रतिक्षणं वर्धमानत्वेन स्वविषयाप्राप्तिनिबंधन दुःखस्यापरिहार्यत्वात्
दुःखरूपतैव यद्यपि भोगेष्विंद्रियाणामुपशान्तिः परितृप्तत्वात् सुखं
यालौल्यादनुपशान्तिस्तद्दुःखं न चेंद्रियाणां भोगाभ्यासेन वैतृष्ण्यं कर्तुं ।
शक्यं यतो भोगाभ्यासमनु विवर्धन्ते रागाः कौशलानि चेंद्रियाणामिति
स्म न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भू
य एवाभिवर्धत इति तस्माद्दुःखात्मकरागपरिणामत्वाद्विषयसुखमपि
दुःखमेव कार्यकारणयोरभेदादिति परिणामदुःखत्वं तथा सुखानुभव
काले तत्प्रतिकूलानि दुःखसाधनानि द्वेष्टि नानुपहत्य भूतान्युपभोगः
संभवतीति भूतानि च हिनस्ति द्वेषश्च सर्वाणि दुःखसाधनानि मम माभूव
न्निति संकल्पविशेषः न च तानि सर्वाणि कश्चिदपि परिहर्तुं शक्नोति
अतः सुखानुभवकालेपि तत्र परिपंथिने प्रतिद्वेषस्य सर्वदैवावस्थि
तत्वात्तापदुःखं द्वेषपरिहारश्चैव तापो हि द्वेषः एवं च दुःखसाधनानि
परिहर्तुमशक्नो मुह्यतीति चेति मोहदुःखतापि व्याख्येया तथा चोक्तं
योगभाष्यकारैः सर्वस्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधीनस्ता ।
पानुभव इति तत्रास्ति द्वेषजः कर्माशयः सुखसाधनानि दुःखसाध
नानि च निवर्तयमानः प्रार्थयमानश्चेष्टते कायेन वाचा मनसा च प
रिस्पंदते ततः परमनुगृह्णाति उपहंति चेति परानुग्रहपीडाभ्यां धर्माधर्मावु
पचिनोति स कर्माशयो लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते
तथा वर्तमानः सुखानुभवः स्वविनाशकाले संस्कारमाधत्ते स च स्मृ
त्वस्मरणात्तच्चरणे सुखमनः कायवचनचेष्टा सा च शु[illegible]कर्माश
यो तौ च न न मारीति संस्कारदुःखता एवं तापमोहयोरपि संस्कारो वा
च्यौ एवं कालत्रयेपि दुःखानुवेधाद्विषयसुखं दुःखमेव तत्कारणरूप
त्वोपि दुःखतामाह गुणवृत्तिविरोधाच्च गुणाः सत्वरजस्तमांसि सुखाव

धमा^

^सुखस्य

दुःखमोहात्मकः परस्परविरुद्धस्वभावा अपि तैलवर्त्यग्नयः प्रदीपरू
पभोगसंपृक्तं त्र्यात्मकमेकं कार्यमारभन्ते नत्वेकस्य प्राधान्ये द्वयोर्गुणा
भावात् प्रधानमात्रव्यपदेशेन सात्त्विकं राजसं तामसमिति त्रिगुणमपि
कार्यमेकेन गुणेन व्यपदिश्यते तत्र सत्त्वोपभोगरूपोपि प्रत्ययः उद्भूतस
त्त्वकार्यत्वेपि अनुद्भूतरजस्तमः कार्यत्वात् त्रिगुणात्मक एव तथा च सुखा
त्मकत्ववद्दुःखात्मकत्वं विषादात्मकत्वं च तस्य रूपमिति दुःखमेव स
र्वं विवेकिनः नचैतादृशोपि प्रत्ययः स्थिरः यस्माच्चलं च गुणवृत्तमिति क्षि
प्रपरिणामि चित्तमुक्तं नन्वेकः प्रत्ययः कथं परस्परविरुद्धसुखदुःख

क॰

मोहात्मकतां प्रतिपद्यत इति चेन्न उद्भूतानुद्भूतयोर्विरोधाभावात् सम
वृत्तिकानामेव हि गुणानां युगपद्विरोधो न विषमवृत्तिकानां यथा धर्म
ज्ञानवैराग्यैश्वर्याणि लब्धवृत्तिकानि लब्धवृत्तिकैरेवाधर्माज्ञानावैराग्या
नैश्वर्यैः सह विरुध्यन्ते न तु स्वरूपमात्रैः प्रधानस्य प्रधानेन सह विरोधो
न तु दुर्बलेनेति हि न्यायः एवं सत्त्वरजस्तमांस्यपि परस्परं प्राधान्यमात्रे यु
गपन्न सहन्ते न तु सद्भावमपि एतेन परिणामतापसंस्कारदुःखैर्वैषम्या
रागद्वेषमोहानां युगपदसद्भावो व्याख्यातः प्रसुप्ततनुविच्छिन्नोदार
रूपेणा क्लेशानां चतुरवस्थत्वात् तथाहि अविद्याऽस्मितारागद्वेषाभि
निवेशाः पंच क्लेशाः अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणा
मिति अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या दृग्

मोहो॰

दर्शनशक्त्योरेकात्मतैवास्मिता सुखानुशयी रागः दुःखानुशयी द्वेषः
स्वरसवाही विदुषोपि तथारूढोऽभिनिवेशः ते प्रतिप्रसवहेयाः सूक्ष्मा
ध्यानहेयास्तद्वृत्तयः क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः स
ति मूले तद्विपाको जात्यायुर्भोगाः इति पातंजलानि सूत्राणि तत्रात
स्मिंस्तद्बुद्धिर्विपर्ययो मिथ्याज्ञानमविद्येति पर्यायः तस्या विशेषः संसा
रनिदानं तत्रानित्ये नित्यबुद्धिर्यथा ध्रुवा पृथिवी ध्रुवा सचन्द्रतारका
द्यौरमृता दिवौकसः इति अशुचौ परमबीभत्से काये शुचिबुद्धिर्यथा
नवेव शशांकलेखा कमनीयेयं कन्या मध्वमृतावयवनिर्मितेव चंद्रं
भित्त्वा निःसृतेव ज्ञायते नीलोत्पलपत्रायताक्षी हावभावगर्भाभ्यां

लोचनाभ्यांजीवलोकमाप्लावयतीवेतिकस्यकेनसंबंधः स्थानाद्बीजादु
पष्टंभान्निस्यंदान्निधनादपि कायमाधेयशौचत्वात्पंडिताह्यशुचिंविदुरिति
चवैयासिकःश्लोकः एतेनापुण्येपुण्यप्रत्ययोनर्थेचार्थप्रत्ययोव्याख्याताः
दुःखेसुखख्यातिरुदाहृता परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्चदुः
खमेवसर्वंविवेकिनइति अनात्मन्यात्मख्यातिर्यथाशरीरेमनुष्योहमित्यादिः
इयंचाविद्यासर्वक्लेशमूलभूतातमइत्युच्यते दृग्दर्शनरूपयोरभेदाभिमानो
ऽस्मितामोहः साधनरहितस्यापिसर्वंस्वजातीयंमेभूयादितिविपर्यया
विशेषोरागः सएवमहामोहः दुःखसाधनेविद्यमानेपिकिमपिदुःखंमे
माभूदितिविपर्ययविशेषोद्वेषः सतामिस्रः आयुरभावेप्येतैःशरीरेंद्रिया
दिभिर्नित्यैरपिवियोगोमेमाभूदित्याविद्वदंगनाबालंस्वाभाविकःसर्वप्रा
णिसाधारणोमरणत्रासरूपोविपर्ययविशेषोऽभिनिवेशःसोंधतामि
स्रः तदुक्तंपुराणे तमोमोहोमहामोहस्तामिस्रोह्यंधसंज्ञितः अविद्यापं
चपर्वैषाप्रादुर्भूतामहात्मनइति एतेचक्लेशाश्चतुरवस्थाभवंति तत्रा
सेनाप्यनुत्पत्तेरनभिव्यक्तरूपेणावस्थानंप्रसुप्तावस्था अभिव्यक्तस्यापिसह
कार्यलाभात्कार्याजनकत्वंतनुत्वावस्था अभिव्यक्तस्यजनितकार्यस्यापि
केनचिद्बलवताभिभवाद्विच्छेदावस्था अभिव्यक्तस्याप्राप्तसहकारिसंपत्ते
रप्रतिबंधेनस्वकार्यकरत्वमुदारावस्था एताश्चावस्थाचतुष्टयविशिष्टाना
मस्मितादीनांचतसृणांविपर्ययरूपाणांक्लेशानामविद्यैवसामान्यरूपाक्षे
त्रंप्रसवभूमिः सर्वेषामपिविपर्ययरूपत्वस्यदर्शितत्वात् तेनाविद्यानिवृ
मेवक्लेशानांनिवृत्तिरित्यर्थः तेचक्लेशाःप्रसुप्तायथाप्रकृतिलीनानां
तनवः प्रतिपक्षभावनयातनूकृतायथायोगिनां तदुभयेपिसूक्ष्माःप्र
तिप्रसवेनमनोनिरोधेनैवनिर्बीजसमाधिनाहेयाः येतुस्थूलवृत्तयस्तत्
कार्यभूताःस्थूलाविच्छिन्नाउदाराश्चविच्छिन्नाविच्छिन्नेनतेनात्मना
पुनःप्रादुर्भवंतीतिविच्छिन्नाः यथारागकालेक्रोधोविद्यमानोपिनप्रा
दुर्भूतइतिविच्छिन्नउच्यते एवमेकस्यांस्त्रियांचैत्रोरक्तइतिनान्यासुविरक्तः
किंत्वेकस्यांरागोलब्धवृत्तिरन्यासुचभविष्यद्वृत्तिरितिसतदाविच्छिन्नउ
च्यते येयदाविषयेलब्धवृत्तयः तेतदासर्वात्मनाप्रादुर्भूताउदाराउच्यं

तेनतदुभयेप्यतिस्थूलत्वात्कुड्यमत्तमयेनभगवद्ध्यानेनतद्धेयानमनोनिरोधम
पेक्ष्यंतेमनोनिरोधहेयाक्लेशसूक्ष्मापवतयाचपरिणामतापसंस्कारदुःखे
षुप्रसुप्ततनुविच्छिन्नरूपेणसर्वेक्लेशाःसर्वदासंतिउदारत्वात्तुकदाचित्क
स्यचिदितिविशेषः एतेचबाधनालक्षणंदुःखमुपजनयंतःक्लेशशब्द
वाच्याभवंति यतःकर्माशयोधर्माधर्माख्यःक्लेशमूलकएवसतिचमूल
भूतेक्लेशेतस्यकर्माशयस्यविपाकः फलंजन्मायुर्भोगाख्यमितिसचकर्मा
शयःइहपरत्रच स्वविपाकारंभकत्वेनदृष्टादृष्टजन्मवेदनीयः एवंक्लेश
संततिर्घटीयंत्रवदनिशमावर्तते अतःसमीचीनमुक्तं येहिसंस्पर्शजा
भोगादुःखयोनयएवते आद्यंतवंतइतिदुःखयोनित्वंपरिणामादिभिर्गु
णवृत्तिविरोधाच्च आद्यंतवत्त्वंगुणवृत्तस्यचलत्वादितियोगमतेव्याख्या
औपनिषदानांतुअनादिभावरूपमज्ञानमविद्या अहंकारधर्माध्यासोस्मि
तारागद्वेषाभिनिवेशास्तद्वृत्तिविशेषाःस्थूलत्वात् सर्वेप्यविद्यात्मकत्वे
नमिथ्याभूताःरज्जुभुजंगवत्ध्यामवत् मिथ्यात्वेपिदुःखयोनयःस्वप्नादिवद्
ष्टिसृष्टिमात्रत्वेनाद्यंतवंतश्चेतिउभयोऽपिज्ञानमात्रात्कारणनिवृत्तभ्रम
स्तेषुनरमते मृगतृष्णास्वरूपज्ञानवानिवतत्रोदकार्थीनप्रवर्तते नसंसा
रेसुखस्यगंधमात्रमप्यस्तीतिबुद्धाततःसर्वाणींद्रियाणिनिवर्तयेदित्य
र्थः २२

मदानंदी टीका

ननुबाह्यसुखविरागेस्वस्वरूपानंदभवोभवेत् तस्मिन्सतिभवेद्बाह्यसुखविरा
गस्तत्रतयोः १ अन्योन्याश्रयतादोषान्नैकंसिद्ध्येदपीतिचेत् अत्राहबाह्यसु
खविरागेहेतुदृष्टिःहिंकारणं २ विषयेंद्रियसंबंधजन्यायेत्विहरूपिणाः सु
खांशास्तेभवाभोगाइहलोकेपरत्रच ३ रागद्वेषादिविद्धत्वात्दुःखहेतवए
वते विषयेंद्रियसंयोगआदिवंतस्ततस्त्वयः ४ तद्वंतःस्वाप्नवन्मध्येप्रा
दुर्भूतास्तथात्मकाः आद्यंतेचयन्नास्तिवर्तमानेपितत्तथा ५ इतिन्यायेन
नेमिथ्यात्वलक्षणकारिणः यस्मादेवंततस्तेषुरतिमेतिनपंडितः ६
रज्जुसर्पवदाभासाभोगामिथ्याभ्रमाकराः स्वप्नवद्दृष्टिसृष्टित्वादविद्यात्मू

लकाजडाः ७ अधिष्ठानावबोधेननष्टाविद्याभ्रमोऽथयः नतेषुरमतेयद
नस्तुषरवारिषु ८ नसंसारेसुखस्याल्लिंगयोग्यड्डाततःसुधीः बाह्य
भोगरुचिंत्यक्त्वासुखस्वात्मावबोधभवेत् ९ २२ ॥

नीलकंठीटीका

नतुतस्तुष्ठमिवल्पस्यमोत्ससुखस्यार्थेकःप्राप्तमेवबाह्यंदिव्यमप्यन्नपानंगी
तवाद्यादिसर्वंत्यजेदित्याशंक्याबाह्यसुखमनित्यत्वान्निंदति येहीति संस्प
र्शजाः विषयसंबंधजाः दुःखयोनिरेवेतः आद्यंतवंतइति जातेषुत्रेयतस्तु
रवंतस्मिंनष्टेनश्यतिदुःखंचमहत्प्रयच्छतीतितेषुभोगेषुबुधःपरिपाकदर्शी
नरमते २२ ॥

आनंदीटीका

पनहानिरेकमाह ॥ — आदिमत्वात् अप्राप्तेप्रार्थनादिदुःखम् अंतवत्वाद्विनाशाद्यंकाडुःखं २२

रामकंठीटीका — त्यावर्तिसुखंयोगीविंदतीतिप्रतिपादयित्वा त्मतयाप्नोति कथंबाह्यस्पर्शेषु

माह — हिषस्मात् येसंस्पर्शजाः शब्दादिविषयसंपर्कजन्मानोभोगाः
कामाः तेजन्मविनाशयुक्तत्वादनित्याः संतःप्राप्तेषुमत्स्ववियोगजस्य
दुःखस्याव्यभिचाराद्दुःखस्याव्यभिचारादप्राप्तेषुचप्रार्थनात्मकस्यदुःखस्याव्यभिचाराद्दुः
योनयएवदुःखमेवतेजनयन्ति नतस्तेषुबुधोज्ञानवान्नरमतेनप्रीति
मनुभवंति किमनेनोक्तंभवति कर्मयोगीसन्संसारेषुरुषवादिद्विषे
विषयान्भजते नततज्जतितेनसुखेनासौसुखिमोभवतिसहिस्वाभावि
कात्मतृप्तिसुखमनुभवतीति [illegible]
[illegible] २२ ॥

लासिपीवमनरीटीका — ये त्वज्ञतो हप्ट मात्मसुखं परिग्राह्यमित्या नतुहष्टंविषयभोगसुखम्

शंकाह — हियस्मात् संस्पर्शजाविषयसंपर्कजानायेभोगा आदिमत्वादंतवत्वा
दनित्याः तेदुःखयोनयएव प्राप्तेषुमत्स्ववियोगदुःखस्याभिचारादप्रा
प्तेषु प्रार्थनादुःखस्याव्यभिचाराद्दुःखस्यैवजनकाः अतस्तेषुभोगेषुबु
धउत्पन्नात्मबोधो नरमते नप्रीतिंभजते [illegible]
[illegible] २२ ॥ ॥

गी॰
पं॰टी॰

113

ना पंचोलीटीका

ननुप्रियविषयभोगानपिनिहतः कथंमोक्षःकर्तव्यइत्यत्राह ये
हीति हि यस्मात् ये संस्पर्शजा विषयेंद्रियसंयोगजाः भोगाः ते आ
द्यंतवंतः उत्पत्तिनाशवंतः दुःखयोनयएव दुःखहेतवः हे कौंते
य तेषु भोगेषु बुधो विवेकी न रमते २२ ॥

रणवीरसमिद्धोधिनी ॥

एवंबाह्यस्पर्शासंगस्य राज्यस्वर्गभोगब्रह्मसायुज्यलक्षणं त्रि
विधं सुखात्मकं फलमुक्त्वा तत्संगस्य नरकादिलक्षणं दुःखात्म
कं तत्कथयंस्ततः सकामान्निहंति मनुष्यान्स्ति ये हीति द्विपाद्ये
निश्चये संस्पर्शजाभोगाइत्येकंपदं अभोगा आभोगा इत्यन्यतर
च्छेदआर्षः संधिर्वा संस्पर्शो बाह्यपुत्रमित्रादिविषयेइंद्रियाणांस
न्निकर्षस्तस्माज्जायतेयोविक्षेपजनकोनेकविधविकल्पात्मको
मानसिकोव्यापारस्तस्माद्धेतोर्येभोगाः भोगः भुजपालनाभ्यव
हारयोरितिधात्वनुसारात् स्वधर्मपालनं तद्विपर्ययो भोगः स्व
धर्मत्यागः अथवाभोगो राज्यभोगानंगीकारः अथवाभोगःपरव
र्णोचितभिक्षापानादिलक्षणाऽनुचितभोगस्वीकारः तेत्रयोपि
नरकादिदुःखकारणान्येवभवंति तथापि च ते आद्यंतवंतो नि[illegible]
अतस्तेषु विषयेषु बुधो दीर्घदर्शी न रमते न रमेत नासक्तो भवे
दित्यर्थः यद्वा संस्पर्शात्प्रोक्तलक्षणादिंद्रियार्थसन्निकर्षाज्जायं
ते ये आभोगा विस्तारा अर्थात्कथंभीष्ममहंसंख्येइत्यादिग्रंथेन
प्रतिपादितस्वरूपविक्षेपकविकल्पानां ते दुःखप्रदाएव ते चाद्यं
तवंत उत्पत्तिविनाशशालित्वेन न चिरमवस्थायिनः अतस्तेषु
विषयेषु बुधो वस्तुयाथात्म्यवेत्ता न रमते तद्दर्शनो न भवेदित्यर्थः
एतेन च द्वितीयाध्याये मात्रास्पर्शास्त्वित्यत्र सूचितोर्थो विवृतः २२॥

मथभाष्य

येद्वीति तत्यविद्यागं प्रशंसति ३२॥

भाषा अनुवाद

प्रिय जो विषय भोग तिन के निहत्त होनेसे फेरि मुक्ति पुरुषार्थ अ
र्थात् परम प्रिय कैसे है इस संशय पर कहते हैं कि जो स्पर्श अ
दि विषय और उन विषयों से प्रगटजो सुख सो भोग समय मे सु
हो कहे और का अधिक सुख देखि इच्छा की वृद्धि औ आपदी हो
भर हैं और भोग पीछे कछु नहीं हैं खाली चिंता मात्र करते हैं इन
सब हेतुवोंसे केवल दुख के कारण हैं और उन का आदि अन्त
भी है इस से हे कौंतेय विवेकी लो(क) उस विषय सुख भोग मे नहीं र
मित होते है २२

दोहा

ह्वोते नाशों बाह्य विषय के भोगजो दुखदायक यह होय
कुंतिसुत तिंह बुधजन न सोय २२॥

115

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्ष
णात् कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः :२३

शांकरभाष्यं

अयंच श्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुर्निवार्यश्चे
ति तत्परिहारे यत्नाधिक्यं कर्तव्यमित्याह भगवान् शक्नोतीति शक्नोत्यु
त्सहते इहैव जीवन्नेव यः सोढुं प्रसहितुं प्राक् पूर्वं शरीरविमोक्षणात् आ
मरणात् इत्यर्थः मरणसीमाकरणं जीवतोऽवश्यंभावी हि कामक्रोधोद्भ
वो वेग अनंतनिमित्तवान् हि स इति यावन्मरणं तावन्न विश्रंभणीय इत्य
र्थः काम इंद्रियगोचरप्राप्ते इष्टे विषये श्रूयमाणे स्मर्यमाणे चानुभूते सुख
हेतौ या गर्धिः तृस्ना स कामः क्रोधश्चात्मनः प्रतिकूलेषु दुःखहेतुषु दृश्य
मानेषु श्रूयमाणेषु स्मर्यमाणेषु वा यो द्वेषः स क्रोधस्तौ कामक्रोधौ उद्भ
वो यस्य वेगस्य स कामक्रोधोद्भवो वेगः रोमांचनप्रहृष्टनेत्रवदनादिलिंगोंतः
करणप्रक्षोभरूपः कामोद्भवो वेगः गात्रप्रकम्पप्रस्वेदसंदष्टोष्ठपुटरक्तनेत्रा
दिलिंगः क्रोधोद्भवो वेगस्तं कामक्रोधोद्भवं वेगं य उत्सहते सोढुं सहितुं प्र
भुः स युक्तो योगी सुखी चेह लोके नरः २३ ।।

उक्तश्लोकस्य तात्पर्यमाह अयंचेति श्रेयोमार्गप्र
तिपक्षत्वे कष्टतमत्वे हेतुः सर्वेत्येवहेतुत्वान्तरमाह दुर्निवार्यश्चेति प्रसिद्धं हि कामक्रोधोद्भवस्य +
सर्वेति प्रयत्नाधिक्यस्य कर्तव्यत्वे हेतुं सूचयति

आनन्दगिरिकृतटीका

यावदिति कामक्रोधोद्भवं वेगं व्याख्यातुमादौ कामं मनोविकारविशेषत्वेन
व्याचष्टे काम इति कथमस्य मनोविकारविशेषत्वं तदाह इंद्रियेति कामोऽ
भिलाषस्तृष्णेति पर्यायाः संतः प्राज्ञा मनोविकारविशेषे पर्यवस्यन्तीत्यर्थः ।
क्रोधस्य मनोविकारविशेषत्वमाह क्रोधश्चेति तमेव क्रोधं स्पष्टयति
आत्मन इति एवं कामक्रोधौ व्याख्याय तयोरुत्कटरूपावस्थात्मनो वेगस्य ।
ताभ्यामुत्पत्तिमुपलक्षयति ताविति यथोक्तवेगावगमोपायमनुपरिशिनष्टि रो
मांचनप्रहृष्टनेत्रेत्यादिना उभयविधवेगं यो जीवन्नेव सोढुं शक्नोति तं पुरुष
धौरेयत्वेन स्तौति तमित्यादिना २३ ।

स्वामिकृतटीका

+ वेगस्य दुर्निवारत्वं येन मातरमपि चाधिरोहति पितरमपि हन्ति तमवश्यं परिहर्तव्यं दर्शयति शक्नोतीति यथोक्तं
वेगं बहिरनर्थरूपेण परिणामात्प्रागेव देहान्तरत्वात् यः सोढुं क्षमते तं स्तौति स युक्त इति मरणसीमाकरणस्य
तात्पर्यमाह मरणेति प्रसिद्धो हि शास्त्रः तत्र हेतुमाह अनन्तेति आद्युपहतानां हृद्यानां च कामादिवेगा न भव
न्तीत्याशयवाह इति ॥ +

गी॰
टी॰ पं
116

तस्मान्मोक्ष एव परः पुरुषार्थः तस्य च कामक्रोधवेगोऽतिप्रतिपक्षः अत
स्तत्सहनसमर्थ एव मोक्षभागीत्याह शक्नोतीति कामात्क्रोधाच्चोद्भव
तीति यो वेगो मनोनेत्रलोभादिलक्षणस्तं इहैव तदुद्भवसमय एव यो नरः सोढुं प्र
तिरोद्धुं शक्नोति तदपि न क्षणमात्रं किन्तु शरीरविमोक्षणात्प्राक् [illegible] देहपातावधि
रित्यर्थः य एवंभूतः स एव युक्तः समाहितः सुखी चेति भवति नान्यः यद्वा मरणाव
धि विलसन्तीभिः आलिङ्ग्यमानोऽपि शत्रुभिर्दह्यमानोऽपि यथा प्राणशून्यः काम
क्रोधवेगं सहते तथा मरणात्प्रागपि जीवन्नेव सहते स एव युक्तः सुखी च स
र्यः तदुक्तं वसिष्ठेन प्राणे गते यथा देहः सुखं दुःखं न विन्दति तथा चेत्प्रा
णयुक्तोऽपि स कैवल्याश्रयो भवेत् २३ ॥

युवतिभि

पैशाचभाष्यम्

अयं च श्रेयोमार्गपरिपन्थी कष्टतमो दोषो दुर्वारश्च अतस्तत्परिहारे यत्नोऽक
र्तव्य इत्याह भगवान् शक्नोतीति शक्नोति सहते इहैव जीवन्नेव यः सोढुं प्रसा
हितुं प्राक् पूर्वं शरीरविमोक्षणात् मरणात् मरणसीमाकरणं जीवतोऽवश्यं
भावी हि कामक्रोधोद्भवो वेगोऽनन्तनिमित्तवान् हि यस्मात् इति यावन्मरणं तावन्न
विस्रम्भणीय इत्यर्थः कामश्चेन्द्रियगोचरप्राप्ते इष्टे विषये दृश्यमाने श्रूयमाणे
वानुभूते सुखहेतौ या गृध्नुता सा स कामः [illegible] रोमाञ्चप्रहृष्टवदनत्वादि
लिङ्गोऽतथाकरणस्य लोभरूपः कामोद्भवो वेगः गात्रप्रकम्पप्रस्वेदसंदष्टोष्ठपुटर
क्तनेत्रादिलिङ्गः क्रोधोद्भवो वेगस्तं कामक्रोधोद्भवं वेगं यः प्रसहते सो यु
क्तो योगी सुखी चेह लोके नरः २३ ॥

...ोधश्चात्मनः प्रतिकूले
...दुःखहेतुषु दृश्यमानेषु
...ूयमाणेषु स्मर्यमाणेषु वा यो
...षः स क्रोधस्तौ कामक्रोधौ
...द्भवो यस्य वेगस्य स काम
...ोधोद्भवो वेगः

रामानुजभाष्यम्

शक्नोतीति शरीरमोक्षणात्प्रागेव साधनदशायामेवात्मानुभवप्रीत्या
कामक्रोधभवं वेगं सोढुं निरोद्धुं यः शक्नोति स युक्त आत्मानुभवायार्हः
एवं शरीरविमोक्षणोत्तरकालमात्मानुभवसुखं संपत्स्यते २३ ॥

पृ॰

अभिनवगुप्तकृतटीका

तदेतद्दुःशकं शरीरान्तकालं यावत् क्रोधकामजो वेगः सह्य
मानो यदि सह्यते तदास्य नित्यसुखप्राप्तिः २३

परमार्थप्रपा टीका

स्वस्थस्य स्वपारमार्थिक्याभिव्यंजकसामग्रीमाह शक्नोतीति यः पुरुषः इहैव वर्त्त
मानेदेहे कामक्रोधोद्भवं वेगं सोढुं शक्नोति कामक्रोधाभ्यामुद्भवो यस्या
सौ मनोवेगस्तत्सहनशीलः तदपि नैरंतर्य्येणेत्याह प्रागिति शरीरविमो
क्षणात् प्राक् यावद्देहस्य पातमित्यर्थः एवंभूत एव युक्तः स एव नरः स्वतोऽपि सु
खभागी च भवति २३ ॥

वनमाली टीका

मेन्यास्मविरोधी महान् शत्रुर्वामिहेतः कामो महतां जेय इत्याह शक्नोतीति
आत्मनोऽनुकूलेषु स्वबहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु तद्गु
णानुसंधानाभ्यासेन योऽयं त्यात्मको अभिलाषो लोभः स कामः यद्वा स्त्री
भोगतृष्णा कामः धनतृष्णा लोभः अत एव कामः क्रोधस्तथा लोभ इति श्री
युक्तवत्याति इह तत्स्पृहासामान्याभिप्रायेण कामशब्दप्रयुक्त इति लोभः पृथ
ङ्नोक्तः एवमात्मनः प्रतिकूलेषु हेतुषु दृश्यमानेषु तद्दोषानुसंधाना
भ्यासेन तु यः प्रज्वलनात्मको द्वेषो मन्युः स क्रोधः तयोर्लोके वेदविरोधप्रति
संधानप्रतिबंधकतया प्रहृष्टत्वस्वभावत्वरूपनदीवेगसाम्येन वेग इत्युच्यते
यथा नद्या वेगो वर्षास्वतिप्रबलतया विरोधप्रतिसंधानेनातिकूलं तमपि गर्त्ते
पातयित्वा मज्जयति वाधो नयति च तथा कामक्रोधयोरपि वेगो विषयाभि
ध्यानाभ्यासेन वर्षाकालस्थानीयेनातिप्रबललोकवेदविरोधप्रतिसंधानेनं
निष्कम्पमपि गर्त्ते पातयित्वा संसारसमुद्रे मज्जयति वाधो महानरकं प्रापयति वे
त्तिवेगापरप्रयोगेन सहवितं एतादृशं कामक्रोधोद्भवं वेगमंतःकरणप्रा
नोभयरूपस्तंभस्वेदाद्यनेकबाह्यलिंगं शरीरविमोक्षणात् शरीरविमोक्षणा
पर्यंतमनेकनिमित्तवशात् सर्वदा संभाव्यमानत्वेनाविश्रंभणीयमंतरयंत्र
मात्रे इहैव बहिरिंद्रियव्यापाररूपं ... त्ते येन तत् प्रागेव यो ... ति धीरस्तिमिं
गिलस्वदरीवेगं विषयदोषदर्शनाभ्यासेन वशीकारसंज्ञावैराग्येण सोढुं त
दनुकूलकार्यासंपादनेनानर्थकं कर्त्तुं शक्नोति स समर्थो भवति स एव युक्तो यो
गी स एव नरः पुमान् पुरुषार्थसंपादनात् इहोक्तयोः कामक्रोधयोर्वेग
सहने प्रस्तुते तयोरनुमर्दनमात्रेण नष्टांत इति २३

ऊतसमवैजयन्ती टीका

गी॰
टी॰पं

ज्ञानयोगस्य निरतिशयप्रतिपक्षः संसारप्राप्तिहेतुतमः कामादिजनितवेग
स्यातिशयप्रयत्नेनैव ज्ञानाभ्यासवता सोढव्य इत्याह शक्नोतीति यो ज्ञाना
योगी इहैव ज्ञानसाधनदशायामेव शरीरविमोक्षणात् प्रागेव मरणात् पू

सहितः॰ र्वमेव शरीरे स्थित एव साधनसिद्धिं स्यादतः शरीरविमोक्षणात् प्रागित्युक्तम् यद्वा
शरीराद्विमोक्षणं तस्मात् यावदात्मनः कामाद्यनलज्वालया पीडितस्य शरी
राद्विमोक्षणं तस्मात् प्रागेव कामक्रोधोद्भवं कामोऽनुकूलविषयतृष्णा क्रोधः
केनचिच्छिन्नेन कामस्याभिघातेन तत्र ऽमनस्ताभ्यामुद्भवो जातस्तं वेगं मनोने
त्रादिक्षोभरागद्वेषस्वरूपानुभवाद्रागेन सोढुं निरोद्धुं शक्नोति स नरः स एव
मनुष्यो नाम्नः स च युक्तः आत्मानुभवयोग्यः स च सावीस्वस्वरूपानुभव सु
खवान् भवतीत्यर्थः २३ ॥

सर्वानर्थप्राप्तिहेतुर्दुर्निवारोयं श्रेयोमा
तायत्नेन तद्वेगाणां निवारणीय इति यत्ना
मथसरनीटीका
र्गप्रतिपक्षः क एष तमो दोषमाह
धिकाविधानाय पुनराह ॥

आत्मनोऽनुकूलेषु सुखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वा त
धा॰ द्गुणानुसंधानाभ्यासेन योरत्याख्यो ऽभिलाषस्तस्य लोभः स कामः
स्त्रीपुंसयोः परस्परव्यतिकराभिलाषे त्वत्यन्तनिरूढः कामशब्दः एतदभि
प्रायेण कामः क्रोधस्तथा लोभस्तस्य त्रयनस्तस्य लोभः स्त्रीव्यतिकरस्य
म॰ कामइति कामलोभौ पृथग्गृहीतौ इह तु तस्य सामान्याभिप्रायेण कामशब्द
प्रयुक्त इति लोभः पृथग्नोक्तः एवमात्मनः प्रतिकूलेषु दुःखहेतुषु दृश्य
मानेषु श्रूयमाणेषु स्मर्यमाणेषु वा तद्दोषानुसंधानाभ्यासेन यः प्रज्व
लनात्मको द्वेषो मन्युः स क्रोधः तयोरुत्तरकालावस्था लोकवेदविरोधप्रतिसं
धानप्रतिबंधकतया [illegible] महदनुतमप्राव्यस्वरूपा नदीवेगसाम्येन
जनं॰ वेग उच्यते यथा हि नद्या वेगो वर्षासु अतिप्रबलतया लोकवेदविरोधप्रतिसं
धानेनानिरुद्धं तमपि गर्ते पातयित्वा मज्जयति चाधो नयति च तथा कामक्रो
धयोरपि वेगो विषयाभिध्यानाभ्यासेन वर्षाकालस्थानीये नातिप्रबलो
लोकवेदविरोधप्रतिसंधानेनानिरुद्धं तमपि विषयगर्ते पातयित्वा संसारस
मुद्रे मज्जयति चाधो महानरकान् प्रापयति वेगापरप्रयोगेन सूचितं एतद्
केन प्रकाक्रोधमिति व्रविहितं तमेतादृशं कामक्रोधोद्भवं वेगमन्तः करणक्षु
प्रक्षोभरूपं स्तंभस्वेदाद्यनेकबाह्यविकारलिङ्गं आ शरीरविमोक्षणात् शरी
रविमोक्षणपर्यन्तमनेकनिमित्तवशात् सर्वदा संभाव्यमानत्वेनाविश्व

पकालेति फलत्रयानंतरमुपसमाप्ति [illegible] फलभाक् नान्यः तदुक्तं प्रागेगते
यथा देहः स्ववेडः स्वं न विन्दति तथा वेत्ता यागफलं कोपि स कैवल्याश्रये भ
वेदिति येतु विषयेभ्यः पलायनपरा योगमभ्यस्यंति तेषां दुःखे भो योगम
न्फलं चेति [illegible] माह २२

पंचोलीटीका

अथ च मोक्षमार्गप्रतिबंधकः सर्वानर्थहेतुः दुर्निवार्यश्च कामक्रो
धोद्भववेगः अतस्तन्निरोधे यत्नाधिक्यं कर्तव्यमित्याह शक्नोती
ति यः पुमान् इहैव जीवन्नेव शरीरविमोक्षणात् पूर्वं कामक्रोधोद्भवं
वेगमनुभूते दृष्टे श्रुते स्मृते वा सुखहेतौ विषये यादृशी तृष्णा स का
मः तथा दृष्टे श्रुते स्मृते वा दुःखहेतौ विषये आत्मनः प्रतिकूलो यो
द्वेषः सः क्रोधः यो वेगः रोमांचहृष्टनेत्रवदनलिंगान्तःकरणप्रक्षोभ
रूपः स कामजो वेगः गात्रप्रकंपप्रस्वेदसंदष्टोष्ठपुटरक्तनेत्रादि
लिंगचित्तप्रक्षोभरूपः स क्रोधोद्भववेगः तं कामक्रोधोद्भवं वेगं सोढुं
शक्नोति स नरः युक्तः योगी सुखी च २३ ॥

रणवीरसमिद्धदीपिनी ॥

मध्ययं दिनव्यपयंत्येते इत्येतत्सूत्रं विवृण्वंस्तत्त्वज्ञानोपायं तत्फलं
चाह प्राप्नोतीति प्रवपाठो भिन्नक्रमः प्रागित्यनेन संबध्यते यः पु
मान् इहास्मिन्नुद्देशरीरविमोक्षणान्निष्क्रियत्वेन प्राणुमिरेत्युक्ता
हयाहेतोर्यच्छरीरस्य देहस्य विमोक्षणं त्यागस्तस्मात्प्रागेव पूर्वं का
लपव यावन्नरिपुभिरेत्यनिहन्यते तावदेवेत्यर्थः कामक्रोधोद्भवं
वेगं कामप्रक्रोधप्रपत्यरनिरूपितस्वरूपो कामक्रोधौ वा समं
स्पर्शजौ ताभ्यामुत्थं वेगमभोगलक्षणं विकारलक्षणं वा समं मोदत्त्व
क्षणं वा सोढुं प्राप्नोति समर्थो भवति स युक्तः समत्वं योग उच्यते
इत्युक्तेस्तल्लक्षणसमतात्मकयोगवान् योगः कर्मसु कौशलमि

गी
टी·पं

लाभशोभिस्वाभाविकामृततरसाकारमशेषमयं ध्यानेनस्वयंश्रितवतोरमया
नूचितेश्रीकर्मनतेव्रजतिनाशमयंकृदोषः १३ २३ ॥

नीलकंठी टीका

कः पुनर्मुख्यः सुखीत्याह शक्नोतीति इहैवजीवन्नेवदेहे प्राक्शरीरवि
मोक्षणात् यावद्देहपातंमयाकामक्रोधोत्थितावितिविस्रंभोनकर्तव्यइत्य
र्थः श्रुतदृष्टश्रुतमितेवाविषयेयोगइत्यस्मात्पूर्वोक्तमिथ्यमकामः क्रोधा
त्सादृशेएवविषयेद्वेषस्तौ कामक्रोधौ उद्भवोयस्यवेगस्यसरोमांचहृष्टनेत्र
वक्त्रलिंगोऽन्तःकरणप्रक्षोभरूपः कामोद्भवोवेगः गात्रप्रकंपप्रस्वेदसंदष्टो
ष्ठपुटरक्तनेत्रादिलिंगः क्रोधोद्भवोवेगस्तंकामक्रोधोद्भवंवेगंसोढुंयः श
क्नोतिसएवयुक्तोयोगीसुखः सुखीचनान्यः २३ ।

आनंदीटीका

यइहैवास्मिन्नेवजन्मनिदेहपातादर्वाक् देहस्थितिपर्यंतं कामोद्भवंवे
गमप्राप्तेप्रार्थनारूपम् क्रोधोद्भवंवेगंप्राप्तस्यनाशोविन्नज्वलरूपं नष्ट
सोढुंशक्नोति सएवंविधोयोगीयोगयुक्तोभवति सएवसुखीश्रवणाय
समोलसावस्याभाजनंभवति ॥ [illegible] २३ ॥

बुधस्यैवंविधस्यैवयोगित्वंचसुखित्वंचप्रति

रामकंठीटीका

पादयितुमाह ॥

यइहैवास्मिंशरीरेतिष्ठन्नदृष्टाभिचारविषयसंबधवशाद्रागद्वेषादिजंसं
रंभमात्मैकनिष्ठतया सोढुमवधीरयितुं देहत्यागात्प्रागेवशक्नोति
प्रभवतिसयोगीसमाहितः सचसुखी निरुपाधिकानंदलक्षणासमाधिफ
लवान् यतस्तत्त्वविदोऽपिहिकेवलज्ञानवादिनोविषयेभ्यः पलायमा
नायोगमभ्यस्यन्ति तेषामंतरंगेप्रवृत्तेषाततायिषुमनस्विहैवदेहे
मयोगीमात्मैवविषयेषुविलमानमस्थितिः सजीवन्नेवमुक्तइतिसएव
चयोगीसुखीचेत्युक्तम् [illegible] २३ ॥ ॥

एवंविधस्यात्मज्ञानंबोधस्यक लासिकी

नंदस्यचलक्षणमाह ॥

[illegible]टीका

सयोगावहितस्याविर्भूतात्मा

योयोगीइहैवजीवद्दशायामेवशरीरत्यागात्प्रागेव कामात्क्रोधाच्चोत्
पन्नंवेगंसंरंभं मनोनेत्रक्षोभादिलक्षणंगाढं आत्मैकनिष्ठतयासोढु
मवधीरयितुंशक्नोतिसयुक्तः सम्यग्ध्यानेनसमाहितः सएवसुखीनिरो

पकालेनिकृत्वराग्नेर्द्वपसमाप्ति फलभाक् नान्यः तदुक्तं प्राणेगते यथादेहः सुखंदुःखंनविन्दति तथाचेत्प्राणायुक्तोपिसकैवल्याश्रयेभवेदिति येतुविषयेभ्यः पलायनपरायोगमभ्यस्यंति तेषांदुर्लभोयोगस्यन्फलंचेति [illegible] ॥२३॥

पंचोलीटीका

अथैवमोक्षमार्गप्रतिबंधकः सर्वानर्थहेतुः दुर्निवार्यश्चकामक्रोधोद्भवोवेगः अतस्तन्निरोधेयत्नाधिक्यंकर्तव्यमित्याह शक्नोतीति यः पुमान् इहैवजीवन्नेवशरीरविमोक्षणात् पूर्वंकामक्रोधोद्भवंवेगमनुभूते दृष्टे श्रुते स्मृते वा सुखहेतौविषयेयादृशीनस्मासकामः तथादृष्टेश्रुतेस्मृतेवादुःखहेतौविषये आत्मनः प्रतिकूलोयोद्वेषः सः क्रोधः वेगः रोमोद्धर्षनेत्रवदनलिंगान्तःकरणप्रक्षोभरूपः सकामजोवेगः गात्रप्रकंपप्रस्वेदसंदष्टोष्ठपुटनेत्ररक्ततादिलिंगचित्तप्रक्षोभरूपः सक्रोधोद्भववेगः तंकामक्रोधोद्भववेगंसोढुंप्राप्नोति सनरः युक्तः योगी सुखीच २३॥

रणवीरससिद्धोयिनी॥

अथयंदिनव्यपर्यंत्येतेइत्येतत्स्वत्वंविहरावंस्तत्सदनोपायंतत्फलंचाह प्राप्नोतीति एवंप्राप्नोभिन्नक्रमः प्रागित्यनेनसंबध्यते यःपुमान् इहास्मिन्नेवदेहेशरीरविमोक्षणान्निष्क्रियत्वेनप्राग्भवित्यर्थः हयाहेतोर्यत्करीरस्यदेहस्यविमोक्षणंत्यागस्तस्मात्प्रागेवपूर्वकालएव यावन्नेरिपुभिरेत्यनिहन्यतेतावदेवेत्यर्थः कामक्रोधोद्भवंवेगं कामएवक्रोधएवइत्यवनिरूपितस्वरूपोकामक्रोधौवाप्रसंस्पर्शजौ ताभ्यामुत्थंवेगमभोगलक्षणंविस्तारलक्षणंवासंमोहलक्षणंवासोढुंप्राप्नोतिसमर्थोभवति सयुक्तः समत्वंयोगउच्यतइत्युक्तेरुक्तलक्षणसमतात्मकयोगवान् योगःकर्मसुकौशलमि

लोकेश्च प्रवृत्तिमत्वलक्षणकर्मयोगविशिष्टस्य निश्चयप्रवृत्तिह
यवानित्यर्थः अतःसएवनरःसुखी ऐहिकामुष्मिकानंदप्रा
श्च भवेदित्यर्थः २२॥

119

अथभाष्य

शक्नोतीति कामक्रोधोद्भवंवेगंसोढुंशक्नोति शरीरविमोक्ष
णात्प्राक् यथामनुष्यशरीरे सोढुंशक्यं नतथानान्यत्रेतिभावः
ब्रह्मलोकादिस्वर्जितकामानामेवभवति तानिलक्षणंप्रपंचय
न्युत्तरैः श्लोकैः आरामःपरदर्शनादिनिमित्तं सुखं अत्रत्तपरमा
त्मदर्शनादिनिमित्तं तत्सुखंतूपद्रवत्ययेव्यक्तं अत्रत्तकामादि
द्वयव्यक्तमात्मसुखं स्वयंज्योतिष्ट्वाद्भगवतस्तस्यैकोऽरंतर्ज्योतिः
सर्वेषामंतर्ज्योतिष्टुपिव्यक्तोविशेषः असंप्रज्ञातसमाधीनांबाह्य
दर्शनात् दर्शनेष्वकिंचित्कारादेवशाह्वः उक्तंचैतत् दर्शनस्पर्श
सभाषाद्यसुखंजायतेनृणां आरामः मत्तविज्ञेयः सुखंकाम
त्वयोदितमितिनारदीये स्वज्योतिष्टात्मरूपविष्णोरंतर्ज्योतिश्च त
तिश्यतइतिच अतःसुखवादैःकारणमाह ब्रह्म[illegible]तइति पाप
त्वयाचैतद्भवतीत्याह २३॥

भाषा अनुवाद

इस से मुक्तिही परम पुरुषार्थ है और काम क्रोध से उत्पन्न जो
लोभ सोई मुक्तिका प्रति पक्ष हैं अतएव उस वेग को जो सहि सकै
सोमुक्ति भागी होयगा यही कहते हैं कि शरीर रहते अथवा शरी
र सामर्थ्य रहते हुये जो काम क्रोध के वेग को सहिलेने सकै सोई
नरयुक्त कहे आत्मरूप और सुखी है २३

दोहा

देह विनाशसें पूर्वहि सहने समर्थ इहां जोय कामक्रोध
भव वेगकहुं सुखी युक्तनर सोय २३॥

120

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति २४

शांकरभाष्यं

कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्याह भगवान् य इति योऽन्तरात्मनि । सुखं यस्य सोऽन्तःसुखस्तथान्तरेवात्मन्यारामः क्रीडा यस्य सोऽन्तरारामस्त थैवान्तरात्मैव ज्योतिः प्रकाशो यस्य सोऽन्तर्ज्योतिरेव य ईदृशः स योगी ब्रह्म निर्वाणं ब्रह्मणि निर्वृतिं मोक्षमिह जीवन्नेव ब्रह्मभूतः सन्नधिगच्छति प्राप्नोति २४

आनंदगिरिकृतटीका

ज्ञानस्यात्यन्तरंगमात्रमात्मनिष्ठत्वं दर्शयन् प्रकृतं ब्रह्मविदमेव विशिनष्टि कथंभूतस्येति यथान्तरेव सुखेन बाह्यैर्विषयैस्तथान्तरेव ज्योतिर्न श्रोत्रा दिभिरेतो विषयान्तरविज्ञानरहित इत्याह तथेति यथोक्तविशेषणसमा धिमान् जीवन्नेव मुक्तिमधिगच्छतीत्याह स योगीति आत्मन्यन्तरेव सुख मिति बाह्यविषयनिरपेक्षत्वं विवक्षितमन्तरारामत्वं च इन्द्रियादिविषया पेतामलरेण क्रीडाप्रफलफलभाक्त्वमभिमतमिंद्रियादिजन्यप्रकाशशू न्यमात्मज्योतिष्ट्वमिष्टं यथोक्तविशेषणसंपन्नः समाहितश्च जीवन्नेव ब्रह्मभावं प्राप्नोति ब्रह्मणि परिपूर्णो निर्वृतिं सर्वानर्थनिवृत्त्युपलक्षितां स्थितिमनतिशयानंदाविर्भावलक्षणां प्राप्नोतीत्याह य ईदृश इति २४

स्वामिकृतटीका

न केवलं कामक्रोधवेगसहनमात्रेण मोक्षं प्राप्नोति अपि तु योऽन्त इति अन्तरात्मन्येव सुखं यस्य न विषयेषु अन्तरेवारामः क्रीडा यस्य न बहिः अन्त रेव ज्योतिर्दृष्टिर्यस्य न गीतनृत्यादिषु स एवं ब्रह्मभूतः ब्रह्मणि भूतः स्थितः सन् ब्रह्मणि निर्वाणं लयमधिगच्छति प्राप्नोति २४

पिशाचभाष्यं

कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्यत्राह भगवान् योऽन्त इति यः अ न्तः आत्मनि सुखं यस्य सोऽन्तः सुखस्तथान्तरेवात्मनि आरामः क्रीडा यस्य सो ऽन्तरारामस्तथान्तरात्मैव ज्योतिः प्रकाशो यस्य सोऽन्तर्ज्योतिर्य ईदृशः स योगी ब्रह्मनिर्वाणं ब्रह्मनिर्वृतिमिह जीवन्नेव [illegible]

गी॰
टी॰ पं॰

योंतःसुखः अंतरात्मा [illegible] अंतःसुखो [illegible] श्रीरामः
क्रीडायस्य सोंत [illegible] तथांतर्ज्योतिः [illegible]
यस्य [illegible] ब्रह्मनिर्वाणं [illegible] योगी [illegible] ब्रह्मभूतः सन्नधिगच्छति
प्राप्नोतीति २४

121

रामानुजभाष्यं

यइति यो बाह्यविषयानुभवं सर्वं विहाय अंतःसुख आत्मानुभवैकसुखः । अंतरारामः आत्मैकारामः स्वगुणैरात्मैव सुखवर्द्धको यस्य स तथोक्तः । तथांतर्ज्योतिरात्मैकज्ञानो यो वर्तते स ब्रह्मभूतो योगी ब्रह्मनिर्वाणमात्मानुभवसुखं प्राप्नोति २४

अभिनवगुप्तकृतटीका

अंतस्सुखोंतरेव बाह्यानपेक्षितसुखः अंतरेव रमते तत्रैवास्य प्रकाशः व्यवहारे नष्टमिव उक्तं च जडइव विचरेदवादमतिरिति २४

परमार्थप्रपाटीका

अथ न केवलं कामक्रोधसहनमात्रेण मोक्षः अपितु योंतरिति यः पुरुषोंतः सुखः आत्मसुख एवानंतस्तथा अंतरारामः क्रीडा यस्य न बहिः स तथा अंतर्ज्योतिर्दृष्टिर्यस्य न बहिर्नृत्यगीतादौ स योगी ब्रह्मभूतः ब्रह्मस्वरूपः सन् ब्रह्मण्येव निर्वाणं लयं प्राप्नोति नतु स्वर्गं [illegible] वामइति श्रुतेः २४

वनमालीटीका

जीवन्मुक्तस्य लक्षणमाह योंतरिति अंतर्बाह्यविषयनिरपेक्षं अंतरेवाभिव्यक्तस्वरूपसुखं यस्य सोंतःसुखः अतएवांतः आत्मन्यभिव्यक्तस्वरूपे एव आरामो रमणं क्रीडा यस्य न तु बाह्यविषयेषु सुखसाधनेषु सोंतरारामः अतएवाह अंतर्ज्योतिरेव यः अंतरेवात्मनि ज्योतिर्विज्ञानं न बाह्येंद्रियेषु सोंतर्ज्योतिरेवकारो विशेषणत्रयेपि संबध्यते अंतःप्रज्ञानसमाधौ श्रोत्रादीनामनुभवः व्युत्थानकालेवा [illegible] नविक्षेपाभावाद्ब्रह्मदर्शनापेक्षयावा [illegible] नस्य [illegible] वर्तमानस्यापि प्राचुर्यमाह [illegible] सयोगी ब्रह्मणि परमानंदघने स्वरूपनिर्वाणं समाप्तिं निर्वृतिरूपं स्वस्वरूपं ब्रह्माधिगच्छति नत्वब्रह्मभूतस्य कथं ब्रह्मभावात् ब्रह्मभूतो [illegible] क्रमेण [illegible] यथा [illegible]

विद्यानाशेन तदाविर्भूतिर्भवति ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः य
थाभृङ्गध्यानात्कीटोभृङ्गो भवति तद्वत् अन्ये तु तत्त्वविन्मात्रस्य सद
सकरणात्तद्भिन्नस्याहन्तास्पदस्यादाविर्भावनीयस्य विशेषस्याभावा
दस्येगतमवायैत्यर्थः २४ ।

उत्कर्षवैजयन्तीटीका

यस्मादनुभवानुरागेण कामक्रोधजं वेगं सोढुं समर्थो भवेत्तमेवाह
य इति योऽन्तःसुखः बाह्यविषयान् शब्दादीन् विहायान्तरात्मनि सुख
रूपे परब्रह्मरूपमाने रतिर्यस्य स तथान्तरात्मरूपे परमात्मनि रमते
रामः अन्तरात्मनि ब्रह्मरूपे रमतेऽन्तरारामः क्रीडा यस्य स तथान्तरा
न्तर्ज्योतिर्बाह्ये दीपादिना तद्रहितत्वेन वा तथा तेनैव प्रकारेणान्तर्ज्यो
तिरेवान्तरात्मन्येव ज्योतिर्दृष्टिर्ज्ञानाकारदृष्टिरवलोकनं यस्य स तथान्त
रात्मन्यप्राकृते विषये दृष्टिरित्यर्थः स योगी फलानुसंधानरहितः
कर्मयोगवान् ब्रह्मभूतः सन् लब्धशुद्धस्वस्वरूपः सन् ब्रह्मनिर्वाणमा
त्मस्वरूपानुभवसुखमधिगच्छति सर्वेनैव प्राप्नोतीत्यर्थः २४ ॥

मधुसूदनीटीका

कामक्रोधवेगसहनमात्रेण मुच्यत इति न किन्तु अन्तर्बाह्यविषयनिर
पेक्ष एव ब्रह्मरूपो भूत्वेत्याह योऽन्तःसुखः बाह्यविषयजनितसुखस्य
पेक्षः आरामः क्रीडा यस्य सोऽन्तरारामः त्यक्तसर्वपरिग्रहत्वेन बाह्यसुख
साधनशून्य इत्यर्थः ननु त्यक्तसर्वपरिग्रहस्यापि यतेर्यदृच्छोपनतैः ।
कोकिलादिमधुरशब्दश्रवणमन्दपवनस्पर्शनचन्द्रोदयमयूरनृत्यादिद
र्शनातिमधुरशीतलगङ्गोदकपानकेतकीकुसुमसौरभाघ्राणादि
भिर्ग्राम्यैः सुखोत्पत्तिसंभवात् कथं बाह्यसुखसाधनशून्यत्वमिति
तत्राह तथान्तर्ज्योतिरेव यः यथान्तरेव सुखं न बाह्यैर्विषयैस्तथान्तरेव
आत्मनि ज्योतिर्विज्ञानं न बाह्यैरिन्द्रियैर्यस्य सोऽन्तर्ज्योतिः श्रोत्रादिजन्यबाह्य
विषयविज्ञानरहितः एवकारो विशेषणत्रयेऽपि संबध्यते समाधि
काले शब्दादिप्रतिभासाभावात् व्युत्थानकाले तत्प्रतिभासेऽपि मिथ्या
त्वनिश्चयान्न बाह्यविषयैः सुखसुखोत्पत्तिसंभव इत्यर्थः एवं यथोक्त

न्य इत्यर्थः कुतो बाह्यसुखाभावाः नत्वाह अन्तः आत्मन्येव न तु स्त्र्यादि विषये बाह्ये सुखं यस्य

गी॰
टी॰पं॰

विक्षेपणासंपन्नः सयोगीसमाहितोब्रह्मनिर्वाणंब्रह्मपरमानंदरूपंका
ल्पितद्वैतोपशमरूपत्वेननिर्वाणंतदेवकल्पिताभावस्याधिष्ठानात्मकत्वा
त् अविद्यावरणनिहत्यापिगच्छति नित्यप्राप्तमेवप्राप्नोतियतः सर्वदैवब्र
ह्मभूतोनान्यःब्रह्मैवसन्ब्रह्माप्येतीतिश्रुतेः अवस्थितेरितिकाशकृत्स्न
इतिन्यायाच्च २४ ॥

122

सदानन्दीटीका

एवंसर्वोपरांमूलेनाष्टपत्वेनाभिधायैव पुनर्ब्रह्मास्वतानंदप्राप्तिसाधन
मुच्यते १ आत्मसंस्थःसर्वेंद्रियस्यज्ञोराधयंतोनगात्मनि यस्यात्मन्येवविना
नेनवासैरिंद्रियेर्जै:२ वैषयिकंसर्वंतस्यसाधनेनतन्मानिस्तथा एतद्य
यंपरित्यक्तंयस्यसर्वेभाविकेमले ३ भूमिकात्रितयेतेनदर्शितंस्फुटा
स्फुटं पंचम्यादितुरीयान्तेवासिष्ठेकृतनिर्णये ४ समसमाहितधीर्ब्रह्म
सच्चिदानंदमद्वयं अध्यस्तद्वैतशून्यत्वान्निर्वाणमगतागतं अविद्याहृ
तिवाधेनप्राप्तंप्राप्नोतितद्वपुः यज्ज्ञानिनो विषयसारविचारतोन्त्यवै
राग्यदार्ढ्यजसमाधिसुखानुभूतिः विस्मारयत्यखिलबाह्यसुखाभिलाषे
तंतंश्रीमुकुंदमनिशंहृदिभावयेहम् ९ २४ ॥

नीलकंठीटीका

कोसौयोगीयोमुक्तःसदोत्युक्तंतत्राह युंजन्निति सर्वविषयसंगत्यागीति
आरामःप्रीतिर्हेतुःस्यादिभिःसहक्रीडा ज्योतिःक्रीडोपकरणानांप्रका
शः तदेतत्त्रयंयस्यस्वात्मन्येवसोंतःसुखोंतरारामोंतर्ज्योतिश्च तत्रिंद्रिय
द्वारकमितिपर्वशार्थः यएवंभूतःसयोगी किमतोयदेवंब्रह्मनि
र्वाणंगत्वाप्राप्यपरमानंदब्रह्मरूपेहैवाधिगच्छति यतोब्रह्मभूतोजीव
न्नेवब्रह्मदर्शनेनब्रह्मभावंगतः २४ ॥

आनंदीटीका

तदेवस्थामाह – बाह्यस्पर्शेष्वसंगादंतःसंयमेनैवभूमिजेयसुखंयस्यसः तथैवां
तःजितायांभूमिकायामेवारामोभोगार्थविश्रामोयस्य तथैवान्तरे
वज्योतिःप्रज्ञालोकोयस्यसःयोगस्पष्टम् २४ ॥

रामकंठीटीका

अतएवतत्स्वरूपमाह ॥

सुखाद्यमवाप्य
सुखंतत्त्वक्रियाफलमतोनिवृत्तिरारमतेऽस्मिन्नारामः
करणाज्ज्योतिस्तदुभयव्यक्तिहेतुप्रकाशस्तत्त्रितयमप्यंतरात्मन्येवयस्य
मतादृशः सर्वत्रसंवेद्यमानेवस्तुनिविमलितात्मप्रत्ययेनएवब्रह्मभू
तोब्रह्मपरमात्मस्वरूपंप्राप्तः परमेयोगंनिरुत्तरंसमाधिंगच्छतिप्राप्नो
ति [illegible] २४

टीका ज्ञानकाष्ठाधिरोहमाह ॥

अस्यैवयोगिनोभ्यासक्रमेण मनोवृत्तिः ज्योतिर्ज्ञानं
सुखंबुद्धिवृत्तिसंवेद्यं आरामस्तत्त्वतोभ्रमणं
न्द्रियवृत्तिर्यस्यैतानि अंतरात्मन्यात्मन्येवनविषयेषुएवमभ्यासक्रमे
णब्रह्मभूतोजीवन्नेव ब्रह्मात्मभावंप्राप्तःसन् ब्रह्मणिनिर्वाणंलयं
प्राप्नोतिमुच्यतेइत्यर्थः नहियोगाद्यन्तमोक्षमितियोगी तथाचश्रुतिः
ब्रह्मैवसन्ब्रह्माप्येतीति [illegible] २४ ॥

पंचोलीटीका

योंतरिति आत्म
कथंभूतश्चब्रह्मणिस्थितोब्रह्मप्राप्नोतीत्याह
मन्येवांतः आत्मन्येवसुखंयस्यनविषयेषुसः अंतरारामः अंत
आत्मन्येवारामःक्रीडायस्यनबहिःसः यः अंतर्ज्योतिः आत्मन्येव
ज्योतिःप्रकाशोयस्यनसूर्यादिषुसः योगीब्रह्मरूपःसन्ब्रह्मनि
वीणोब्रह्मणिनिवृत्तिंमोक्षंगच्छति २४ ॥

रणवीरसंविद्बोधिनी ॥

योन्तःसुखइतियः अंतर्मनसिसुखंयस्यसद्गुरोःसंनद्धमनाइत्यः
र्थः तथांतरारामः अंतर्बुद्धावेवासमंताद्रमते आरतिंकरोति
त्यंतरारामः तथांतर्ज्योतिः अंतोनिश्चयात्मकंमनःकरणमेव
ज्योतिः कार्याकार्यप्रकाशकंयस्यसयोगी सिद्ध्यसिद्धिविषय
विलेपनादिस्थलक्षणसमतात्मकयोगारूढोविद्याविनयेत्यत्र
लक्षितसाम्ययोगारूढश्चकर्मकोशललक्षणयोगविशिष्ट

123

स्वब्रह्मभूतः ब्रह्मयजुर्वेदो भूः प्रकृतिकारणं यस्य स ब्रह्मभूः सम
स्तस्माद्धेतोः ब्रह्मणि यजुर्वेदे भूनिष्ठा नस्याद्धेतोर्वा ब्रह्मनिर्वा
णं परमेश्वरसायुज्यसुखमधिगच्छति प्राप्नोति ब्रह्मभूत इति प्रथ
मांतं वा ब्रह्मणि यजुर्वेदप्रतिपाद्ये शुद्धे भूतः समः समत्वबद्ध
त्रियर्थः शुक्के स्वादौ हते भूतं प्राशिनोति स मे विशिष्यमरः २७

मथभाष्य

२७॥

और केवल काम क्रोध का वेग जीतने हीसे मुक्त नहीं होय है औ
र भी कहते हैं कि जो अपने अन्तरात्मा मे सुखी औ विषय भोग मे
सुखी नहीं है और जो पुरुष आत्माराम होके आत्माही मे विहार
करता औ बाहर के व्यापार से विरत तथा अन्त प्रकाश है अथवा
आत्माही मे दृष्टि औ नृत्यगीत आदिक विषयों मे दृष्टि नहीं र
खता है सोई योगी इह करे जीवतेही ब्रह्मरूप ब्रह्म मे लीन होता
है २४

दोहा

अंतर सुखी अंतररमें त्यों अंतर ज्योति जोय योगी ब्रह्म निर्वाण
कहं ब्रह्म होय मिलसोय २४॥

124

लभन्तेब्रह्मनिर्वाणमृषयःक्षीणकल्मषाः ।
छिन्नद्वैधायतात्मानः सर्वभूतहितेरताः २५ ।

शांकरभाष्यं

किंचलभन्तइति लभन्तेब्रह्मनिर्वाणंमोक्षं ऋषयःसम्यग्दर्शिनः सन्न्यासिनः क्षीणकल्मषाः क्षीणपापादिदोषाः छिन्नद्वैधाः छिन्नसंशयाः यतात्मानः संयतेंद्रियाः सर्वभूतहितेरताः सर्वेषांभूतानां हिते आनुकूल्येरता अहिंसकाइत्यर्थः २५ ॥

आनंदगिरिकृतटीका

मुक्तिहेतोर्ज्ञानस्य साधनान्तरमाह किंचेति यज्ञादिनित्य कर्मानुष्ठानात्पापादिलक्षणं कल्मषंक्षीयते ततश्च श्रवणाद्यावृत्तेः सम्यक् दर्शने जायते ततोमुक्तिरप्रयत्नेनभवतीत्याह लभन्तइति ज्ञानप्राप्त्युपायान्तरं दर्शयति छिन्नेति श्रवणादिनासंशयनिरसनं कार्यकारणनियमनञ्च दयालुत्वेनाहिंसकत्वमित्येतदपि सम्यक्ज्ञानप्राप्तौकारणमित्यर्थः अन्तरव्याख्याने स्पष्टत्वान्न व्याख्यायते २५ ॥

स्वामिकृतटीका

किंचलभंतइति ऋषयः सम्यग्दर्शिनः क्षीणंकल्मषंयेषां छिन्नं द्वैधंसंशयोयेषां यतः संयतआत्माचित्तंयेषां सर्वेषांभूतानांहितेरताः कृपालवः तेब्रह्मनिर्वाणंमोक्षंलभंते २५ ॥

पिशाचभाष्यं

किंच लभंतेब्रह्मनिर्वाणंमोक्षंमृषयंसम्यग्दर्शिनः सन्न्यासिनः क्षीणकल्मषाः क्षीणपापादिदोषाः छिन्नसंशयाः यतात्मानः संयतेंद्रियाः सर्वभूतहितेरताः सर्वेषांभूतानांहितेआनुकूल्येरताः अहिंसकाइत्यर्थः २५ ॥

रामानुजभाष्यं

छिन्नद्वैधाशीतोष्णादिद्वंद्वैर्विमुक्ताः यतात्मानः आत्मन्येवनियमितमनसः सर्वभूतहितेरताः आत्मवत्सर्वेषांभूतानांहितेषुनिरताः ऋषयःद्रष्टारः आत्मावलोकनपराः एतएवंभूताःक्षीणआत्मप्राप्तिविरोधिकल्मषाः ब्रह्म

निर्वाणं लभंते २५

अभिनवगुप्तकृतटीका

एतच्चैतं साध्यं येषां भेदसंशयरूपो ग्रंथो विनष्टो २५ ॥

परमार्थप्रपाटीका

अत्राधिकारिणमाह लभंत इति ऋषयः सम्यक्दर्शिनः क्षीणकल्मषाः शुद्धचित्ताः छिन्नं द्वैधं संशयो येषां ते यतात्मानः संयत आत्मा येषां ते तथा सर्वेषां भूतानां मुक्त्वा वचनप्राणानां तारतम्यवर्ज्जं हिते रताः एवंविधा ब्रह्मनिर्वाणं लभंते

वनमालीटीका

पापक्षयादेव एतादृशं ज्ञानं भवतीत्याह लभंत इति प्रथमं निःकामकर्माभिः श्रगणपनरूपैः क्षीणकल्मषाः ततोंतःकरणशुद्ध्या ऋषयः सूक्ष्मवस्तुविवेकसमर्थाः संन्यासिनस्ततः श्रवणादिपरिपाकेण छिन्नद्वैधा निहतसर्वसंशयास्ततो मननतिदिध्यासनाभ्यां संयतात्मानः परमात्मन्येवैकाग्रचित्ताः सर्वभूतेषु भगवतोंतर्यामिणो दृष्टात्मसमदर्शिनां पुनेन मुक्तानां वद्भूतेस्पष्टमत्रकम् २५ ॥

वा सर्वभूतहिते रताः छिन्न वत्सर्वभूतहितं वांछंतीत्यर्थः एतादृशाः ब्रह्मनिर्वाणं ब्रह्मणि निर्वृतिं लभन्ते लभंत इ॰

उज्ज्वलवैजयन्तीटीका

एवंभूतेन साधनेन बहवः सिद्धा ब्रह्मनिर्वाणं प्राप्ता इत्याह लभंत इति छिन्नद्वैधाः छिन्नानि शकलीकृतानि द्वैधानि शीतोष्णादिद्वंद्वानि यैस्ते तथा आत्मसाक्षात्कारभवेन तत्त्वेन तेषां मनसि स्पृष्टत्वनान्यविषयेष्वित्यर्थः सर्वभूतहिते रताः स्वस्वरूपवत् सर्वेषां भूतानां हिते रताः प्रीतिमन्तः ईदृशा ऋषयस्तत्त्वद्रष्टारः क्षीणकल्मषाः क्षीणानि क्षयं नीतानि कल्मषाणि चिरकालसंचितानि पापानि यैस्ते तथा एवंभूताः संतः ब्रह्मनिर्वाणस्वरूपं लभंते प्राप्नुवन्ति २५ ॥

मधुसूदनीटीका

मुक्तिहेतोर्ज्ञानस्य साधनांतराणि विहायवन्नाह प्रथमं यज्ञादिभिः क्षीणकल्मषाः ततोंतःकरणशुद्ध्या ऋषयः सूक्ष्मवस्तुविवेचनसमर्थाः संन्यासिनः ततः श्रवणादिपरिपाकेन छिन्नद्वैधाः निहतसर्वसंशयाः ततो निदिध्यासनपरिपाकेन संयतात्मानः परमात्मन्येवैकाग्रचित्ताः एतादृ-

शास्त्रद्वैतादर्शित्वेन सर्वभूतहिते रताः हिंसाशून्या ब्रह्मविदो ब्रह्मनि
र्वाणं लभंते यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मो
हः कः शोक एकत्वमनुपश्यत इति श्रुतेः बहुवचनेन तु यो यो देवानामि
त्यादिश्रुत्युक्ताः नियमदर्शनार्थं २५ [illegible]
[illegible] ॥

सदानंदीटीका

मुक्तिहेत्वात्मबोधस्य साधनांतरमुच्यते आदौ क्षीणमला ये ते छिन्न
शुद्धात्मदर्शिने १ समर्थास्तत आत्मैक्यविचाराच्छिन्नसंशयाः निदि
ध्यासनदार्ढ्येन ब्रह्मण्येकाग्रचेतसः २ अद्वैतात्मधियापीणा सर्वभूत
हिते रताः हिंसाशून्या ब्रह्मविदो लभंते ब्रह्मनिर्वृतिं ३ २५ ॥

नीलकंठीटीका

लभंत इति ऋषयः सम्यग्दर्शिनः छिन्नद्वैधाः छिन्नसंशयाः यतात्
मानो जितचित्ताः २५ ॥

आनन्दीटीका

ऋषयो यथार्थदर्शिनो योगिनः क्षीणं नाशतां सम्भूमिष्ठसंयमेन त
पितं कल्मषं कर्मबंधनं यैः छिन्नं प्रकाशावरणं न याहि गतं द्वैतं संश
यविपर्ययज्ञानं येषां ते महात्मनः प्रधानजयपर्यंतयोगसिद्धाम
हत्वस्वातंत्र्यं प्राप्ता आत्मा येषां अतएव सर्वभूतहिते रताः निर्वाणं प्रशा
न्तं ब्रह्मपदं तत्वं लभन्ते २५ [illegible] २५ ॥

रामकंठीटीका

यस्मात् — ये महात्मनश्छिन्नद्वैधाः त्रुटितद्वैतप्रत्ययात्मकसंसारबंधशृंखलाः य
तः क्षीणकल्मषाः विनष्टाखिलाज्ञानमयमहापातकाः ऋषयः सम्य
ग्दर्शिनः अत एव स्वरूपव्यतिरिक्तं वस्तुजातमपश्यंतः सर्वभूताना
मात्मन इव हिते उत्कलेव स्वनिरताः अभिनिविष्टास्ते निर्वाणं नापवर्ग
येण संस्पृष्टत्वात्प्रशान्तं ब्रह्मपरं तत्वं लभन्ते प्राप्नुवंति न तु ये व्यतिरि
क्तत्वेन विषयान्मन्यमानास्तेभ्यः पलायंते न हि द्वैतवत्पारनिर्मलाः एव २५
[illegible] २५ ॥

गी॰

नकेवलमागमसिद्धः पुरात लाभिध [illegible] टीका नायमर्थः किंतु वर्तमानकाले

टी॰ पं॰ अत्रत्य + सिद्धापीत्याह ॥ + ऋषयो बहवः सम्यग्दर्शिनः सर्वभूतहिते रता मैत्र्यादिसंस्कारसंपन्नाः तदुक्तं मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनमिति अत एव यतात्मानः परामर्शेन स्वीकृतस्वभावा अत एव छिन्नद्वैधा ब्रह्मभावाप्त्या त्रुटितद्वैतप्रत्ययाः अत एव क्षीणकल्मषा विनष्टवैषयिककर्माणः एवंविधाश्च यायिब्रह्मनिर्वाणं ब्रह्मणि लयं लभंते तदुक्तं नारदसंग्रहे यथाग्नेर्भर्जितं बीजं नेह भूयः प्ररोहति [illegible]

[illegible] २५ ॥

पंचोलीटीका

किं च लभंत इति ऋषयः सम्यग्दर्शिनः छिन्नद्वैधाः छिन्नसंशयाः यतात्मानः संयतेंद्रियाः कायवाङ्मनोभिः सर्वानुकूले रताः ब्रह्मनिर्वाणं मोक्षं लभंते २५ ॥

रणवीरसमिद्बोधिनी ॥

लभंत इति ऋषयो राजर्षयो ब्रह्मनिर्वाणमुक्तलक्षणं लभंते तत्र हेतुः क्षीणं स्वधर्माचरणेन नष्टं कल्मषमनेकजन्मार्जितपापं येषां ते क्षीणकल्मषाः अत्रापि हेतुः छिन्नद्वैधाः छिन्नं दूरीकृतं द्वैधं भेदसंशयरूपं यैस्ते अमे गुरुपितामहादयो न हंतव्या इति विशेषदर्शनं भेदः जयो भवेन्न वेत्येवं रूपः अयं युद्धमार्गो हितः स्यान्न वेत्यादि रूपश्च संदेहः अत्रापि हेतुः यतात्मानः निरुद्धांतःकरणाः अत एव ते सर्वेषां सतामसतां च हिते रताः प्रहृताः उद्धृदमनेन निरुपद्रवीकरणं सतां हितं असतां पर्येन पापार्जितपापैककारि देहविनाशनेन स्वर्गादिप्रापणं तद्धितिभावः २५

मध्यभाष्य

लभंतइति क्षीणकल्मषाभूत्वाछिन्नद्वैधायतात्मानः द्वैधा
भावोद्वैधं संशयोविपर्ययोवा तथोक्तं विपर्ययः संशयोवा
यद्द्वैधं यत्नंकृत्वात्मनो ज्ञानासिनावतच्छित्वामुक्तसंगः परंब्रह्म
दिति छिन्नद्वैधास्तएवयतात्मनः दीर्घमनसः सर्वज्ञाइत्यर्थः
तएवछिन्नद्वैधाः तथोक्तम् क्षीणपापामहात्मानोजायंते
गतसंशयाइति छिन्नद्वैधायतात्मनइतिवा सल्लभंचतेषां
ब्रह्मेत्यादि २५॥

127

भाषा अनुवाद

मुक्ति का हेतु जो ज्ञान तिस की साधन उपाय प्रकारान्तर केहि हू
सरी तरह से कहते हैं कि ऋषि कहे सम्यक् दर्शी सन्यासी लोग जो
यज्ञ आदि नित्य नैमित्तिक कर्म करि क्षीण कल्मष कहे निःपाप औ
निःपापहो के श्रवण आदि से ज्ञानके द्वारा छिन्न द्वैध कहे संशय र
हित होगये हैं और जिन का चित्त औ इन्द्रियगण वशीभूत हैं औ
प्राणियों के हितकारी दयालस्वभाव अर्थात् हिंसा रहित हैं वे ब्र
ल मे लयरूप मोक्ष पावते हैं २५ ॥

दोहा

पावें ब्रह्म निर्वाण कहुं ऋषिहुं भय गतपाप क्षीणद्वैत मन
वश सभी भूतहित रत आप २५ ॥

128

कामक्रोधवियुक्तानां यतीनां यतचेतसां
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनां २६

शांकरभाष्यं

किंच कामेति कामक्रोधविमुक्तानां कामश्च क्रोधश्च कामक्रोधौ ता भ्यां विमुक्तानां यतीनां संन्यासिनां यतचेतसां संयतान्तःकरणानां अभित उभयतो जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्तते विदितात्मनां विदितो ज्ञात आत्मा येषां ते विदितात्मानस्तेषां विदितात्मनां सम्यग्दर्शिनामित्यर्थः २६

आनन्दगिरिकृतटीका

एवं कामक्रोधयोर्वेगः सोढव्यो दर्शितः संप्रति तावेव वर्ज्यावित्याह किं चेति ननु दर्शितविशेषवतां मृतानामेव मोक्षो न तु जीवतामिति चेन्नेत्याह अभित इति अस्मदादीनामपि तर्हि प्रस्तुतकामादिप्रभावविधुराणां किमिति मोक्षो न भवतीत्याशंक्य सम्यग्ज्ञानवैशेष्याभावादित्याह वि दितेति उक्तेऽर्थे श्लोकाक्षराणामन्वयमाचष्टे कामक्रोधेत्यादिना २६ ॥

स्वामिकृतटीका

किंच कामक्रोधेति कामक्रोधाभ्यां वियुक्तानां संन्यासिनां संयतचित्तानां ज्ञातात्मतत्त्वानामभित उभयतो मृतानां जीवतां च न देहान्त एव तेषां ब्रह्मणि लयः अपि तु जीवतामपि वर्तत इत्यर्थः २६ ॥

पिशाचभाष्यं

कामक्रोधवियुक्तानां कामश्च क्रोधश्च तौ कामक्रोधौ ताभ्यां वियुक्तानां यतीनां संन्यासिनां यतचेतसां संयतान्तःकरणानामभित उभयतः जीवतां मृतानां च ब्रह्म निर्वाणं मोक्षो वर्तते विदितात्मनां विदितो ज्ञातः आत्मा येषां ते विदितात्मा नस्तेषां सम्यग्दर्शिनामित्यर्थः [illegible]
[illegible]
[illegible]
[illegible]
[illegible] २६ ॥

गी॰
टी॰पं॰

उक्तगुणानां ब्रह्मप्राप्तिः सुलभमित्याह कामक्रोधविमुक्तानामिति य
तीनां यत्नशीलानां यतचेतसां नियमितमनसां जितात्मनां विविक्तमन
सां ब्रह्मनिर्वाणमभितो वर्त्तते एवंभूतानां हस्तस्थं ब्रह्मनिर्वाणमित्यर्थः २६

अभिनवगुप्तकृतटीका

तेषां सर्वतः सर्वास्ववस्थासु ब्रह्मसत्तापारमार्थिकी न निरोधकाल एव तत्र २६

परमार्थप्रपाटीका

किंच कामेति कामक्रोधाभ्यां परमवैरिभ्यां विमुक्तानां यतचेतसां निय
मितमनसां यतीनां संन्यासिनां विदितात्मनां ज्ञातात्मतत्त्वानां
अभितो जीवतां मृतानां वा ब्रह्मनिर्वाणं वर्तते २६॥

वनमालीटीका

पूर्वं कामक्रोधयोरुत्पन्नयोरपि वेगः सोढव्य इत्युक्तमधुना तु तयो
रुत्पन्नप्रतिबंध एव कर्तव्य इत्याह कामेति कामक्रोधयोर्मूलत उत्पत्ति
रेव तद्विमुक्तानां कामक्रोधविमुक्तानां यतचेतसां संयतचित्तानां
यतीनां यत्नशीलानां संन्यासिनां विदितात्मनां साक्षात्कृतपरमात्म
मनां अभितः उभयत्र जीवतां मृतानां च तेषां ब्रह्मनिर्वाणं मोक्षो वर्तते २६

मधुसूदनीटीका

एवंभूतानां शास्त्रवतां योगिनां करामलकवद्ब्रह्मनिर्वाणं भवतीत्याह
कामक्रोधविमुक्तानामिति कामक्रोधविमुक्तानां कामक्रोधाभ्यां विमुक्ता
नां यतचेतसां आत्मनियतानि उपरतानि चेतांसि येषां तेषां तथा।
तेषां विदितात्मनां विदितो ज्ञात आत्मा स्वस्वरूपं येस्तेषां तथा तेषां विज्ञाता
त्मयाथात्म्यस्वरूपाणामित्यर्थः ईदृशानां यतीनां आत्मदर्शिनां परल
परायणमभितः सर्वतः सर्वास्ववस्थासु जाग्रदादिषु जन्मजरा जीवनमर
णादिषु वा ब्रह्मनिर्वाणं मोक्षः संवर्तते एवंभूतानां हस्तगतफ
लवद्ब्रह्मनिर्वाणं भवतीत्यर्थः २६॥

मधुसूदनीटीका

पूर्वं कामक्रोधयोरुत्पन्नयोरपि वेगः सोढव्य इत्युक्तमधुना तु तयोरुत्पत्तिप्रतिबंध एव
कर्तव्य इत्याह॥

यत्न

कामक्रोधयोर्वियोगस्तदनुत्पत्तिरेव तत्कृतानां कामक्रोधवियुक्तानां अत एव वृत्तेः संयतचित्तानां यतीनां यत्नशीलानां संन्यासिनां विदितात्मनां साक्षात्कृतपरमात्मनां अभितउभयतो जीवतां मृतानां च तेषां ब्रह्म [illegible] निर्वाणं मोक्षो वर्तते नित्यत्वात् न तु भविष्यति साध्यत्वाभावात् २६

[illegible] त्वमीश्वरार्पितसर्वभावस्य [illegible] ततः [illegible] [illegible] ब्रह्मनिर्वाणं [illegible] चित्ते [illegible] स्थानीयः [illegible] यते तृतीयेन [illegible] परमात्म [illegible] निर्विवेकः ॥ ॥

सदानंदीटीका

पूर्वमुत्पन्नयोर्वेगः सोढव्यः कामक्रोधयोः उत्पत्तिकालेन तयोर्जन्मप्रतिबन्धार्थमुच्यते १ कामक्रोधवियोगस्तदनुत्पत्तिर्विवक्षिता तदुक्तं यत्नशीलानां समाहितधियां सतां २ साक्षात्कृतात्मतत्त्वानां मृतानां जीवतामपि तेषां हि वर्तते मोक्षो नित्यत्वात् स्वस्वरूपकः ३ २६ ॥

नीलकंठीटीका

किंच कामेति अभितो जीवतां मृतानां च विदितात्मनां ज्ञातात्मतत्त्वानां २६

आनन्दीटीका

एतदेव विशिनष्टि॥

यतीनां निर्जितेंद्रियग्रामाणां तथा यतं संयमनिश्चलीभूतं चेतो येषां अभितः सर्वेषु महत्त्वेन व्यापकत्वेन प्रकाशावरणाद्याहि दितः ज्ञात आत्मा ब्रह्मस्वरूपः यैस्तेषां विदितात्मनाम् २६ ॥

रामकंठी टीका

एतदेव विशिनष्टि॥

ये रागद्वेषादिदोषविदितत्वेन यतचेतसो निगृहीतांतःकरणा न तु विषयविषमत्वेन तेषां विदितात्मनां विज्ञातपरमकारणस्वरूपाणां मुख्यललक्षणफलानां यतीनां परमयोगिनां यथोक्तं निर्वाणं ब्रह्माभितः सामुख्येन वर्तते [illegible] पारयितमार २६ ॥

गी॰ + विकल्पक्षीणचित्तस्तया भूयो न संसृतिरिति न केवलमीदृशां महात्मनां विदेहमुक्तिरेवया
वज्जीवन्मुक्तिरपीत्याह ॥ ~~लासकीबमनमी~~टीका

टी॰चं॰ + विदितात्मनाम् विज्ञातपरमार्थानाम् यतचेतसाम् अत्यानेपि आ-
त्मप्रत्यवमर्शेन नियमितांतःकरणानाम् यतीनां ध्यानयोगाभ्यासपा-
टवेन प्रयत्नशीलानाम् अतएव कामक्रोधवियुक्तानां अभितो जीवतां
मृतानां वा ब्रह्मनिर्वाणं वर्तते जीवन्नपव मुक्ता इत्यर्थः [illegible]
[illegible]
[illegible] २६ ॥

130

पंचोलीटीका

किंच कामक्रोधेति कामक्रोधवियुक्तानां संन्यासिनां संयतांतः-
करणानां अभित उभ[ये] यथा जीवतां [च] मृतानां च ब्रह्मनिर्वाण-
मोक्षं वर्तते विदितात्मनां आत्मविदां २६ ॥

रणवीरसमिद्धोधिनी ॥

कामक्रोधेति उक्तलक्षणकामक्रोधरहितानां यतीनां ति
जितेंद्रियग्रामाणां यतचेतसां स्वायत्तीकृतांतःकरणानां विदि-
तात्मनां विदिताः सर्वैर्ज्ञाताः प्रसिद्धा इति यावत् आत्मानो य-
त्नइति बुद्धिस्वभावा येषां तेषामभितः संपूर्णं समीप एव वा
ब्रह्मनिर्वाणं मोक्षसुखं वर्तते २६ ॥

मधुभाष्य

कामक्रोधेति अभितः सर्वतः ध्यानप्रकारमाह २६ ॥

भाषा अनुवाद

और काम क्रोधसे विमुक्त ज्ञानी जन संन्यासी यतचित्त लोग वि
दित है आत्मा जिन को ते जीवित औ मृत दोनो अवस्था मे मुक्त है
ऐसा नहीं कि देहान्त मे वे मुक्ति पावें गे वे जीवते भी ब्रह्मके सा
य एकरूप होय जीवन्मुक्त ऐसे प्रसिद्ध होते है २६॥

दोहा

कामक्रोधसें रहित जो यती जित चित जोहि भासें ब्रह्म निर्वा
ण सम लखिस्वरूप जिनको हि २६॥

131

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः
प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ २७

शांकरभाष्यं

सम्यग्दर्शननिष्ठानां संन्यासिनां सद्योमुक्तिरुक्ता कर्मयोगश्च ईश्वरा
र्पितसर्वभावेनेश्वरे ब्रह्मार्पणाय क्रियमाणः सत्वशुद्धिज्ञानप्राप्तिस
र्वकर्मसंन्यासक्रमेण मोक्षायेति भगवान् पदेपदेऽब्रवीद्वक्ष्यति चाथ
इदानीं ध्यानयोगं सम्यग्दर्शनस्यान्तरंगं विस्तरेण वक्ष्यामीति तस्य सू
त्रस्थानीयान् श्लोकानुपदिशति स्म भगवान् वासुदेवः स्पर्शानिति स्प
र्शान् शब्दादीन् कृत्वा बहिर्बाह्यान् श्रोत्रादिद्वारेणान्तर्बुद्धौ प्रवेशिताः शब्दा
दयो विषयास्तान् अचिंतयतः शब्दादयो बाह्या बहिरेव कृता भवंति तानेवं।
बहिः कृत्वा चक्षुश्चैवान्तरे भ्रुवोः कृत्वेत्यनुषज्यते तथा प्राणापानौ नासाभ्य
न्तरचारिणौ समौ कृत्वा २७॥

आनंदगिरिकृतटीका

वृत्तमनूद्योत्तरश्लोकत्रयस्य तात्पर्यार्थमाह सम्यग्दर्शनेति ईश्वरार्पित
सर्वभावेनेति भगवति परस्मिन्नीश्वरे समर्पितः सर्वेषां देहेंद्रियमनसां
भावश्चेष्टा विशेषो न क्वचिदपि बहिरेषां व्यापारस्तेनेत्यर्थः कर्मयोगस्य।
नुक्तफलस्य चाभिधानानन्तरमित्यपिशब्दार्थः स्वतो बाह्यानां विषयाणां कु
तो बहिष्करणमित्याशंक्याह श्रोत्रादीति तेषां बहिष्करणं कीदृगित्याशंक्या
ह तानिति २७॥

स्वामिकृतटीका

स योगी ब्रह्मनिर्वाणमित्यादिभिर्योगी मोक्षमाप्नोतीत्युक्तं तमेव योगं दर्शय
न्नाह स्पर्शानिति द्वाभ्यां बाह्या एव स्पर्शा रूपरसादयो विषयाश्चिंतिताः सं
तोंतः प्रविशंति तांस्तच्चिंतापरित्यागेन बहिरेव कृत्वा चक्षुश्च भ्रुवोरंतरे भ्रूम
ध्य एव कृत्वा अत्यंतं नेत्रयोर्निमीलने निद्रया मनो लीयते उन्मीलने च बहिः
प्रसरति तदुभयदोषपरिहारार्थमर्धनिमीलनेन भ्रूमध्ये दृष्टिं निधायेत्यर्थः।
उच्छ्वासनिःश्वासरूपेण नासिकयोरभ्यंतरे चरंतौ प्राणापानौ ऊर्ध्वाधोगतिनि

रोधेन समौ कृत्वा कुंभयित्वेत्यर्थः यद्वा प्राणो यथा बहिर्न निर्याति यथा वा पानोऽन्तर्न प्रविशति किंतु नासामध्य एव द्वावपि यथा चरतः तथा मंदाभ्यामुच्छ्वासनिःश्वासाभ्यां समौ कृत्वेति २७ ॥

पिशाचभाष्यम्

अथेदानीं सम्यग्दर्शनां[illegible]तरंगं ध्यानयोगं विस्तरेण वक्ष्यामीति तत्सूत्रस्थानीयानश्लोकानुपदिशति स्पर्शानिति स्पर्शान् शब्दादीन् कृत्वा बहिर्बाह्यान् श्रोत्रादिद्वारेणांतर्बुद्धौ प्रवेशिताः शब्दादयो विषयास्तानचिंतयतो बाह्या बहिरेव कृता भवंति तानेवं बहिः कृत्वा चक्षुश्चैवांतरे भ्रुवोः कृत्वेत्यनुषज्यते॥

रामानुजभाष्यं

उक्तं कर्मयोगं स्वलक्ष्यभूतयोगशिरस्कमुपसंहरति स्पर्शानिति द्वाभ्यां बाह्यान् विषयस्पर्शान् बहिः कृत्वा बाह्येंद्रियव्यापारं सर्वमुपसंहृत्य योगयोग्यासने ऋजुकाय उपविश्य चक्षुषी भ्रुवोरंतरे नासाग्रे विन्यस्य नासाभ्यंतरचारिणौ प्राणापानौ समौ कृत्वा उच्छ्वासनिःश्वासौ समगती कृत्वा[illegible]

श्रीमनवगनकृतटीका

बाह्यस्पर्शान् बहिः कृत्वा नेत्रीकृत्य भ्रुवोर्वीमदत्तिमाद्दष्टेः श्रोपराग्नि कयोरंतरे तद्रहितस्थानविशेषे वक्रपलक्षितानि समेवेंद्रियाणि विधाय प्राणापानौ पर्मोपमौ वितहृत्यभ्यंतरे साम्येनावस्थाप्यासीत नसतेकेन्नेति नासाम्येन श्रोत्रादि विशाश्चवहरन्तीति तासां विच्छहृत्तिः एतदेव वाह्य

परमार्थप्रपारीका

अथ तमेव योगं संक्षेपेणाह स्पर्शानिति द्वाभ्यां स्पर्शानिति बाह्यान्विषयान् रूपरसादीन् बहिरस्मरणाद्विषयान् कृत्वा हरतो विसृज्य तथा भ्रुवोरंतरे म[illegible]ध्ये चक्षुः कृत्वा अत्यंतं नेत्रनिमीलनेन निद्रा भवति उन्मीलनेन च बहिः प्रसृतिः तदुभयदोषपरिहारार्थमर्धनिमीलनेन भ्रूमध्ये दृष्टिं निधायेत्यर्थः तदुक्तं योगमार्तंडे भ्रुवोरंतर्गतां दृष्टिं मुद्रा भवति शांभवी २७ ॥

वनमालीटीका

परमेश्वरार्पितकर्मणांतःकरणशुद्धिमतः श्रवणादिजन्यज्ञानेनतः

[margin note:]
तस्य शुद्धान्तनिष्ठानां संन्यासिनां सद्यो मुक्तिरुक्ता कर्म योगस्थ ईश्वरार्पितसर्वभावेनेश्वरे ब्रह्मण्याधाय क्रियमाणः सत्त्वशुद्धिज्ञान प्राप्तिसर्वकर्मसंन्यासक्रमेण मोक्षायेति भगवान्परेऽब्रवीदुदयति च

132

स्यासस्ततोविविक्तिनस्त्वेहस्सर्वकर्मभगवदाराधनेरंततः प्रसादस्ततोमोक्ष
इत्युक्तं अधुनासयोगीब्रह्मनिर्वाणमित्यत्रसूचितंध्यानयोगंसम्यग्दर्शा
नस्यान्तरंगंसाधनंविस्तरेणवक्तुमत्रयाणतीयांस्त्रीन्श्लोकानाहषष्ठेपत
स्यैवप्रपंचः तत्रद्वाभ्यांसंक्षेपेणसोयोगउच्यते तृतीयेनतत्फलपर
मात्मत्वानमित्याशयेनाहस्पर्शानिति स्पर्शान्शब्दादीन्बाह्यान्बहिर्भ
वानपिश्रोत्रादिद्वारातत्तदाकारान्तःकरणवृत्तिभिरन्तः प्रविष्टान्पुनर्बहि
रेवकृत्वापरवैराग्यवशेनतत्तदाकारान्तःकरणवृत्तिमनुत्पाद्येत्यर्थः श्रे
तःस्वभावानामप्युपायसहस्रेणापिबहिर्भावोनसंभवतिस्वभावभंगप्रसं
गात् बाह्यानांरागतोन्तःप्रविष्टानांवैराग्येणपुनर्बहिर्भावः स्यादितिद
र्शयितुंबाह्यानित्युक्तं वैराग्यमुक्त्वाभ्यासमाह चक्षुश्चैवांतरेभ्रुवोः कृ
त्वेत्यनुषंगः अत्यंतनिमीलनेहिनिद्राख्यालयात्मिकावृत्तिरेकाभवेत्
प्रमाणेतुप्रमाणविपर्ययविकल्पस्मृतयश्चतस्रोविक्षेपात्मिकावृत्त
योभवेयुः पंचापिहिवृत्तयोनिरोद्धव्याइत्यर्द्धनिमीलनेनभ्रूमध्येचक्षुषोर्नि
धानेनतथाप्राणापानौसमौतुल्यावूर्द्धाधोगतिविच्छेदेननासाभ्यन्तरचा
रिणौकुंभकेनकृत्वेत्यर्थः २७ ॥

उत्तमवैजयन्तीटीका

पवेस्वलक्षणस्यस्वात्मप्राप्तिलभोपायभूतस्ययोगस्यश्रेष्ठत्वमुक्तमि
दानींकर्मयोगमुपसंहरन्समाधिप्रकारमाह द्वाभ्याम्स्पर्शान्कृत्वेति
बाह्यान्बहिःस्थान्स्पर्शान्शब्दादिविषयान् तत्तद्रूपादिचिंतनेनचित्तत
स्थान्बहिःकृत्वातत्तदचिंतनपरित्यागंकृत्वाचेलाजिनकुशोत्तरमितिवत्स
मानप्रकारेणयोगयोग्ये आसनेऋजुकायशिरोग्रीवइतिवत्समानप्र
कारकोयोगीउपविश्यभ्रुवोर्भृकुट्योरंतरेमध्येचक्षुः चक्षुषीकृत्वानेत्रयोः
श्रोन्मीलनेसतिमनसोबहिःप्रसारः संनिमीलनेतुनिद्रयातस्यलयस्या
दतस्तदुभयोर्निवारणायार्द्धनिमीलनेनभ्रूमध्येदृष्टिंनिधायेत्यर्थः न
थैवनासाभ्यन्तरचारिणौनासिकायाः अभ्यन्तरेचरितुंशीलंययोस्तौ
तथाप्राणापानौ ऊर्द्धाधोगतिरूपेणनिरोधेनसमौतुल्यौकृत्वाकुंभयित्वे
त्यर्थः २७ ॥

मधुसूदनी टी०

सर्वमीश्वरार्पितसर्वभावस्यकर्मयोगेनान्तःकरणशुद्धिस्ततः सर्वकर्मसन्न्यासः ततः श्रवणादिपर
स्यतत्त्वज्ञानंमोक्षसाधनमुदीरितमुक्तं अधुनासयोगीब्रह्मनिर्वाणमित्यत्रसूचितंध्यानयोगंसम्य

गदर्शनस्यांतरंगसाधनं विस्तरेण वक्तुं सूत्रस्थानीयांस्त्रीन् श्लोकानाह भगवान् एतेषामेव वृत्तिस्थानीयः कृत्स्नः षष्ठाध्यायो भविष्यति तत्रापि द्वाभ्यां संक्षेपेण योग उच्यते तृतीयेन तत्फलं परमात्मज्ञानमिति विवेकः ॥+

मधुसूदनीटीका

+ स्पर्शान् शब्दादीन् बाह्यान् बहिर्भवानपि श्रोत्रादिद्वारा तत्तदाकारांतःकरणवृत्तिभिरंतः प्रविष्टान् बहिरेव पुनः कृत्वा परवैराग्यवशेन तत्तदाकारां वृत्तिमनुत्पाद्येत्यर्थः यद्येते अंतरा भवेयुस्तदोपायसहस्रेणापि बहिर्निस्सरेयुः स्वभावभंगप्रसंगात्तेषां तु रागवशादंतः प्रविष्टानां वैराग्येण बहिर्गमनं संभवतीति बहिरेव बाह्यानिति विशेषणं तदनेन वैराग्यमुक्ताभ्यासमाह चक्षुश्चैवांतरे भ्रुवोः कृत्वेत्यनुषज्यते अत्यंतनिमीलने हि निद्राख्यालयात्मिका वृत्तिरेका भवेत् प्रसारणे तु प्रमाणविपर्ययविकल्पस्मृतयश्चतस्रो विक्षेपात्मिका वृत्तयो भवेयुः पंचापि तु वृत्तयो निरोद्धव्या इति अर्धनिमीलनेन भ्रूमध्ये चक्षुषो निधानं तथा प्राणापानौ समौ तुल्यावूर्ध्वाधोगतिविच्छेदेन नासाभ्यंतरचारिणौ कुंभकेन कृत्वा

सदानंदीटीका

ईश्वरार्पितचित्तस्य धीशुद्धिः कर्मयोगतः ततः स्यात्कर्मसंन्यासः श्रवणादिपरस्य च १ मोक्षहेतुात्मविज्ञानं भवतीति प्ररोदिते इदानीं ब्रह्मनिर्वाणं सयोगीत्यत्र सूचिते २ विज्ञानसाधनं ध्यानयोगं सांख्ये सविस्तरात् वक्तुं त्रीन् सूत्रस्थानीयान् श्लोकानाह जगद्गुरुः ३ वृत्तिस्थानीय एतेषां षष्ठाध्यायो भविष्यति द्वाभ्यां संक्षेपतो योगस्तृतीये तत्फलं स्मृतम् ४ बाह्याः शब्दादयो बुद्धाविंद्रियैः संप्रवेशिताः वैराग्येणैव तान् बाह्यान् बहिः कृत्वा प्रयत्नतः ५ यद्येते अंतराः स्युस्ते नैवोपायसहस्रकैः बहिर्निस्सारः स्वभावस्य भंगः कर्तुं न शक्यते ६ बाह्यास्त्वंतः प्रविष्टास्तु रागाद्वैराग्याद्बहिस्तदा कर्तुं शक्या विरागेण बाह्यानिति विशेषणात् ७ वैराग्यमतदनेनोक्ता ग्राह्याभ्यासमथोत्तरः अत्यंतमीलने निद्रा प्रसारे विभ्रमोदयः ८ अतोऽर्धमीलनेनैव भ्रूमध्ये चक्षुषोः स्थितिः ऊर्ध्वाधोगतिविच्छेदान्नासाभ्यंतरचारिणौ ९ कुंभकेन समौ कृत्वा प्राणापानौ विचक्षणाः

नीलकंठीटीका

एवं सम्यग्दर्शननिष्ठानां सद्योमुक्तिरुक्ता कर्मयोगस्य संगफलत्यागेन ई-

बा॰

133

स्मरणीत्यर्थमनुष्ठितः सत्वशुद्धिज्ञानप्राप्तिद्वारेणमोक्षायभवतीत्युक्तं ।
अथेदानींसम्यग्दर्शनस्यांतरंगसाधनंध्यानयोगंविस्तरेणवक्ष्यामीति त
त्त्रभूतांस्त्रीन्श्लोकाननुपदिशति स्पर्शानिति अत्रउत्तरार्धेनप्राणायामउ
क्तः स्पर्शान्कृत्वाबहिर्बाह्यानितिप्रत्याहारउक्तः भ्रुवोरंतरेचक्षुः कृत्वेतिधा
रणाउक्ता विगतेच्छाभयक्रोधइतिसाधनभूताःफलभूताश्चद्विविधायमा
नियमाश्चोक्ताः यतेन्द्रियइतिवितर्काख्यःसंप्रज्ञातः यतमनइतिविचाराख्य
यतबुद्धिरित्यानंदास्मिताख्यौ मोक्षपरायणइत्यसंप्रज्ञातउक्तः श्लोकेना
योगफलमितिविभागः पाठक्रममनवरुध्यार्थःक्रमेणात्वर्थःस्पष्टी
क्रियते तत्रविगतेच्छोविगतभयोविगतक्रोधइतिसंबंधः योहीच्छावान्
सइष्टसिद्ध्यर्थंहिंसानृतस्तेयस्त्रीपरिग्रहानिच्छेत् अतोविगतेच्छपदेनत
द्विपर्ययान् अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाइतिसूत्रोक्तान्यमान्
लक्षयति तथाभयेसतिच्छेदशंकानयाप्सुद्धिर्योनशौचसंतोषतपः स्वा
ध्यायेश्वरप्रणिधानानिनियमाइतिसूत्रोक्तान्नियमान्स्वीकर्तुमिच्छेदतो
विगतभयइत्यनेनतेषांग्रहणं तथाक्रोधाक्रांतोमैत्र्यादीन्भावयितुमश
क्तश्चित्तप्रसादनंकर्तुंनशक्नोति तत्रमैत्रीकरुणामुदितोपेक्षाणांसुखदुः
खपुण्यापुण्यविषयाणांभावनातश्चित्तप्रसादनमितिसूत्रितं तत्रविगतक्रोधः
शीतप्रकृतित्वात्सुखितेषुमैत्रींपरस्येष्टेनममैवेष्टमिदंजातमितिभावये
त् तथादुःखितेषुकरुणांपुण्यवत्सुमुदितांपापवत्सूपेक्षांचभावयेत्
नचैतेनप्रसादनेनविनाचित्तादर्शस्यनैर्मल्यंभवति एवंसाधनावस्थाया
यमनियमचित्तप्रसादनानांसिद्ध्यर्थंविगतेच्छाभयक्रोधत्वमीप्सितम्
एवंफलावस्थायामपितदीप्सितं तथाहि संप्रज्ञातसमाधिफलभूतायाम
धुमत्यांयोगभूमौस्थितंयोगिनंप्रतिदेवाःकामाउपतिष्ठंतेतत्रापिविगते
च्छत्वमिष्टं तथाहि स्थान्युपनिमंत्रणेसंगस्मयाकरणंपुनरनिष्टप्रसंगा
दितिसूत्रे स्थानिनोदेवाःतैःउपनिमंत्रणेइहास्यतांइमेरम्यावसथाइमा
रम्यारामाः इमानिजरामरणापहराणिरसायनानीतिइमेवयंकिंकराःस्वयो
गोपार्जितमिदंस्थानंत्वयाभुज्यतामितिप्रार्थनायांक्रियमाणायांसंगोलि
मात्रतनकर्तव्या नापितल्लाभेनात्मनोमहाभागत्वंदेवप्रार्थ्यत्वंमत्वा

गवीपिकृतिव्यस्तयोः संगस्मययोर्भ्रंशादेनत्वादितिसूत्रार्थः तथाभयमपि
द्विविधं योगांतरायरूपंवितर्करूपंच तत्राद्ये व्याधिस्त्यानसंशयप्रमादालस्या
विरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानिचित्तविक्षेपास्तेंतरायाः
दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासाविक्षेपसहभुवइतिसूत्राभ्यामुक्तं ।
स्त्यानमकर्मण्यता अविरतिर्वैराग्ये अंगमेजयत्वंकंपवपुः वितर्काहिंसा
दयस्तद्द्वयंचभयं आद्यस्यनिवारणमीश्वरप्रणिधानेन तथाचसूत्रितं ततः प्र
त्यक्चेतनाधिगमोंतरायाभावश्चेति ततईश्वरप्रणिधानात् द्वितीयस्यप्र
तिपक्षभावनेन तथाचसूत्रितं वितर्कबाधने प्रतिपक्षभावनमिति वितर्का
हिंसादयः कृतकारितानुमोदितालोभक्रोधमोहमूला मृदुमध्याधिमात्रा
दुःखाज्ञानानंतफलाइतिप्रतिपक्षभावनमितिच आदिपदादनृतस्तेयाद
यः हिंसादयः प्रत्येकंकृतकारितानुमोदितभेदेनत्रिविधाः तेपिप्रत्येकंलो
भादिमूलकत्वेनत्रिविधाः तेपिमृदुमध्यमाधिमात्रभेदेनप्रत्येकंत्रिविधाः
तेवमलभूतावितर्कास्त्रयश्चवाराः पंचअधिकावात्रिस्त्रिगुणितानामेकाशी
तिरेतेतत्रशतंपंचविंशत्यधिकंशतं अधिकावाभवंति शाखाप्रशाखाभेदे
नानंताश्च दुःखरूपंअज्ञानरूपंच अनंतफलेयेषांते दुःखाज्ञानानंतफला
इत्यनयाप्रतिपक्षभावनयातेनिवर्तनीयाइति एवंयमनियमचित्तप्रसा
दनप्रतिपक्षभावनैर्निरंतरायेमृदूकृतचित्तोयोगीविविक्तेदेशेआसी
नः संभवादितिन्यायेन स्थिरसुखमासनमध्यासीत तत्रदेशासनेश्रूयेते
समेशुचौशर्करावह्निवालुकाविवर्जितेशब्दजलाश्रयादिभिः मनोनुकू
लेनतुचक्षुपीडने गुहानिवाताश्रयणेप्रयोजयेत् त्रिरुन्नतंस्थाप्यसमं
शरीरंहृदींद्रियाणिमनसासंनिरुध्य ब्रह्मोडुपेनप्रतरेतविद्वान्स्रोतांसि
सर्वाणिभयावहानीति चलादित्यत्रविसर्गलोपश्छांदसः त्रिरुन्नतंकटिव
क्षःकंधराप्रदेशेषून्नतं ततोजितासनः प्राणायाममभ्यसेत् तेनहिमंदग
तोप्राणेमंदत्वाद्धिमनोपिचांचल्यंत्यजति नोचेद्वायुविक्षेपेणाविक्षि
प्येत तत्रप्राणजयप्रकारो प्राणान्प्रपीड्येहसंयुक्तचेष्टः क्षीणेप्राणेनासि
कयोच्छ्वसीतेतिश्रुत्युक्तमेवंस्मरंति प्राणापानौसमौकृत्वानासाभ्यं
तरचारिणाविति प्राणापानौसमौतुलौऊर्ध्वाधोगतिविच्छेदेननासाभ्यं

तश्चारिणीगोऽभकेन कृत्वा ततो बाह्यान् बहिर्भवान् स्पर्शान् विषयसंबं
धान् इंद्रियद्वाराणि नित्यं अंतर्हृदि क्रियमाणान् योगी इंद्रियाणां प्रत्याहरणे
न तान् बहिरेव कुर्यात् ततो विषयेभ्यो व्याहृत्य करणेभ्यस्व प्रकाले इवां
तर्मनोमात्रेणावतिष्ठेत इत्यर्थः इमं प्रत्याहारे कर्त्तुमशक्तस्याविरक्तस्य का
गतिरित्यत आह चक्षुश्चैवांतरे भ्रुवोरिति चशब्दो वार्थे चक्षुरेव वा भ्रुवोरं
तरे कुर्यात् खेचरीमुद्रामभ्यस्येदित्यर्थः सा चोक्ता योगसारे लंबिकोर्ध्व
स्थिते गर्ते जि ह्वां व्याहृत्य धारयेत् दृढासनस्थिरं तिष्ठेत् मुद्रैषा खेचरीम
ता भ्रूमध्यदृष्टिरप्येषा महादेवेन कीर्तितेति एवं सर्वोपि वाह्यविषये
भ्यो संयमो यथोक्तं प्रत्याहारमनुष्ठातुमशक्तान् प्रत्येवोपदिश्यत इति
ज्ञेयं २७॥

आनन्दीटीका

संयमस्वरूपमेवाह २८

ततो नैष्कर्म्ययोगिनः सकाशात्कर्म   रामकंठीटीका योगिनो विशेषं प्रतिपाद
यितुमाह — एवं विधो मुनिर्यतिः मन्त्रोन्नयपरायणः मोक्षपरमेति तत्रापि कामो
न तु मुक्तः हेयोपादेयतावस्थालम्बनविज्ञतया रागद्वेषादिदोषाविर्भावा
वियोगात् यस्मात् इच्छाभयक्रोधाः पूर्वव्याख्याता दुर्वाराश्चित्तदोषाः स
रा नित्यमेव निसर्गनिर्दोषस्वात्ममात्रप्रतिष्ठता हि शिवेशाणनगरास्थिला
तरणेनगताः प्रयुक्ता स्मताद्दृशः कर्मयोगी मुक्तएव यतोस्यात्मनः सा स्मा
त्मतत्त्वाणि स्वभाववश्युद्धा वशात्किं यदा मायावशात्स्वरूपाविमर्शिणीमती
नानादेहाद्यहंप्रत्ययनिरूढा हेयोपादेयं वस्तु वस्तारिणी विषयतमनुभव
तितदा रागादिदोषोपरक्तं चित्तमिति सैवोच्यते यदा तैर्दोषैर्विद्यावशाद्वि
मुच्यते तदा नित्यानन्दनिरुपमनैर्मल्यैकलक्षणं स्वरूपं प्रतिपाद्यमाना
संविन्मात्ररूपैवावशिष्यते यदुक्तं चित्तमेव हि संसारो रागादिक्लेशदूषितं
तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते

२८॥

लाहिकी वमत्सन्तीटीका

अथ सम्यग्दर्शनानन्तरमस्य ध्यानयोगस्य षष्ठेऽध्याये विस्तरेण विवक्षया सूत्रस्थानीयमर्थं
श्लोकमुपक्रमते॥

गी॰
टी॰ पं॰

135

बाह्याः स्पर्शाञ् शब्दादयो विषया श्चिंतिताः संतोंतः प्रविशंति तांश्च
चिंतात्यागेन बहिरेव कृत्वा चक्षुश्चैवांतरे भ्रुवोर्मध्ये कृत्वात्यंतं नेत्रयो र्निमील
ने मनोलोपते उन्मीलने च बहिः प्रसरति तदुभयदोषपरिहारार्थं
देहाहंभावनिमज्जनेन स्वस्वभावोन्मज्जनार्थं च भ्रूमध्ये दृष्टिं संस्थाप्य
तदुक्तं संप्रदायमिमं भद्रे शृणु सम्यग्वदामि ते कैवल्यं जायते संयोने
त्रयोस्तु मात्रयोरिति नासायाः सव्यापसव्यनालीद्वयात्मकस्य म
ध्यावयवस्याभ्यंतरे चरंतौ प्राणापानौ समौ कृत्वा ध्यानयोगबलेन
विषुवत्कृतिं लंबितौ कृत्वा यच्छ्रीमान्वेन स्तंभनेन च अग्नीषोमाव खिलज
गतः कारणौ तौ मम पूर्वैः सर्गादौ ने सृजसि भगवन् ह्रासवृद्धिक्रमेण
तौ वर्तंत विषुवति समौ जनकतामात्मवक्त्रो ह्यावप्यलेनयसि युगपत्
मुक्तये भक्तिं ज्ञामिति ॥२७॥ [illegible]
[illegible]
[illegible]
[illegible] नासाभ्यंतरचारि
णाविति अनूदितम् तथा ध्यानयोगनिष्ठस्य समाधिं प्रवेक्ष्यतो योगिनः
प्राणापानयोर्मध्यनाड्यां प्रशममापन्नयोः समानयोर्या निरिंद्रियप्रदेशेन्त
दिमात्रे विश्रांतिर्विषुवत्संज्ञा सैव समतयेह भगवतो विवक्षिता
तत्कुंभकं अथास्मात्कर्मयोगिनः सकाशाद्द्विलक्षणस्य विशि
ष्टं प्रतिपादयति ॥

पंचोलीटीका

अथेदानीं ध्यानयोगं सम्यग्दर्शनस्यांतरंगसाधनं विस्तरेण प्रव
क्ष्यामीति तस्य सूत्रस्थानीयान् श्लोकानुपदिशति स्पर्शानिति बा
ह्यान् बहिरुत्पन्नान् स्पर्शान् विषयान् शब्दादीन् श्रोत्रद्वारेणांतः
प्रवेशितान् अचिंतयन् पुनः बहिः कृत्वा च पुनः चक्षुर्भ्रुवोरंतरे कृ
त्वा इत्यनुषज्यते प्राणापानौ उच्छ्वासनिःश्वासरूपौ नासाभ्यंतरचरौ
तौ समौ कृत्वा तद्व्यापारनिरोधेन कुंभयित्वा २७ ॥

निरूप्याधुनातत्प्रधान
अंग्यं ससंन्यासं कर्मयोगं फलत्वेनाह प्रकृतिदर्शीयस्त्रादेः सकामान्निर्ग
मूलं वाराणमोक्षविधिं
मनरूपेणापरं ब्रह्मसायुज्यरूपेणच फलेनसफलं प्रकटी
कुर्वन्नाह स्पर्शानिति द्वाभ्यां बाह्यांश्चेतसो बहिरेव संभविनः
बहिर्वर्तमानेभ्यः पितृपुत्रमित्रादिभ्य आगतान् न पुनः स्वा
भाविकान् अथचववयोरेकाहाद्यास्वादयितृरूपीकर्तृयोग्या
नस्पर्शान् इंद्रियैः स्पृश्यमानत्वाच्छब्दादीन्विषयान्विक्षेपक
संकल्पानुत्थ बहिः कृत्वा चेतसः सकाशाद्दूरीकृत्य चेतसाऽ
छीत्वेतियावत् चक्षुश्चैवांतरे भ्रुवोः साटक्षपाठस्तुषोंतरे मध्यएव
कृत्वा वाशास्य लक्ष्यादधुत्यर्थमिति शेषः बाह्यालक्ष्योन्तु
स्वं सम्यग्नुषि संधायेतियावत् तथानसंते कौटिल्येना
सामान्येन कौथवप्राग्वदरंत्यस्यामिति नासाग्रद्भूमिः
यद्वा अनासेतिछेदः आसनमासाग्रुरुस्व दलहत्यप्रत्ययः
नाविद्यते आसा आसनं विश्रमो यत्रेत्यनासाग्रद्भूमिरेव त
स्या अभ्यंतरे मध्येचरितं शीलं ययोस्तौ नासाभ्यंतरचारिणौ
व नसाभ्यंतरचारिणौ वा प्राणापानौ प्राणः अग्न्यादयः प्रा
णिनः अपानारयादयः तावुभावपि समौ कृत्वा विद्यावि
नयेत्यत्रव्याख्यात ॥ २७॥

मधभाष्य

स्पर्शानित्यादिना बाह्यान्स्पर्शान्बहिः कृत्वाऽन्तरेऽन्यादीनियो
गेन नियम्येत्यर्थः चक्षुभ्रुवोरंतरे कृत्वा भ्रुवोर्मध्यमवलो
कयन्नित्यर्थः उक्तंच नासाग्रेवा भ्रुवोर्मध्ये ध्यानीवद्धनिधा
रयेदिति प्राणापानौ समौ कृत्वा कुंभके स्थित्वेत्यर्थः क्षेयमा
रू २७॥

136

भाषा अनुवाद

इसी अध्याय के २४ श्लोक से कहा कि योगी मोक्ष पावै हैं सोई फे
रि संक्षेप से कहते हैं कि शब्दस्पर्श आदि बहिर्विषयों को बाहर
कारि के और बन्द करै दृष्टि को भौंहके मध्य मे राखिप्राण अपान
वायु को सम करि के जृंभकप्राणायाम करैं भ्रूमध्य मे दृष्टि इसलि
ये कहा कि नेत्र बन्द करने से निद्रावश हो मन लय करै लीन हो
जाता और खुले रहने से मन विषयों पर धावता है अध खुले र
खने से भ्रूके बीच निकट दृष्टिरहती है औ दोनो वायु सम करि ना
सिका रन्ध्र से संचार करती है जिसमे प्राण वायु बाहर औ अपान
भीतर संचार न करै इस वास्ते जृंभक प्राणायाम योग करै २७ ॥

दोहा

बाह्य विषयको बहिर्कर नेत्र हूं भृकुटी मांहि ॥
समकर प्राण अपान कहूं नासामे चलतांहि २७ ॥

137

यतेन्द्रियमनोबुद्धि र्मुनिर्मोक्षपरायणः वि
गतेच्छाभयक्रोधो यः सदामुक्तएवसः २८

शांकरभाष्यं

यतेंद्रिय इति यतेंद्रियमनोबुद्धिर्यतानि संयतानिइंद्रियाणि मनोबुद्धिश्च
यस्य सयतेंद्रियमनोबुद्धिर्मननात् मुनिः संन्यासीमोक्षपरायणः एवंदे
हसंस्थानो मोक्षपरायणोमोक्षएवपरमयने परागतिर्यस्यसोयंमोक्षप
रायणो मुनिर्भवेत् विगतेच्छाभयक्रोध इच्छाचभयंचक्रोधश्च इच्छाभ
यक्रोधास्तेविगता यस्मात्सविगतेच्छाभयक्रोधः यएवंवर्त्तते सदा सं
न्यासी मुक्तएवसन् तस्यमोक्षोऽन्यः कर्तव्योनास्ति २८ ॥

आनंदगिरिकृतटीका

विषयप्रावल्यंपरित्यज्यचक्षुरपिभ्रुवोर्मध्ये˄विक्षेपपरिहारार्थंकृत्वाप्रा˄ ध्य
णापानौनासाभ्यंतरचारशीलौसमौन्यूनाधिकवर्जितौ कुंभकेन
निरुद्धौ कृत्वाकरणानि सर्वाण्येवंसंयम्यप्राणायामपरोभूत्वाकिंकुर्या
दित्यपेक्षायामाह यतेंद्रियेति इंद्रियादिसंयमंकृत्वा मोक्षमेवापेक्षमाणो
मननशीलः स्यादित्यर्थः ज्ञानातिशयनिष्ठस्य सर्वदेच्छादिशून्यस्य संन्या˄
सिनोमुक्तेरनायाससिद्धत्वान्नतस्यकिंचिदपि कर्तव्यमस्तीत्याह विगतेति
पूर्वार्धोत्तराणिव्याकरोतियतेत्यादिना द्वितीयार्धोत्तराणिव्याचष्टेविगतेत्यादिना

२८

स्वामिकृतटीका

अनेनोपायेननियताःसंयताःइंद्रियमनोबुद्धयोयस्यमोक्षएवपरमयनं
प्राप्यंयस्यातएवविगताइच्छाभयक्रोधायस्ययएवंभूतोमुनिः स
सदाजीवन्नपिमुक्तएवेत्यर्थः २८ ॥

पिशाचभाष्यं

तथा यतेंद्रियमनोबुद्धिः यतानिइंद्रियाणिमनोबुद्धिश्चयस्यसः यतें
द्रियमनोबुद्धिर्मननान्मुनिःसंन्यासीमोक्षपरायणः मोक्षमेवपरमय
नेपरागतिर्यस्यसः यएवंवर्त्ततेसंन्यासीसदामुक्तएवनतस्यमोक्षादन्यः˄

गी· यः कर्तव्योस्ति २८
टी·पं· आत्मावलोकनादन्यत्र प्रवृत्त" रामानुजभाष्यं

138

"नेंद्रियमनोबुद्धिः अत एव विगतेच्छाभयक्रोधो मोक्षपरायणो मोक्षैक
प्रयोजनो मुनिरात्मावलोकनशीलो यः सदा मुक्त एव सः साध्यदशाया
मिव साधनदशायामपि मुक्त एव स इत्यर्थः २८

अभिनवगुप्तकृतटीका

एवंविधो योगी सर्वव्यवहाराननुवर्तयन्नपि मुक्त एव २८

परमार्थप्रपाटीका

नारोगो मरणं तत्र न निद्रा न तृट्भयं इति तथा नासाभ्यंतरचारिणौ प्रा
णापानौ समौ कृत्वा कुंभयित्वेत्यर्थः अनेनोपायेन कृतेन संयतेंद्रियमनो
बुद्धिर्मुनिर्मननशीलः मोक्षपरमयनं गतिर्यस्य स तथा अत एव
विगतेच्छाभयक्रोधः स सदैव मुक्तः जीवन्मुक्तो वा मुक्तः स्यादित्यर्थः
तदुक्तं टिप्पणीकारैः पराहंतेचितं यदि भवति वाल्यव्यवहृतेरसत्ता याः
सत्यं कलयति तदाभ्यासवशतः स्वधातेः संविष्टः स्वात्मानमनुभवन् स्वम
मघानेनत्वेषामनातैपऽवनरपि च भोक्तुं प्रयतते अथ निरूपितार्थविष
यैः सर्वशाखोक्ताः श्रुतयश्च तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवी
व चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिंधते तद्विष्णोः परमं प
दं अत्र एव भाष्यं विष्णोर्व्यापनशीलस्यापि परमात्मनः तस्य परमं पा
"स्या रमार्थिकं पदमभिव्यक्तिं नेदं विमृष्टिं भ्रममध्ये वर्तते त्रिपादस्यामृतं
दिवीति श्रुतेः सत्यज्ञानानंदात्मकं विष्णोः परं तद्धि सूरयो महान्तो भा "ग
वाश्चद्राततं विस्तृतमिव चक्षुर्वा सदा प्रतिपादनेन पश्यंति निरंतरं
सात्मकं वेति यद्वा चक्षुरर्थप्रकाशकं इव एवकारार्थे आततमपरिच्छिन्न
मेव यथा स्यात्तथा पश्यंति तत्तस्माद्विप्रासो विप्राः श्रेष्ठमतयः विपन्यवो
मेधाविनः जागरांचक्रुरिति जागृवांसः दृष्टप्रपंचाद्वीर्य स्वमात्मका
ग्राजागरे प्रामा इत्यर्थः मोक्षवदनुभूयमानेन परं समिंधते सम्यक्छिंन
यंति सर्वात्मकत्वेन पश्यंति अत्रैतदुक्तं भवति अभ्यासदशायां सह

स्मा विवरेण भूमध्ये प्रापितया दृष्ट्या तं पश्यंतीति व्यवहाराद्दृश्यायेत
सकलविषयप्रतीतिरूपेण तदेव पश्यंतीत्यर्थः अथैतदर्थे सामारा
ण्यके अन्या श्रुतिरपि चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्या
ग्नेः आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्चेति भाष्य
द्योतंत एतस्यार्थान् प्रकाशयंतीति देवाश्चरणयास्तेषां मध्ये चित्रं रूपरस्म
ष्णीगेयग्राह्यग्राहकं अनीकं तेजः समूहरूपं उदगादुदयं प्राप्तं किंभूतं
मित्रस्य वरुणस्याग्नेर्दैतस्य वरुणः प्रकाशकं तत्र चक्षुरिव चक्षुरित्यर्थः अथै
वंविधोपि न तत्तद्रूपेणापरिच्छिन्नः किंतु द्यावापृथिवी यां पृथिवीं अंत
रिक्षमाकाशं च आप्राः आपूरितवान् व्यापकस्त्यर्थः तथा सूर्यस्तत्प्र
काशकस्मात्तापकः यतो जगतो जंगमस्य तस्थुषः स्थावरस्य चांतर्यामी
अथ प्राणापानाविति अत्र प्रानपथी श्रुतिः तस्मादेकमेव व्रतं चरेत्प्राण्या
च्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति यद्यु चरेत्समापिपयिषेत्
नो एतस्यै देवतायै सायुज्यं सलोकतां जयति य एवं वेद भाष्यं अथातो
व्रतमीमांसेत्यादिना चक्षुरादिव्रतमात्मत्वेनोपयोगि न भवतीत्युक्त्वा य
क्रम्य तस्मादित्युपसंहरति तस्मात्कारणादेकमेव व्रतं चरेत् तत्किं प्रा
ण्याच्चैवापान्याच्चेति प्राणाज्जातः प्राण्यः अपानाज्जातो अपान्यो याय
म भामस्त्स्मात्स्वात्प्राणापानव्रतं चरेदित्यर्थः अथ तत्किंकारणमित्या
ह नेदिति निपातो निषेधार्थे पाप्मा घातको मृत्युर्मा इति मां नेदाप्नु
वत् नागच्छतीति अथ उ इति निश्चितं यद्येतद्व्रतं चरेत्तर्हि समापिपयिषेत्
तत्समाप्तिं नेतुमिच्छेत् यावत्प्राणायामः सिद्धस्तावत्तत्त्यजेदित्यर्थः यत
तेनैव व्रतेन उ इति निर्धारणे एतस्यै इति वचनव्यत्ययः पंचम्यर्थेभिहितः एत
स्याः मुख्यप्राणदेवतायाः सायुज्यं सलोकतां जयति प्राप्नोति य एवं वेद
तथा अंतस्मरतिरोचनास्य प्राणादपानतीत्यादि सामासाप्यकमपि दर्श
नीयम् २८॥

वनमालीटीका

उक्तोपायेन संयतानींद्रियमनोबुद्धयो येन सः मोक्षपरायणः सर्वविष
यविरक्तः मुनिर्मननशीलः विगतेच्छाभयक्रोधः व्याख्यातं प्राक् यतात्
मोदेहादौ वर्तमानोपि मुक्त एव सः २८॥

गी॰
टी॰ ५

139

[illegible]वैजयन्तीटीका

किंच यतेंद्रियमनोबुद्धिः यता नियमिता इंद्रियमनोबुद्धयो येन स त
था आत्मदर्शनादन्यत्र प्रवृत्ता योगेंद्रियमनोबुद्धिरित्यर्थः मोक्षपरा
यणः मोक्ष एव परमत्युत्कृष्टमयनं प्राप्यस्थानं यस्य स तथा मोक्षैकप्र
योजन इत्यर्थः विगतेच्छाभयक्रोधो यस्मात्स तथा यद्वा भयं च क्रोध
श्च भयक्रोधौ न भयक्रोधावभयक्रोधौ इच्छा चाभयक्रोधौ चेच्छाभयक्रो
धाः विशेषेण गताः प्राप्ता इच्छाभय[illegible]
[illegible]
धा येन स तथा आत्मप्राप्तीच्छा यमादिभ्यो मरणरूपेभ्यो भयं विघ्न
कारिभ्यो देवादिभ्यः क्रोधं प्राप्त इत्यर्थः अत एवंभूतो यतो मुनिरात्म
स्वरूपमननशीलः ईदृशो यो योगी आत्मावलोकनायैवाष्टांगयोगा
भ्यासी स सदैव साधनसिद्धावस्थायामेव मुक्त एव प्रकृतिविभक्ता
त्मावलोकेनैव प्रयोजनतयान्यविषयाप्रयोजनाभावान्मुक्त एवेत्यर्थ

मधुसूदनीटीका

अनेनोपायेन यताः संयता इंद्रियमनोबुद्धयो यस्य स तथा मोक्षपरा
यणः सर्वविषयविरक्तत्वान्मुनिर्मननशीलो भवेत् विगतेच्छाभयक्रोधय
इति वीतरागभयक्रोधः पूर्वत्र व्याख्यातः य एतादृशो यः संन्यासी सदा भव
ति मुक्त एव सः न तु तस्य मोक्षः कर्तव्योऽस्ति अथवा य एतादृशः स
दा जीवन्नपि मुक्त एव २८ ॥

सदानंदीटीका

संयता इत्युपायेन यस्येंद्रियमनोधियः विषयान्विषवत्त्यक्त्वा सम्मति
मोक्षतत्परः । इच्छादिरहितो योगी जीवन्नेव विमुच्यते २ २८ ॥

नीलकंठीटीका

यतेंद्रियेति यस्मिन्कस्मिंश्चित्स्थले विषये स्थैर्येण दृष्टिमुखा विस्मृत्य
तिमायां वा नासाग्रे धनौ वान्यत्र वा बहिराधाय तेन महाराज मनो धारयेत् ।
नेत्र मनसा हृदिच्छायाकारेण प्राप्तैतत्रैव स्थिरताभ्यासेन विश्रांते स्वदेहम
पि न पश्यति सेयं महाविदेहा नाम धारणा अस्यां सिद्धायामिंद्रियगणः

स्वे स्वे विषये न तद्गृह्णाति सोऽयं बहिर्विषयप्रत्याहारः पूर्वोक्तस्त्वांतर इति
भेदः अत एव तयोः स्वल्पफलत्वं सूत्रितं ततः क्षीयते प्रकाशावरणमिति
ततः अभ्यंतरप्रत्याहारात् तथा बहिरकल्पिता वृत्तिर्महाविदेहा ततः संयमात्
प्रकाशावरणक्षय इति यदा चित्तं देहमविस्मृत्यैव हठेन बहिःस्थितमूर्त्यां या
कारं क्रियते तदा सा चित्तस्य मूर्त्याकाररूपा वृत्तिः कल्पिता यदा तु निरवशेष
णा देहं विस्मृत्य चेतः केवलं ध्येयाकारमात्रं भवति तदा सा महाविदेहा ना
म धारणा तस्या अपि फलं तदेव तत्संयमात् तस्यां चेतसो निग्रहात् प्र
काशावरणक्षयो भवति सोऽयं वा सविषयः समाधिः वितर्काद्यैर्द्विवि
धः सवितर्कनिर्वितर्कभेदात् तत्राद्यस्य लक्षणं सूत्रितं शब्दार्थज्ञान
विकल्पैः संकीर्णा सवितर्केति सवितर्का नाम समापत्तिः समाधिविशे
षः यदा विष्णुप्रतिमादौ पूर्वापरानुसंधानेन शब्दार्थोल्लेखेन च भावना
प्रवर्त्तते तदा सवितर्का समापत्तिः अस्मिन्नेवालंबने पूर्वापरानुसंधा
नेन शब्दार्थोल्लेखनमंतरेण भावना प्रवर्त्तते तदा निर्वितर्का नाम समाप
त्तिः तथा च सूत्रं स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वित
र्का स्मृतेः शब्दार्थस्मरणस्य परिशुद्धौ वर्जने सति भावयितुः स्वरूपेणाशू
न्या तदाहमिदं भावयामीत्येवमाकारा वृत्तिरपि भावयितुर्नास्तीवेति भा
ति यतोर्थमात्रनिर्भासा ध्येयार्थमात्रमस्याभासते न तत्त्वमस्तीति सूत्रार्थः
अस्यां सिद्धायां योगी जितेंद्रिय इत्युच्यते जितमना इति आभ्यंतरप्रत्याहा
रपूर्वकं यदा मनः कल्पिते सूक्ष्मे विषये पूर्ववत् शब्दार्थोल्लेखपूर्वकं तद्वर्जं
वमनसो भावना प्रवर्त्तते तदा ते उभे समापत्ती सविचारनिर्विचाराख्ये भव
तः तथा च सूत्रं एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्यातेति
अत्र सूक्ष्मविषयेति ग्रहणात् पूर्वस्याः स्थूलविषयत्वं गम्यते एतयैव द्विवि
धवितर्कसमापत्त्यैव निर्विचारसमापत्तौ दृढायां योगी जितमना इत्युच्यते
यदा पुनरत्र तमसो मूर्त्याकारतां परित्यज्य सत्त्वोद्रेकात् समष्टिमनोमयवि
षयाः अहमेवेदं सर्वोऽस्मीत्येवमाकारा भावना प्रवर्त्तते सोऽयं सानंदः समा
धिः यदा तु तामपि भावनां परित्यज्य विषयवेदनमंतरेणास्मीत्येतावन्
मात्राकारा भावना प्रवर्त्तते सास्मिता अस्मिताहंकारयोर्भेदस्तु क्रमेणावि
षयवैस्मात्वेन तदाभिमानमात्रकृतः यथैक एव पूर्वाभिमुखः पश्चिमाभि

गी॰
टी॰ पे॰

मुखबोधेतितद्वत् अस्यामवस्थायांयोयोगीबुद्धितःविविक्तस्वात्वंपदार्थस्य
मात्मत्कारात् जितबुद्धिरित्युच्यतेतदेतदुक्तं यतेंद्रियमनोबुद्धिरिति प
तांश्चवशमायनानिगुणपर्वाण्युच्यंते तथाचसूत्रं विशेषाविशेषलिंगमा
त्रालिंगानिगुणपर्वाणीति तत्रविशेषाःस्थूलभूतानिएकादशेंद्रियाणि
च अविशेषाःपंचतन्मात्राणिअहंकारश्च लिंगमात्रंमहत्तत्वं अलिंगंप्रधा
नं तत्रविशेषादविशेषेषुप्रविविक्ततोयोगिनोदैनंदिनलयाभ्यासात्समन
स्कानींद्रियाणिलीयंतेसलयः बहिर्मेवाभिवचाभवतिसविक्षेपः प
वं अविशेषेभ्योलिंगमात्रेविविक्ततोपिलयविक्षेपोक्तः लिंगमात्रात्परं
कृषंश्रविविक्ततोपितोक्तः तावेतौलयविक्षेपौद्वयोश्रूयेते लयविक्षेपर
हितेमनःकृत्वासतिश्चले यदायात्युन्मनीभावंतदातत्परमंपदमिति प
तेश्वत्रिश्चलीनेष्वाद्यःक्रमएव द्वितीयोविगलितदेहाहंकारत्वाद्विदेहसं
वंसयोविदेहप्रकृतिलयानामिति भवप्रत्ययोजन्मांतरहेतुरेषांसमा
धिर्भवति यद्वाजन्मांतरेपितेषांजन्मनैवसमाधिसिद्धिः एतिराणामाको
सिद्धं यदातुअस्मितामात्रस्यापिनिर्विकल्पेचिन्मात्रेलयोभवतितदा
यंविद्वान्कैवल्यधर्ममेवसमाध्याख्यमनुभवति यमपिकृत्यश्रूयते ।
तमेकंकृतशतस्यवतः समस्ताःयत्फलंतदवाप्नोतीति अयमेवम
स्यामेवावस्थायांयोयोगीजीवन्मुक्तइत्युच्यते विगतेच्छाभयक्रोधइति
पादःप्रागेवव्याख्यातः यएवंभूतः ससदामुक्तः वंधप्रतीतिकालेपिस
कालत्रयेपिअसक्तोज्ञानमिथ्यात्वंदर्शितम् २८ ॥

स्रप्रकाशार्थमिदम् [interlinear: ठयंस्लोवम्] ज्ञानेश्वरीटीका
[highlighted:] ... म ... योगमार्गमाग्य ... मासूत्र ...
... २८ ॥

रामकंठीटीका

तदेवंसन्नेवविषयेष्वरागादिमुन्मेषमुन्मत्तात्परमार्थसमापन्नःकर्मयोगीजीवन्नेवमु
यस्त्वेतद्वातिरिक्तलक्षणःएवंविधोयोगीसपरमात्मप्रवणएवनतुमुक्तःकीदृशः ॥

यतेंद्रियमनोबुद्धिः यतानिनिगृहीतानिइंद्रियाणिकरणानि मनबुद्धि तंसं
कल्पात्मकंबुद्धिरध्यवसायात्मिकायेनसतादृशः किंकृत्वैवंविधः वाह्यानू
गात्मत्वेनव्यतिरिक्तान्वाह्यादीन्स्पर्शानिंद्रियैः स्पृश्यमाणात्स्पर्शाञ्छब्दवा
द्यान् विषयान्वहिःकृत्वेन्द्रियैरग्रहणेनवेनसोव्यतिरिच्यतेनविषो
वेणोंद्रियाणांविषयेभ्यः प्रत्याहारलक्षणंयोगांगंप्रतिपादितं तेनएवं
भावीन्यासमनप्राणजयादीन्यांगान्यातिमाति अयतः किंकृत्वाभ्रुवोरंत
रेचक्षुमध्येवर्त्तदर्शनप्राक्किंकृत्वेत्यनेनापिधारणालक्षणंयोगांगमुक्तं
चक्षुमध्यलक्षणेदेशनेत्रमात्रालंवनतया विन्नस्यवंधोहि अनेनोक्तः
किंचनासाभ्यंतरचारिणो नासायामध्यायस्थनाडीद्वयात्मकस्यमुखे
वयवस्याभ्यंतरेचरितेशीलेययोस्तौ तथाविधौप्राणापानौसंपाद्येत्यने
नैमाकृतौसमौयोगाप्रयेतनस्वरूप तथावहनात्समानौसमाश्रयेत
नैकत्वबुद्धिंसंपाद्यध्यानलक्षणंयोगांगमुक्तम् एकवस्त्वालंवनेन
तः करोतिध्यानसंपत्तिस्तद्वलाहिधुवस्मृतिःप्राणापानौसमाश्रयेत
रतित्रिविधेनकर्मणायतेंद्रियमनोवुद्धिर्योगीप्रत्याहारधारणाध्यान
पर्यंतेयोगांगैःकर्मप्राप्तोभवति ननवुद्धेरत्यंततिरोधानाभावात्समाधि
समावधिरूपः सत्यस्यदेहविमुक्तिं विनानसिध्यत्यादेहस्थितेर्बुद्धिवृत्ति
संस्कारशेषस्यसत्वाभ्युपगमात् एवंचित्तवृत्तिनिरोधलक्षणायोगाभ्यास
निष्ठस्ययोगिनः सकाशात्स्वदास्वरूपप्रतिष्ठसंवितर्कसमयोगीविशिष्टःप्र
तिपादितः सहि २८ ॥

लासिकीटीका

+यस्यविच्छाभयक्रोधाद्विनिर्दोषाः सर्वदाविसर्गतोविशेषेणगताः
सएवतः सतादृशोब्रह्मभूतोमुक्तएवरस्यर्थः २८ ॥

पंचोलीटीका

किंचयःमुनिः यतेंद्रियमनोबुद्धिः यतानीइंद्रियाणिमनोबुद्धि
र्यस्यसः मोक्षपरायणः मोक्षएवपरमागतिर्यस्यसः विगतेच्छा
भयक्रोधः यः एवंवर्ततेसः संन्यासीसदामुक्तएव २८ ॥

समदर्शित्वेन लक्ष्यीकृत्य योमुनिः मनुते गुरुणा शास्त्रोपदिष्टम
र्थं याथार्थ्येन निश्चिनुत इति मुनिः यद्वा किं नो राज्येन गोविंद किं
भोगैर्जीवितेन वा इत्येवं प्रकारानेकविधविकल्पोत्थापक वाक्या
लापे मंदादरत्वेन जोषं स्थितः अत्र देवतान्मंत्रान्मंत्रान्संस्मरन्वा
यतेंद्रियमनोबुद्धिः यतानि स्वायत्तीकृतत्वेन स्वकार्यप्रच्यावक
शब्दादिविषयविक्षेपकसंकल्पसंघायेभ्यः प्रत्यावर्तितानि इंद्रि
याणि चक्षुरादीनि मनः संकल्पात्मकं चित्तं बुद्धिरध्यवसायात्मि
का च येन सः अत एव विगतेच्छाभयक्रोधः इच्छा पुत्रमित्रादिवि
षयः स्नेहः प्रवृत्तिनिरोधकः भयं महाबलेभ्यः परेभ्यः सकाशा
जातं यद्वा कथमहं दुष्टेभ्यस्त्वं बंधून्घातयित्वा जीवामीत्येवं रूपस्त्रा
सः क्रोधः सर्वेषां बधादीनां विच्छेदकोयं युद्धमार्गः कथं हितः स्या
दिति द्वेषः एतत्त्रयेण रहितः केवलं मोक्षपरायणः मोक्षे वाण
मोक्षेपरायणस्तत्परो भवेत् स सदा मुक्त एव बंधूनादेः सकाशाद्
बन्धूनघातयित्वा निर्गमः स्यात् न केन विद्वोढुं प्राकृत इति भावः अथ
च परब्रह्मसायुज्यं प्राप्नुयाद्भवेदिति २७ ॥ २८ ॥

मयभाष्य

२८ ॥

भाषा अनुवाद

और इसी उपाय से जिस की इन्द्री औ मन बुद्धि आदि वशीभूत है और मुक्ति प्राप्ति के योग्य है और जिस ने इच्छा भय क्रोध को दूर किया है ऐसे शरीरों से सदा मुक्त जो मुनि सो जीवन काल मे भी मुक्त अर्थात बद्द कर्म रहित जीवन्मुक्त है २८

दोहा

इंद्रि मनबुद्धि वशकरे मोक्षयुक्त मुनिजोय इच्छाक्रोधभय रहित है सदामुक्त यह सोय २८॥

142

भोक्तारंयज्ञतपसां सर्वलोकमहेश्वरम् सु
हृदंसर्वभूतानां ज्ञात्वामांशान्तिमृच्छति २९
इतिश्रीभगवद्गीतायांयोगशास्त्रेश्रीकृष्णार्जुन
संवादेसंन्यासयोगोनामपञ्चमोऽध्यायः ५

शांकरभाष्यं

एवंसमाहितचित्तेनकिंविज्ञेयमिति चोच्यते भोक्तारमिति भोक्तारं य
ज्ञानांतपसांच कर्तृरूपेण देवतारूपेणच। यज्ञसर्वलोकमहेश्वरं सर्वे
षांलोकानां महान्तंईश्वरं सर्वलोकमहेश्वरं सुहृदंसर्वभूतानां सर्वप्रा
णिनां प्रत्युपकारनिरपेक्षतयोपकारिणं सर्वभूतानां हृदयेशयं सर्व
कर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणंमांनारायणंज्ञात्वा शान्तिंसर्वसंसारो
परतिमृच्छति प्राप्नोति २९ ॥ ॥
इतिश्रीभगवद्गीताशांकरभाष्येपंचमोऽध्यायः ५ ॥ ॥

आनंदगिरिकृतटीका

अधिकारिणोयथोक्तस्य कर्तव्याभावे ज्ञातव्यमपि नास्तीत्याशंक्यप
रिहरति एवमित्यादिना। प्रसिद्धंभोक्तारं व्यवच्छिनत्ति सर्वलोकेति ततो
न्यस्य वन्ध्याविपर्ययादितिन्यायेन सर्वफलदातृत्वं दर्शयति सुहृदमि
ति उक्तेश्वरज्ञानेफलं कथयति ज्ञात्वेति यज्ञेषु तपःसुच द्विधाभोक्तृत्वं
व्यनक्ति कर्तृरूपेणेति हिरण्यगर्भादिव्यवच्छेदार्थंविशिनष्टि महान्त
मिति स्वपरिकरोपकारिणं राजानंव्यावर्तयति प्रत्युपकारेति ईश्वरस्य
ताटस्थ्यमुदस्यति सर्वभूतानामिति तर्हि तत्तत् व्यवस्थितकर्मतत्
फलसंसर्गित्वंस्यादित्याशंक्याह सर्वकर्मेति नचतस्यअहितहानिसंब
न्धोपि वस्तुतोऽस्तीत्याह सर्वप्रत्ययेति यथोक्तेश्वरपरिज्ञानफलमभिद
धातिमांनारायणमिति तदेवंकर्मयोगस्य मुख्यसंन्यासापेक्षतया प्रशान्त
त्वेऽपि ततोमुख्यसंन्यासस्याधिकारात्हतोउद्दिष्टआरुरुक्षोः कामक्रोधो
द्भवंवेगमिहैव सोढुंशक्तस्य प्रामरशमादिमतोयोगाधिकृतस्यत्वंपदार्थो

143

भिन्नस्य परमात्मानं प्रत्यक्त्वेन जानतो मुक्तिरिति सिद्धं २९ ॥
इति श्रीआनन्दगिरिकृतटीकायां पंचमोऽध्यायः ५ ॥

स्वामिकृतटीका

ननु एवमिंद्रियादिसंयममात्रेण कथं मुक्तिः स्यात् न तावन्मात्रेण किं तु ज्ञानद्वारेणेत्याह भोक्तारमिति । यज्ञानां तपसां च स्वभक्तैः समर्पितानां तदिज्यया भोक्तारं पालकमिति वा सर्वेषां लोकानां महान्तमीश्वरं सर्वेषां भूतानां सुहृदं निरपेक्षोपकारिणं अन्तर्यामिणं मां ज्ञात्वा मत्प्रसादेन शान्तिं मोक्षमृच्छति प्राप्नोति २९ विकल्पशंकापोहेन यन्नेवं सांख्ययोगयोः समुच्चयः क्रमेणोक्तः सर्वज्ञं नौमि तं हरिं २९ ॥
इति श्रीभगवद्गीतायां सुबोधिन्यां टीकायां पंचमोऽध्यायः ५

पैशाचभाष्यं

एवं समाहितचित्तेन किं विज्ञेयमित्युच्यते भोक्तारमिति । यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च भोक्तारं सर्वलोकमहेश्वरं सर्वलोकानां महान्तमीश्वरं लोकमहेश्वरं सुहृदं सर्वभूतानां सर्वप्राणिनां प्रत्युपकारनिरपेक्षतया उपकारिणं सर्वभूतहृदयेशं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं सकललोकबीजभूतं सदा शुद्धस्वरूपं मत्स्वेतसविमलज्योतिषां परमात्मानं नारायणं मां ज्ञात्वा शान्तिं संसारोपरतिमृच्छति प्राप्नोति २९ ॥
इति श्रीपैशाचभाष्ये पंचमोऽध्यायः ५

रामानुजभाष्यं

उक्तस्य नित्यनैमित्तिककर्मेतिकर्तव्यताकस्य कर्मयोगस्य योगशिरस्कस्य सुशकतामाह भोक्तारमिति । यज्ञतपसां भोक्तारं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिमृच्छति कर्मयोगकरण एव सुखमृच्छति सर्वलोकमहेश्वरं सर्वेषां लोकेश्वराणामपीश्वरं तमीश्वराणां परमं महेश्वरमिति श्रुतेः मां सर्वलोकमहेश्वरं सर्वसुहृदं ज्ञात्वा मदाराधनरूपः कर्मयोग एव सुखेन प्रवर्तत इत्यर्थः सुहृदाराधनाय सर्वे प्रवर्तन्ते
इति श्रीभगवद्गीतायां रामानुजाचार्यविरचिते भाष्ये पंचमोऽध्यायः ५

अभिनवगुप्तकृतटीका

यज्ञफलेषु भोक्तृत्वात् तत्कालत्वात् एवं तपस्वीदृशं भगवत्तत्त्वं विदित्वा
यात तथा स्थितोपि मुच्यत इति शिवम् ॥ २९ ॥ अत्र संग्रहश्लोकः सर्वाण्येवा
भूतानि समत्वेनानुपश्यतः जडवद्व्यवहारोपि मोक्षायैवावकल्पते ॥
आचार्याभिनवगुप्तविरचिते श्रीगीतार्थसंग्रहे पंचमोध्यायः ५ ॥

परमार्थप्रपाटीका

अथ महाकार्ये विघ्नानां बाहुल्यात् मनोबुद्धीन्द्रियनिग्रहोपायं स्वयं विनाक
तेमशक्य इत्याह भोक्तारमिति । सर्वभूतानां सुहृदं परमप्रेमास्पदमंतर्यामी
मिनं मां ज्ञात्वा शांतिं मोक्षमृच्छति प्राप्नोति अथ तदेवाह किंभूते सर्वयज्ञा
नां तपसां वा भोक्तारं सर्वदेवांतर्यामित्वात् सर्वलोकमहेश्वरं सर्वलो
कानां भूर्भुवः स्वरादीनां महांतमीश्वरं निरतिशयैश्वर्यवंतं मां ज्ञात्वेति अ
ध्यायायतामर्थं ज्ञानं संपाद्य सम्यक्क्रमं विरचयतः कर्मणो न्यासमाश्रि से
न्यासं कर्मयोगं सपदि मलयियः कर्मकौशल्यमाभ्यां ब्रह्मणापीयते
यतस्य हृतपातजषा कर्मसर्वेन्द्रियात्तं प्राणायामेन चित्तं
भजति परपदं पंचमे प्रोक्तमेतत् २९ ॥
इति श्रीमद्देवतपंडितसूर्यविरचितायां भगवद्गीताटीकायां परमार्थ
प्रपायां सन्यासयोगनिरूपकः पंचमोध्यायः ५ ॥

वनमालीटीका

एतादृशं महोपायेन किं ज्ञेयं यज्ञानां भक्तिस्तन्नाह सर्वेषां यज्ञानां तप
सां भोक्तारं यज्ञादिरूपां पूजां हरिर्वा तत्फलदातारमित्यर्थः । सर्वेषां
लोकानां महांतमीश्वरं हिरण्यगर्भादीनामपि नियंतारं सर्वेषां भूता
नां प्राणिनां सुहृदं प्रत्युपकारनिरपेक्षतयोपकारिणं सर्वांतर्यामिणं
परिपूर्णसच्चिदानंदैकरसं मां ज्ञात्वा शांतिं मुक्तिमृच्छति प्राप्नोति महेश्व
रमित्यनेन यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभि
संविशंतीत्यर्के जगदुदयादिकर्तृत्वं सत्यं ज्ञानमनंतं ब्रह्मेत्यर्के सम्यता
रिकं समसद्गुणो ज्ञेयमुक्तम् अनेन निर्विकल्पब्रह्मज्ञानेक्यतिजन्मा

ति य

मोक्षहेतुरितिवदंतो निरस्ता नचजगत्कर्तृत्वादिकं शास्त्रवाच्यं द्वैतं येन तत
टस्थलक्षणं सत्यत्वमेव स्वरूपलक्षणमिति वाच्यं सत्यत्वादेर्हि स्वरूपभि
न्नत्वे मिथ्यात्वांगीकारे कर्तृत्ववत्तुल्यत्वापत्त्या स्वरूपलक्षणत्वासंभवात्
सत्यत्वेचाद्वैतहानेः तेषां ब्रह्माभिन्नत्वे लक्षणत्वासंभवात् नहि घटो घ
टस्य लक्षणं शास्त्रोपस्थाप्यवेदगतप्रकृष्टप्रकाशस्यैव कर्तृत्वादुपस्था
प्यस्य धर्मिसमसत्ताकस्य धर्मस्य तन्मते ब्रह्मणः प्रभावेन कर्तृत्वासंभवाच्च
एतेन यावद्ब्रह्मभावित्वं रूपं स्वरूपलक्षणमेव जगत्कर्तृत्वं तु न तटलक्षणमिति
पस्य कर्तृत्वस्य भगवति सदासत्त्वेपि प्रदानेन तत्तत्संबंधापादकस्य सृष्ट्या
दिकालस्य सदासत्त्वाभावान्न सदा संबंधापत्तिरिति दूरगाथकैर्वैयो
हरिर्नीसैः करावन तत् ज्ञानादेव मुक्तिः स्याद्वा तस्य च लक्षवान् हरिः ।
इति श्रीभगवद्गीतायां वनमालीटीकायां पंचमोध्यायः ५ ॥

वैजयन्तीटीका

इत्येवमात्मावलोकनपूर्वकं कर्मयोगे स्थितस्य मुमुक्षोर्मोक्षप्राप्तिरिति
लभेत्याह भोक्तारमिति यज्ञतपसां यज्ञानां पंचयज्ञादीनां तपसां चांद्रा
यणादीनां च भोक्तारं न त्विंद्रादयो देवा यज्ञे भुंजते तपः सच भागं हरंतीति पित
त्वद्भोक्तारः कृतान संतित्वमेवैको भोक्तेति कथं विजानीयामिति चेत्तत्राह ।
सर्वलोकमहेश्वरं सर्वेषां ब्रह्मरुद्रेन्द्रादीनां लोकानां जनानां महेश्वरं मह
श्चासावीश्वरश्चेति महेश्वरस्तम् ईश्वराणामपि महेश्वरमित्यर्थः तमीश्व
राणां परमं महेश्वरं तं देवतानां परमं च दैवतमित्यादिश्रुतेः ननु यद्येवंत
र्ह्यस्मि तर्हि गंगागोत्रादिवधरूपमहद्द्रोहकर्मकर्तुर्मम कर्मणा कथं प्रस
न्नो भविष्यसीति चेत्तत्राह सुहृदमिति सर्वभूतानां सर्वेषां ब्रह्मादिपिपीलि
कांतानां भूतानां प्राणिनां सुहृदं निरपेक्षोपकारकं सर्वं सुहृत्त्वान्ममापरा
धं सर्वं यथा क्षमंति तथा त्वमपि क्षरुत्वत्कर्मणाहं प्रसन्नो भविष्यामी
त्यर्थः ईदृशं मां सर्वेश्वरं सर्वपुरुषार्थप्रदं ज्ञात्वा ममाराध्यो यमेवमनु
भूयमानि भगवद्भावापत्तिमुक्तिमृच्छति प्राप्नोति इत्येवं ज्ञानगर्भकः क
र्मयोगो मुमुक्षूणामावश्यकमेव कर्त्तव्य इति पंचमाध्याये भगवता पार्थ
सारथिना पार्थाय प्रोक्तः कर्मैवावश्यकर्तव्यं ज्ञानगर्भं मुमुक्षुभिः इति

भोक्तारं ज्ञानी येन पंचमे तं सदाश्रये २९ इति ऊ(?)सप्तमवैजयंत्यां पंचमोऽध्यायः

मधुसूदनी टीका

सर्वेषां यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च भोक्तारं भोगकर्तारं पालकमिति वा सर्वेषां लोकानां महान्तमीश्वरं हिरण्यगर्भादीनामपि नियन्तारं सर्वेषां प्राणिनां सुहृदं प्रत्युपकारनिरपेक्षतयोपकारिणं सर्वान्तर्यामिणं सर्वावभासकं परिपूर्णं सच्चिदानन्दैकरसं परमार्थसत्यं सर्वात्मानं नारायणं मां ज्ञात्वा आत्मत्वेन साक्षात्कृत्य शान्तिं सर्वसंसारोपरतिं मुक्तिमृच्छति प्राप्नोतीत्यर्थः त्वां पश्यन्नपि कथं नाहं मुक्त इत्याशङ्कां निवारयितुं विशिनष्टि प्राप्नोतीत्यर्थः त्वां पश्यन्नपि कथं नाहं मुक्त इत्याशंकां निवारयितुं विशिनष्टि इति भावः २९ अनेक विशेषणानि उक्तरूपेणैव मम ज्ञानं मुक्तिकारणमिति भावः सर्वेषां मुक्तिसाधनम् साधनाभ्यासनिष्ठं हरिं गोविन्दं स्वस्वरूपपरिज्ञानं सर्वेषां मुक्तिसाधनम्

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्य श्रीमधुसूदनसरस्वतीविरचितायां स्वस्वरूपपरिज्ञानं नाम पंचमोऽध्यायः

सदानंदीटीका

कर्तृरूपेण सर्वेषां यज्ञानां तपसां योगाविनः किं वा ज्ञात्वा मुच्यत इत्याह तत्र कर्तृरूपेण सर्वेषां यज्ञानां तपसां तथा भोक्तारं देवरूपेण पालकं वा जगत्पतिं ब्रह्मादीनामपि महेश्वरं सर्वेषां प्राणिनां नियन्तारं सर्वेषां सुहृदं प्रत्युपकारमनपेक्ष्योपकर्तारं २ अन्तर्यामिणं ३ सर्वावभासकं पूर्णं सच्चिदानंदरूपिणं सर्वबुद्धिसाक्षिणं ४ संसारोपरतिं शान्तिं मोक्षं सम्यक् साक्षात्कृत्य आत्मरूपतः ५ यद्वा नारायणं हि मां सम्यक् साक्षात्कृत्य ऋच्छति प्राप्नोति मोक्षमालभते जनः पश्यन्नहं कथं नामुक्तस्य पंचत्वेन इति ६ निरवधिसर्ववाहिं शान्तिकाविशेषणानि तैरेव ज्ञानं मे मुक्तिकारणं ७ सकलसद्गुणदमीशं सर्वनाशितं श्रीमत्सद्गुणानि वा सर्वयज्ञरूपमतिं निष्कामः कर्मयोगेन नित्यं नाभिवैदेह्यां निविष्टदेहेनं १ २९ निष्कामः कर्मयोवेदान्तभूमिं यत्पतिमभिवेदं ज्ञानेवैराग्यपक्वं भवति च सकलं भयस्य गः सपदि रतिकरो यस्य पादारविंदे ज्ञाने वैराग्यपक्वं भवति च सकलं भयस्य गः सपदि रतिकरो यस्य पादारविंदे तमिव चरमितं लभते यन्न सारानंसा भक्तानां ननिरस्य स्थिरमतिरमितं लभते यस्य साक्षात् कामक्रोधौ निरस्य स्थिरमतिरमितं राज्ये काहितं नवजलदरुचं कृष्णमेवाननतोऽस्मि ॥

इति भावप्रकाशे श्रीसदानंदविरचिते जीवन्मुक्तिफलाख्यानः पंचमोऽध्यायः

नीलकंठीटीका

गी॰
टी॰ पं॰

एवंसमाहितचित्तेनकिंविज्ञेयमित्युच्यते भोक्तारमिति । सोपाधिकेनरूपे
णयज्ञानांतपसांचकर्तृरूपेणदेवतावभोक्तारंतथासर्वेषांभूतानांहिरण्य
गर्भादीनामपिमहांतंव्यापकंईशितारमंतर्यामिणं सुहृदंसर्वभूतानांप्रा
णिनांप्रत्युपकारनिरपेक्षतयाउपकारिणंसर्वप्रत्ययसाक्षिणंनारायणं
मांप्रत्यगभेदेनज्ञात्वासाक्षात्कृत्यतद्भावंप्राप्य शांतिमनुपाख्यवस्था
निरुपाख्यांकैवल्यसंज्ञामृच्छतिप्राप्नोति एवंसोपाधिब्रह्मभावप्रा
प्तिपूर्वकैवनिरुपाधिप्राप्तिरितिगम्यते यथोक्तंवार्तिकसारे सोपाधि
निरुपाधिश्चद्वेधाब्रह्मविदुच्यते सोपाधिकःस्यात्सर्वात्मानिरुपाख्योनु
पाधिकः जक्षन्क्रीडन्रतिंप्राप्तइतिसोपाधिकस्यतु छांदोग्येसर्वका
मित्वःसर्वात्मत्वंसमीरितं अहमन्नंतथान्नादःश्लोककृच्चाप्यहो
अहं इतितत्त्वविदःसामगानेसर्वात्मतास्फुटा अज्ञापिचकृष्टंता
सोपाधिकत्वविस्फुटः अपूर्वानपरेत्युक्त्वाश्रोष्यतेनिरुपाधिक इति २९
इतिश्रीभीष्मपर्वणिनैलकंठीयेभारतभावदीपेपंचमोऽध्यायः ५

संनिरोधात्त्वियोगेप्राणायामादिभ्या

षष्ठेटीका समाप्त्येस्वरचरणयानाद्वेतिद्वितीयमुपा

मात्स्नयति भोक्तारमिति ।

मांपूर्वेदिष्टेवासरेवाम्वंपरंनिर्वाणंब्रह्मशब्देनोक्तमानंयज्ञानामनं
पूर्वाणांतपसांश्रुतिचोदितानांक्रियाणांब्रह्मार्पणप्रकारेणानुष्ठेयानां
भोक्तारं सर्वेषांभूतानांप्रकृतिविकृतीनांमहांतमनन्यापेतिनाईश्वरं
सर्गस्थितिप्रलयेषुप्रभुंनिग्रहानुग्रहसमर्थं सर्वेषांभूतानांसुहृदंहितोप
देशकंज्ञात्वाशांतिमृच्छति येनतादिविहांक्लेशकर्मविपाकाशयैरप
रामृष्टःपुरुषविशेषोनिर्माणकायमधिष्ठायसंप्रदायप्रद्योतकेश्वरः
कस्मृतिपरमेश्वरःतत्त्वतःसर्वेसरटंतम् २९ इतिभगवद्गीतायांआनं
दीटीकायांपंचमोऽध्यायः ५ ॥

गी॰

षष्ठेटीका

स॰ मांनिर्वाणंब्रह्मशब्देनोक्तमनंतरमेयंपरमात्मानंज्ञात्वात्मत्वेनप्रा
तिपाद्य शांतिंनिःशेषविकल्पलोभविरतिलक्षणांनिर्वृतिमृच्छति । मत
स्वरूपज्ञानादेवमुच्यइत्यर्थः कीदृशंमांज्ञात्वायज्ञतपसांभोक्तारमिति
नानायज्ञतपःप्रभृतयःक्रियाशास्त्रेणानुष्ठीयतयाचोदिताःतासांम

त॰

ज्ञानमोहिताः अनुष्ठातारः परस्परभिन्नमात्मानं तत्तत्फलभोक्तारमन्यं
ते परमार्थविदस्तु कर्तृभेदाभावात्सर्वक्रियाफलनामहमेवैकः कर्ता च
भोक्ता चेति यज्ञतपसां भोक्तारं तथा सर्वलोकमहेश्वरं सर्वस्य कस्यचि
जन्तुजातस्य क्रीडामात्रप्रयोजनतया स्वेच्छामात्रेणैव नानात्वेनावभा
सितस्य महेश्वरं नानातानां क्रियाणामेकविनियोक्तृत्वात्परमं प्रभुम् त
था परमार्थतो भेदाभावात्सर्वेषां भूतानां सुहृदम् सर्वदा निसर्गनिर्दोष
स्वात्ममात्रप्रतिष्ठितत्वात्कस्यचिदहितं नाप्यनुग्रहकम् एवंविधं मां ज्ञात्वा
मद्धेतुकमेव कर्मसु प्रवर्तमानः कर्मयोगी शान्तिं मुक्तिमाप्नोतीति पूर्वस्मा
योगिनो विशिष्टत्वमेवास्य वितत्य प्रतिपादितमित्योम् यत्रैवान्ते यमुन
या गगनापगेव संन्यासमपीहृपगता सह योगबुद्ध्या अध्यायमेनमभिग
च्छन् सर्वतीर्थसारं प्रयागमिव पंचममात्मसिद्ध्यै ॥ २९ ॥ इतिश्रीम
द्रामकण्ठविरचिते वाक्यार्थान्वयमात्रे सर्वतोभद्राख्ये श्रीभगवद्गीतावि ॥
वरणे पंचमोध्यायः ५ ॥ ॥ ॥ ॥

अथ ध्यानयोगस्य ब्रह्मभाव लासिकी [illegible] टीका स्यचमूलकारणमाह ॥
मामहं ज्ञात्वा तत्परमात्मानं ज्ञात्वात्मत्वेन प्रतिपाद्य शान्तिं निःशेष
विकल्पोपशमरूपां निर्वृतिं मुक्तिं प्राप्नोति मत्स्वरूपज्ञानादेव मु
च्यते इत्यर्थः तथा च जलार्णवे न वेदाध्ययनान्मुक्तिर्न शास्त्रपठना
दपि ज्ञानादेव हि कैवल्यं नान्यथा वीरवन्दिते इति तथा च श्रुतिः तमे
व विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति तस्मात्तत्स्वरूप
पि कथं नाहं मुक्त इत्याशंकानिराकरणाय ऐश्वर्यरूपस्तवकानि
विशेषणान्याह सर्वेषां यज्ञानां तपसां च भोक्तारं पालकमिति वा त
था सर्वेषां लोकानां महान्तमीश्वरं हिरण्यगर्भादीनामपि नियन्तारं
सर्वेषां भूतानां सुहृदमन्तर्यामिनमित्यों आत्मन्येवैकतानतां हृन् ^र
द्धातिक्रममब्रवीत् संन्यासयोगरूपं यस्तं वन्दे पार्थाय चेतनम् ॥ २९
इतिश्रीभगवद्गीतायां [illegible] (लासिकी) टीकायां पंचमोध्यायः ५ ॥

गी॰
प टी॰

146

पंचोलीटीका

एवं समाहितचित्तेन किं ज्ञेयमित्युच्यते भोक्तारमिति। मां यज्ञानां तपसां कर्तृत्वेन देवतात्वेन च भोक्तारं सर्वलोकमहेश्वरं सर्वलोकानां महांतमीश्वरं सर्वभूतानां सुहृदं प्रत्युपकारनिरपेक्षतयोपकारिणं एवंविधं मां ज्ञात्वा शांतिं सर्वसंसारोपरतिमृच्छति प्राप्नोति २९ इतिश्रीभगवद्गीता पंचोलीटीकायां पंचमोध्यायः ५ ॥

[illegible]वीरसमिद्धायिनी॥

ईदृशस्य कर्मयोगी मत्साहाय्यादुभयलोकसिद्धिमाप्नवतीत्याह भोक्तारमिति। यज्ञतपसां शुद्धयज्ञादिरूपनियमानां भोक्तारं पालयितारं साहाय्यकं कुर्वाणमिति यावत्। अथच यज्ञतपसामनुष्ठितस्वस्ववर्णाश्रमोचितकर्मफलानां भोक्तारं स्वीकर्तारं तद्देवतेभ्यः समर्पणात्। तथा सर्वेषां लोकानां चतुर्दशभुवनानां महेश्वरं परस्वामिनं मां यज्ञो वै विष्णुरिति श्रुतेर्यज्ञमूर्तिधरं यज्ञभोक्तारं यज्ञफलधातारं च सर्वभूतानां मध्ये सुहृदं सदाय ज्ञात्वाईश्वरपवममात्रारब्धेकर्माणिपावनमिति पावनीक्रियेतियावत्। अथच यज्ञमूर्तिधरस्य मम विष्णोः प्रीणनार्थं स्वधर्माचारएव परलोकं यान्तमनुव्रजतीति भास्करचार्योपदेशाभ्यां समभ्युद्धिश्रित्य तथाच शास्त्रं अथच सर्वभूतानां सर्वत्र विद्यादिगुणयुक्तब्राह्मणश्वपाकादेर्भूतानां शुके दमादाहृते भूतं प्राणिनीते समेति श्रित्यनुशासनात्। समानोसमदर्शिनां वध्यतायां सामान्यमात्ततायि वत्सलत्वाणां निमित्तं दृष्टानां तद्विषयप्रवरणां सुहृदं साध्यं साधकं साध्यसिद्धिकरमिति यावत्। ज्ञात्वा निश्चित्य अतएव साम्येनैव प्रवर्तमानः कर्मयोगी प्राप्नोति प्रारब्धकार्यसमा

सिज्जन्यं सुखं राज्यभोगादिलक्षणमैहिकं पारत्रिकं स्वर्गप्राप्त्या
दिलक्षणमापवर्गिकं ब्रह्मसायुज्यप्राप्तिलक्षणं वेति त्रिवि
यमृच्छति प्राप्नोति अथव मांडलिकः स्वस्मादधिकराज्ञाधि
पत्यबलसंपत्त्यादिशालिनं देयकरमधिराजानं सहायं लब्ध्वा
राजांतरकृतोपद्रवान्निर्मुक्तः सन्निश्चिंतो भूत्वा राज्यसुखमनु
भवतीति ध्वनितमिदं २८ ॥ इतिश्रीवरणावीरसमिद्धोपि
ध्यां गीताव्याख्यायां पंचमोऽध्यायव्याख्यानं कृतं ५॥

मधुभाष्य

भोक्तारमिति २९ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचा
र्यविरचिते गीताभाष्ये पंचमोऽध्यायः ५॥

147

भाषा अनुवाद

जो कहो कि इन्द्रीमात्र वश करने से कैसे मुक्त होय तिसपर क
हते कि हां मुक्ति ज्ञानही के द्वारा होती है देखो हमारे भक्तों से स
मर्पित यज्ञ औ तपके यथाचित रूप भोक्ता औ प्रतिपालक सर्वा
लोक मे श्रेष्ठ ईश्वर सब से निरपेक्ष अन्तर्यामी रूपहम को जानि
के योगी लोग मेरी अनुग्रह से शान्ति कहे मोक्ष पावते है २९
श्रीधर स्वामी कहते कि जो अर्जुन की कर्म योग औ ज्ञान योग
को पृथक शङ्कानिवारि जिस ने क्रमसे दोनो को एक कहा है सो
ई जगत गुरु श्रीकृष्ण को हम प्रणाम करते हैं ॥
इति जगन्नाथ शुक्ल विरचितायां मनभावनीटीकायां पंचमोध्यायः ५

दोहा

यज्ञ तप भोग न द्वारजो सर्वलोक पतिजोहि समजन मित्र
हिंजान मोहिशांतिपाम सो होहि २९ ॥ इति ॥



